ISSN 2393-8641
VOLUME-III SEPTEMBER 2017

# संस्कृतचिन्तनम्

# Saṃskṛtacintanam

A PEER REVIEWED INTERNATIONAL RESEARCH JOURNAL OF SANSKRIT



RAMAKRISHNA MISSION SIKSHANAMANDIRA

Belur Math, Howrah - 711202
West Bengal, India

VoLume -III September 2017 ISSN 2393-8641

# संस्कृतचिन्तनम्

# Saṃskṛtacintanam

A PEER REVIEWED INTERNATIONAL RESEARCH JOURNAL OF SANSKRIT

Ramakrishna Mission Sikshanamandira

Belur Math, Howrah - 711 202

*Published by*
Secretary
Ramakrishna Mission Sikshanamandira
Belur Math, Howrah - 711 202
West Bengal, India.

**Copyright @ The Secretary, R.K.M.S.M.**

*Date of Publication :* 5th September, 2017

*All Corresposedence should be addressed to:*
The Principal
Ramakrishna Mission Sikshanamandira
Belur Math, Howrah - 711 202
West Bengal, India.
Phone : (033) 2654-6081
e-mail : rkmsm@rediffmail.com

*Price :* ₹. 300.00

*Cover Designed by :*
Kreative Koncept

*Type Setting, Cover & Printed by :*
Kreative Koncept
1, Nabin Paul, Lane
Kolkata - 700 009

## Advisory Board


**Swami Tattwavidananda**
*Assistant General Secretary, Ramakrishna Math and Ramakrishna Mission*

**Swami Tattwasarananda**
*Principal, Ramakrishna Mission Sikshanamandira.*

**Swami Shastrajnananda**
*Principal, Ramakrishna Mission Vidyamandira*

**Swami Divyagunananda**
*Vice-Principal, Ramakrishna Mission Sikshanamandira.*

**Dr. Swami Prajnanananda Saraswati**
*President, Samkara Matha, Howrah & Sri Sri Nigamananda Vidyaniketana, Varanasi.*

**Mahamahopadhyaya Manudeva Bhattacharya**
*Pradhyapaka, Sampurnananda Samskrita Visvavidyalaya, Varanasi.*

**Dr. Gopalchandra Mishra**
*Vice-Chancellor, University of Gourbanga*

**Dr. Tarapada Chakrabarty**
*Former Professor, University of Burdwan.*

**Dr. Prabal Kumar Sen**
*Former Professor of Philosophy, The University of Calcutta.*

**Dr. Biswanath Mukherjee**
*Former Professor, University of Burdwan.*

**Dr. Sanghamitra Sengupta**
*Former Professor of Philosophy, The University of Calcutta.*

# Editorial Board

**Dr. Brajakishore Swain**
*Former Professor,*
*Sri Jagannath Samskrit Visvavidyalaya, Puri.*

**Prof. Didhiti Biswas**
*The University of Calcutta.*

**Dr. Elisa Freschi**
*Institute for the Cultural and Intellectual History of Asia*
*Austrian Academy of Sciences, Vienna, Austria.*

**Prof. Ayan Bhattacharya**
*The West Bengal State University*

**Dr. Mau Dasgupta**
*The University of Calcutta.*

**Dr. Nina Mirnig**
*Institute for the Cultural and Intellectual History of Asia*
*Austrian Academy of Sciences, Vienna, Austria.*

**Dr. Tanmay Kumar Bhattacharya**
*Government Sanskrit College*

**Dr. Rabindranath Karmakar**
*David Hare Training College*

# Foreword

It is both a pleasure and privilege for us to present before our learned readers, this Third volume of Saṃskr̥tacintanam, an annual Journal of Sanskrit published annually by Ramakrishna Mission Sikshanamandira. An effort has been made here to offer within two covers a collection of as many as colorful, brilliant and yet lucid expositions which are resultants of continuous thinking and trialing for origination in the process of nurturing and cultivating Sanskrit both as heritage language and as a dynamic diffusion of culture. The papers published here have been written with energetic authority to enable teachers, educators, researchers, academicians and even policy makers of the state to explore Sanskrit language and literature in their respective ways. There may not be a common consensus among their opinions, but, there will surely be an agreement on the issue that each of these writings will be intended to provoke discussion, introspection, inspiration and ultimately action.

The constitution of the Ramakrishna Mission highlights the importance of education in the first item in its 'Methods of Action': "to train men so as to make them competent to teach such knowledge or science as are conducive to the material and spiritual welfare of the masses". And it would, according to Swami Vivekananda, only be possible through "Western Science coupled with Vedanta, brahmacharya as the guiding motto, and also Sraddha and faith in one's own self." To condense the combination of Indian traditional education with knowledge from the West Swamiji used one epigram, 'Science and Sanskrit', of course both the terms need to be understood in their broadest sense. Swamiji envisioned "there is a great chance, much more than you ever dream of, for those wonderful stories scattered all over the Sanskrit literature, to be re-written and made popular." We wish and pray that this humble attempt with the publication of the Third Volume of Sanskrit bi-lingual journal fulfils all that Swamiji wished-for long back in respect of Sanskrit language and literature.

To conclude, we owe our indebtedness to the learned members of the Advisory as well as the Editorial Board for their valuable suggestions and untiring co-operation for bringing out this Volume and extend our heartfelt thanks to the Members of Faculty and Staff of this College for their always remaining with us. Lastly, our utmost thanks and gratitude are due to those who have contributed in this Journal.

5th September, 2017

Sw Tattwasarananda

# संस्कृतचिन्तनम्

सेप्टेम्वर : २०१७

## सूचीपत्रम्


| | | | |
|---|---|---|---|
| 1. | GLORIOUS CONTRIBUTION OF THE HEAVENLY DOCTORS AŚVINS WITH SPECIAL REFERENCE TO ṚG-VEDA 1.117. | Nivedita Chaudhuri | 7 |
| 2. | पाणिनीयव्याकरणशास्त्रं न्यायवैशेषिकशास्त्रोपकारकम् | Haradhan Garai | 12 |
| 3. | NASADIYASUKTASAMIKSA (NASADIYASUKTA: AN ANALYSIS) - | Prof. Bhagirathi Biswas | 16 |
| 4. | भारतीयशास्त्रेषु जल्पस्वरूपम् | Khokan Bhattacharya | 23 |
| 5. | CONTRARIES IN THE COMMENTARIES ON THE GITA - | Kaushik Acharya & Kiriti Sengupta | 29 |
| 6. | शब्दशास्त्रे उपमास्वरूपम् – | Anup Khan | 37 |
| 7. | Multifarious Uses of Languages by Women and Men Characters in Sanskrit Dramas- An Analysis | Sovan Chakraborty | 47 |
| 8. | वेदान्तेषु भाष्यकृत्पञ्चकदृष्ट्या जीवस्वरूपविमर्शः | Bipadtaran Ruidas | 58 |
| 9. | अनुवादसाहित्ये काश्यपकवेः कालीपदतर्काचार्यस्य कृतित्वम् | Subhrajit Sen | 63 |
| 10. | वक्रोक्तेर्विवर्तनसमीक्षणम् | Pradip Kar | 72 |
| 11. | भारवेरलंकारप्रयोगवैविध्यम् | Bhaskar Gangopadhyay | 81 |
| 12. | अद्वैतमते प्रमा | Rajkumar Midya | 95 |
| 13. | शब्दब्रह्मोपलब्धिरेव आनन्दानुभूतिः | Abhijit Mandal | 101 |
| 14. | येन विधिस्तदन्तस्य इति सूत्रस्य न्यासान्तरसमीक्षणम् | Malay Porey | 104 |
| 15. | संक्षेपशारीरके आत्मस्वरूपावलोकनम् | Debanjan Das | 114 |
| 16. | नित्यानन्दस्मृतितीर्थप्रणीतः कालिदासजीविताश्रितो व्यायोगः 'कालिदासः'--- विश्लेषणात्मिका पर्यालोचना - | Soumyajit Sen | 126 |
| 17. | मीमांसादर्शने यत्किञ्चित् पर्यालोचनम् | Swami Alakananda | 136 |
| 18. | अलङ्कारशास्त्रेषु प्रतिपादितं रसस्वरूपमम् : पर्यालोचनमेकम् ` | Dr. Srimoyee Ghosh | 141 |
| 19. | POET DEVAMUNI: AS REVEALED THROUGH ARAṆYĀNĪ HYMN (RS 10.146) | Pubali Chakraborty | 146 |
| 20. | चमस्किनिरूक्तभाषाधिगमनतत्त्वस्य श्रौतत्वविचारः | Dr. Debnath Pal | 152 |
| 21. | Defending the Validity of Pramana : An Introduction | Dr Sankar Chatterjee | 156 |
| 22. | प्रातिशाख्यानां शिक्षास्वरूपत्वनिर्णयः | Mrinal Chandra das | 162 |
| 23. | धर्मशास्त्रानुसारिणी शिक्षाव्यवस्था | Surajit Banerjee | 166 |
| 24. | प्राक् धर्मशास्त्रेण अधुना वृक्षसंरक्षणम् | Arpita Dey | 180 |

# GLORIOUS CONTRIBUTION OF THE HEAVENLY DOCTORS AŚVINS WITH SPECIAL REFERENCE TO ṚG-VEDA 1.117.

**Nivedita Chaudhuri***

**Abstract**

Ṛgveda 1.117 is called as Dānastuti or the Hymn about Charitable Deeds. Here, the two deities, named Aśvins, are expressed in the shape of Charitable Deeds.

They are described as 'bounteous givers'. They are requested to give food and strength. Actually their herbal and surgery treatment and technical skill are described as charitable deeds.

Aśvins were prayed in Ṛgvedic India as the life-saver. They rescued Atri from the malignant diseases. They saved the life of Rebha, Vandana, Viṣṇāpu with the herbal treatment. Ghoṣā and Ṣyābā were recovered the blindness of Kaṇva, Ṛjraśra; the deafness of the Nṛṣad and the barrenness of milkless cow and the husband of Vadhrimati. They enriched Viśpalā by the artificial leg with the skill of their surgery treatment. They were able to bring water from the sky with their technical skill.

It has been proved that the Ṛgvedic India was fond of ancient Indian medical science. In that particular time, women could go to war. In this particular time sages were fully conscious of Geographical Science. The procedure of Test Tube Baby was invented most probably in that particular time. The late marriage of women was not disgraceful. The Aryans were familiar to the barley.

**Key Words**

Ṛgveda-40 hymns-Dānastuti - Aśvins - bounteous giver-life saver-Atri-malignant diseases-Rebha and Vandana-herbal strategy-Ghoṣā and Ṣyābā-Leprosy-Cyavana-youth-medicine- Ṛjraśra -vision-barren cow-milkful-impotency-husband of Vadhrimati-surgery- Viśpalā-artificial leg-attraction-rain-medical science-Anatomy and Physiology-women-war-Astronomy-Geographical Science-Test Tube Baby-late marriage-ploughing-barley-veterinary treatment.

* *Assistant Professor in Sanskrit, Govt. College of Education, Banipur*

**Introduction**

There are at least 40 hymns in the Ṛg-veda which appreaciate the charitable deeds of the king and the sacrifice. They partly deal with ritualistic concept. They play the inter-mediatory role between the religious and the secular hymns of the Ṛg-veda.

Ṛg-veda 1.117 is called as Dānastuti or the Hymn about Charitable Deeds. Here, the two deities, named Aśvins, are expressed in the shape of Charitable Deeds.

They are described as 'bounteous givers.' They are requested to give food and strength. Actually their herbal and surgery treatment and technical skill are described as charitable deeds.

**Functions of the Aśvins**

Aśvins were prayed in the Ṛg-vedic India as the life-saver (eṣā yātaṃ nāsatyopa bājaiḥ). They rescued the sage named Atri with his children from the malignant enemy(Rsim narabahamsah pāñcajanyamṛbisādatriṃ muncatho gaṇena). They rescued the sages named Rebha and Vandana from the different wells and saved their life with herbal strategy. They gifted to Viśwakāya Viṣnāpu, his son, from the lofty clutch of death with their herbal treatment (Yuvaṃ narā stuvate kṛṣṇiyāya Viṣṇāpwaṃ dadathurbiswakāya) . Once upon a time, Kakṣibān's daughter named Ghoṣā and a famous black sage named Syābā, both were afflicted with leprocy and healed by Aśvins also with their herbal skills and at last, though Ghoṣā was aged, yet got married(Ghoṣāyai citpatṛṣade duroṇe patiṃ jurjantyā Aśvinābadantam). The blindness of Kaṇva(mahaḥ kṣoṇasyāśvinā Kaṇvāya) and the deafness of the son of Nṛṣad were also treated as Aśvins(Yannārṣadāya śravo). They nourished Agastya who was attacked by the demons. Cyavana could maintain his youthful body with the help of their medicinal strategy(Yuvam Cyavānamśvinā jarantaṃ punaryuvānaṃ cakrathuḥ śacibhiḥ).

They gave perfect vision to the blind Rjrāśra who was punished by his father. They treated the barren, emaciated and milkless cow and gifted her to the sage named Sayu with its milkful and healthy body. They treated the impotency of the husband of the princess named Vadhrimati and the couple achived a son named Hiraṇyahasta (Hiranyahasta maśvinā rarāṇā putram narā Vadhrimatyā adattam).

Both they were fond of surgery treatment. They poured a hundred jars of the people with full of honey from the hoof of their fleet horse by surgery treatment. They treated Viśpalā, the wife of the king named Khela, with the artificial leg made of iron by the surgery treatment(saṃ Viśpalāṃ nāsatyāriīṇitam).

They were also fond of technical skill. They saved the life of the prince named Bhujyu, the son of the king named Tugru from the tossing ocean with their technical skill. They maintained the existence of quail named Uṣā from the molecular attraction of the Sun-rays. They helped to achieve conquer to the king named Jahuṣa. They were able to bring water for the earth from the clouds who was moving hither and thither in the sky according to Skandaswāmī(…..biśwāco ahataṃ biseṣṇa).

**Social Aspects**

The above incidents prove that our Ṛg-vedic India is the glorious example of ancient Indian medical science. In that particular time, India was fond of different types of treatments in the perspective of different types of diseases.

Aśvins made honey by the ingredients drawn from the hoof of their fleet horse. They caused to unite the broken leg of Viśpalā with the artificial leg made of iron. They saved the life of critically injured sage named Śyābā with the strategy of surgery treatment.

Those above incidents were the glorious example of ancient Indian Medical Science. Those incidents prove that in the Ṛg-vedic India, the Minor Surgery or Śālākyatantram, Major Surgery of Śalyatantram, Anatomy and Physiology or Śarīrasthānam and Veterinary Science were introduced.

The above incident also proves the marvelous example of feminism in the Ṛg-vedic India because through the above hymn we can know that women could go to war to do battle with her husband, father or brother etc.

They saved the life of bhujyu from the tossing ocean. Usa, the immediate before time of dawn, was expressed from the molecular attraction of the Sun-rays. So, it has also been proved that the knowledge of Technology and Astronomy was in practice in the Ṛg-vedic India. The rain came from the cloud with the help of the technical skill delivered by Aśvins. These incidents prove that the Ṛg-vedic India was fond of Geographical Science according to Yāska, Maxmuller and T.Burrow.

They treated Kaṇva and Ṛjraśra. So, the treatment of blindness was introduced in the Ṛg-vedic India. They treated the cow of Sayu and the husband of Vadhrimati. So, the treatment of barrenness was also introduced. They nourished Agastya who was born from the Pitcher. This incident proves that the procedure of the Test-Tube-Baby was invented most probably in the Ṛg-vedic India

Ṛg-veda 1.117.17 and 1.117.19 are describing the treatment of the crippled body of Ghoṣā and her marriage. By this incident, it has been proved that the Ṛg-vedic India, the late marriage of women was not disgraceful.

It has been proved that the Ṛg-vedic Aryans was familiar to the ploughing of barley through the above hymn and through the above incidents it has been proved that the economy of Ṛg-vedic India was agricultural based.

**In the cases of the other mantras:**

Ṛg-veda 1.117.03 is similar to the Ṛg-veda 1.112.07, 1.116.08, 1.118.07 because all of the mantras are describing to the releasing of Atri from the fire with the help of the Aśvins.

Ṛg-veda 1.117.06 and 1.116.07 are similar to one another according to Skandaswāmi. Both they are describing the skill of veterinary treatment delivered by Aśvins.

Ṛg-veda 1.117.7a (Yuvāṃ narā stuvate kṛiṣṇiyāya Viṣṇāpvaṃ…) is similar to Ṛg-veda 1.116.23 (abasyate stuvate kṇiṣṇiyāya….) according to Skandaswāmi because both of they are describing the medical treatment delivered by Asvins to Viṣṇāpu.

Ṛg-veda 1.117.7b is similar to 10.39.03 according to Skandaswāmi also because both of they are describing the recovery of Ghoṣā from the oldness through the treatment by delivered by Aśvins.

Ṛg-veda 1.117.8b is similar to Ṛg-veda 1.118.07 (yuvam…..) according to Skandaswāmi because both of they are describing the treatment of blindness of Kanva delivered by Aśvins.

Rg-veda 1.117.11d (sunoma……) is similar to Rg-veda 1.116.15d because both are describing the accident and the treatment of the broken leg of Vispala.

Rg-veda 1.117.17 and the Rg-veda 1.116.16 are describing to one another because both of they are describing simultaneously the ruthlessness and the treatment of blindness of Ṛjrāśra.

Rg-veda 1.117.17 and 1.112.08 are also similar to one another because both of they are describing the treatment of blindness of Ṛjrāshra delivered by Aśvins.

**Conclusion**

It is needless to say that in this quest for knowledge and in this effort to build up a civilization based on good health of the general people, science and technology, naturally came to play an important part. Information about this science and technology generally lies scattered through the Vedic corpus.

## Bibliography


Bloomfield, Maurice, 1906, A Vedic Concordance, Cambridge, M.A.: Harvard Oriental Series, vol.10, Indian repr., 1964, Delhi: Motilal Benarasidas.

Chakrabarti, Samiran Chandra, 1996, Some Aspects of Vedic Studies, Calcutta;School of Vedic Studies; Rabindra Bharati University.

Dandekar, R.N.(ed.), 1986-2004 (2nd edition); Vedic Bibliography; 6 vols. Bhandarkar, (1st edition 1946-1993); Oriental Research Institute, Poona.

Das, Abinash Chandra, 1927, Rgvedic India, rev. 2nd edn. Calcutta: R Cambray & Co. (1st publ. 1920).

Das Gupta, Mau, 2017, Women Seers of the Rg-veda, New Delhi: D.K.Printworld(P) Ltd.

Dharmapala, Gauri: 2003, Puro-notun Veder Kabita, [in Bengali]; Kolkata.

Dutta, Ramesh Chandra: 2007, Rgveda-samhita [in Bengali]; Trs. from original Sanskrit text; Kolkata; Haraph.

Griffith, Ralph Thomas Hotchkin, 1896-97, The Hymns of the Rgveda,tr. with a popular commentary, 2 vols., Beneras: E.J.Lazarus & Co. (1st publ. 1889-92) in 4vols.).

Keith, A.B., 1925, The Religion and philosophy of the Veda and the Upanisadas, Oxford: Oxford University Press.

Sankarananda, Swami, 1943, Rgvedic Culture of the pre-historic Indus, Vol.1; Vol.2.1944; Abhedananda Academy of Culture.

Shastri, A Mahadeva, 1912, The Basic Truths of Vedic Religion, Madras: Theosophist Office.

Sontake, Narayana Sharma and Cintamani Ganesh Kashikar et al., eds., 1933-51, Rgveda-samhita, vols. 1-5 (3rd ed. 1984, reprint 2001), Poona: Vaidika Samsodhanamandala.

Winternitz, M, 1981, A History of Indian Literature. Trs. from original German by Mrs. S Ketkar, Ist Indian edn. Vol.1, Pt.1; P,101; Delhi. 1st edn. 1926 from Calcutta.



Received on 07. 03. 2017 Accepted on 12. 07. 2017

# पाणिनीयव्याकरणशास्त्रं न्यायवैशेषिकशास्त्रोपकारकम्

हाराधन-गराइ*

**प्रबन्धसारांशः (Abstract)**

*'काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्' इति भणितिनयेऽखिलतन्त्राणि काणादपाणिनीयतन्त्रतन्त्राणि। परन्तु प्रबन्धेऽस्मिन् दृश्यते कश्चित् नवीनः विषयः- काणादशास्त्रं पाणिनीयशास्त्रसहायताम् अपेक्षते। प्रबन्धेऽस्मिन् तद्विषयकम् उदाहरणजातं प्रदर्शितम्। विशेषतस्तत्र न्यायसूत्रं, कणादसूत्रं, तत्त्वचिन्तामणेः व्याप्तिपञ्चकम् चेत्यादिकं व्याख्यानपुरःसरम् आलोचितम्।*

**प्राबन्धिककुञ्चीपदानि (Keywords)**

शास्त्रम्, काणादं पाणिनायञ्च सर्वशास्त्रोपकारकम्, व्याकरणशास्त्रम्, न्यायवैशेषिकशास्त्रम्, न्यायसूत्रभाष्यम्, न्यायसिद्धान्तमुक्तावली।

अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः।।

दृश्यते हि लोकेऽखिलमनुजनुसन्ततिः अन्यतन्त्रा अस्वयंसम्पूर्णा परस्परापेक्षिणी वा। तथैवास्माकं शास्त्राण्यपित न्त्रान्तरतन्त्राणि। शास्त्रमेतेन न हि हेयतामुपैति, अपि तु विषयबोधसौकर्यार्थं प्रसङ्गतस्तत्र तत्र शास्त्रे अन्यशास्त्रपर्यालोचितविषयाः आवश्यकाः भवन्त्येव। किञ्चैतेन शास्त्रान्तरप्रतिपादितविषयविज्ञानं घटते शास्त्रस्यैकस्यैव अध्ययनेन। तर्ह्येवं न्यायवैशेषिकशास्त्रमपि इतरशास्त्राण्यपेक्षत इत्यत्र किमाश्चर्यम्? न्यायवैशेषिकशास्त्रं वैयाकरणेभ्यः बहुविषयं धारयते। 'काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्।' इति सर्वशास्त्रोपकारकत्वात् व्याकरणशास्त्रं विशेषतः पाणिनीयशब्दशास्त्रं न्यायवैशेषिकशास्त्रसहायकम् इति भवतीति कुतो संशीतिः? एतदर्थमेव पाणिनीयव्याकरणशास्त्रं न्यायवैशेषिकशास्त्रोपकारकमिति विषयश्चितो मयात्र शोधपत्ररूपेणोपस्थापयितुम्।

पाणिनीयशब्दशास्त्रं प्रारम्भिकप्रामाणिकप्रमेयप्रधानपुस्तकादारभ्य अर्वाचीनप्रमाणप्रधान-नव्यनैयायिकग्रन्थानां समधिकतया उपकारकम्। तथाहि गौतमनिरुक्तन्यायदर्शनस्यादिमसूत्रे एव व्याकरणस्यावश्यकता। 'प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्प--वितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानाम्' इति पदे कः समासः समीचीनः, कस्तावदत्र विग्रहः इत्यादिविषयकसंशीतिशमनाय शब्दशास्त्रसरणिरेवाश्रयणीयः। बहुव्रीहिकर्मधारयोरसम्भवात् षष्ठीसमासपरिग्रहे निग्रहस्थानस्य आन्त्यपदार्थस्य प्राधान्ये विवक्षितार्थहानिप्रसङ्ग इति चेदुच्यते भाष्ये – चार्थे द्वन्द्वसमासः इति। सर्वपदार्थप्रधानः समासो द्वन्द्वः इति किमुक्तं भवति? सर्व एते प्रमाणादयो विज्ञेया इति। अन्यथा समासान्तरपरिग्रहाद्विशेषणत्वेन उपयुक्तानां प्रमाणादीनां अविज्ञेयता स्यात्। किञ्च, विग्रहकाले वचनभेदोपादानं कथं भवेदिति उच्यते 'निर्देशे यथावचनं विग्रहः' इति। विषयेऽस्मिन् वृत्तिकारस्य विश्वनाथस्य मतम् अनुसन्धेयम् – तत्र च निर्देशे यथावचनं विग्रहः इति यथाश्रुतभाष्यानुसारिणः – प्रमाणानि च प्रमेयं च संशयश्च प्रयोजनं च दृष्टान्तश्च सिद्धान्तश्च अवयवाश्च तर्कश्च निर्णयश्च वादश्च जल्पश्च वितण्डा च हेत्वाभासाश्च छलं च जातयश्च निग्रहस्थानानि चेति विग्रहं वर्णयन्ति इति। एवं दृश्यते प्रथमसूत्रे एव न्यायदर्शनस्य व्याकरणापेक्षित्वम् स्फुटम्।

* गवेषकः, रामकृष्ण-मिशन्-विद्यामन्दिरम्

प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि इति सूत्रघटकीभूतप्रत्यक्षपदविषयेऽपि व्याकरणप्रसङ्गः सुतरामायाति। तथाहि प्रत्यक्षपदे अव्ययीभावः समासः इति भाष्यकारस्य मतम्, यद्यपि तेन अक्षम् अक्षं प्रति वर्तते इति विग्रहमनूद्य अर्थः कथितः – अक्षस्याक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षम् इति। उच्यते च वाचस्पतिमिश्रेण – अर्थमात्रमनेन प्रतिपाद्यते न पुनः समासः इति। अस्तु यदि सूत्रगतं प्रत्यक्षम् पदं अव्ययीभावसमासनिष्पन्नं तर्हि प्रत्यक्षः घटः, प्रत्यक्षा नदी इत्यादिप्रयोगाणां कथं साधुत्वम् अस्योत्तरं न्यायवार्तिककृता प्रदीयते – प्रादिसमासोऽयं द्रष्टव्यः प्रतिगतमक्षं प्रत्यक्षमिति, यथा उपगतो गोभिः उपगुरिति। ननु तथापि परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः इति नियमात् परशब्दस्याक्षस्य क्लीबत्वेनात्रापि प्रत्यक्षमिति तदवस्थमेवेति नाशङ्कनीयम् प्राप्तापन्नालंपूर्वगतिसमासेषु परवल्लिङ्गताप्रतिषेधाद भिधेयलिङ्गोपादानात् प्रत्यक्षोऽर्थः प्रत्यक्षा बुद्धिः प्रत्यक्षं ज्ञानमित्यभिधेयलिङ्गता सिद्धा भवतीति व्याकरणगता पर्यालोचना।

अनुमानलक्षणसूत्रम् व्याकरणालोचनामपेक्षते। तथाहि अथ तत्पूर्वकं त्रिविधमनुमानं पूर्वच्छेषवत्सामान्यतो दृष्टं च इति सूत्रस्य तत्पूर्वकमिति पदव्याख्याने दृष्टिराधेया। अत्र तत् पूर्वं यस्येति विगृह्य तत्पदेन पूर्वोपक्रान्तस्य प्रत्यक्षस्य परामर्शेन प्रत्यक्षपूर्वकमनुमानमेतादृशार्थः नैव कर्तव्यः, तथा सति प्रत्यक्षपूर्वकत्वम् अनुमानस्य इव आगमस्मृतिसंशयविपर्यासानामप्यस्तीति ते अपि अनुमानं प्रसज्येरन्। अनुमानादिपूर्वकं चानुमानं न प्रत्यक्षपूर्वकमिति नानुमानं स्याद् अनुमानलक्षणेन अव्यापनात्। तस्मादव्याप्त्यतिव्याप्तिभ्यामलक्षणापत्तिः स्यात्। तर्ह्यत्र कीदृशः विग्रहः करणीय इति उद्योतकरेण उद्यते – तानि ते तत् पूर्वं यस्य तदिदं तत्पूर्वकम्। यदा तानीति विग्रहः तदा समस्तप्रमाणाभिसम्बन्धात् सर्वप्रमाणपूर्वकत्वम् अनुमानस्य वर्णितं भवति। एवमिह शब्दशास्त्रीयशैलीमाश्रित्य समाधानं प्रदत्तम्।

शब्दप्रमाणालोचनवेलायामपि शब्दलक्षणे व्याकरणशास्त्रं विशेषसहकारिरूपेण वर्तते। तथाहि आप्तोपदेशः शब्दः इत्यत्र प्राचीननैयायिकाः उपदेशशब्दस्य उपपूर्वकदिश्धातोः कर्मणि घञा उपदेशशब्दस्य व्युत्पत्तिमङ्गीकृत्य वाक्यमेव बोधयति येन ज्ञायमानपदमेव शब्दप्रमाणमिति लभ्यते। परन्त्वेतेन मौनिश्लोकादौ शब्दप्रमाणलक्षणमव्याप्तमिति चेदुच्यते अत्र आप्तस्य उपदेश इति विग्रहं विहाय आप्तः यथार्थः उपदेशः शाब्दबोधो यस्मादिति विग्रहो ग्रहणीयः। प्रसङ्गेऽस्मिन् वृत्तिकृतो मतमनुसन्धेयम् – आप्तोपदेश इति लक्षणम्। आप्तः – प्रकृतवाक्यार्थयथार्थज्ञानवान्, तस्योपदेश इत्यर्थः। प्रकृतवाक्यार्थयथार्थज्ञानप्रयुक्तः शब्दः इति फलितार्थः। अथ वा आप्तः यथार्थः उपदेशः शाब्धबोधो यस्मात् इति।

अनुमानोपमानशब्दानाम् अर्थः प्रमेयरूपेण प्रमाणरूपेण वा उभयथा स्वीकर्तुं शक्यते व्याकरणबलात्। तथाहि अनुमानशब्दात् भावे ल्युट्प्रत्ययः प्रमेयभूतम् अनुमानं, ततः कर्मणि ल्युट्प्रत्ययः प्रमाणरूपम् अनुमानमेव बोधयति।

न केवलं न्यायशास्त्रे एव वैशेषिकशास्त्रेऽपि व्याकरणोपयोगित्वं समस्ति। तथाहि वैशेषिकशास्त्रस्य यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः इति द्वितीयसूत्रस्य अभ्युदयनिःश्रेयससिद्धिरिति पदस्य विग्रहः उपस्कारकारेणादौ एवं प्रदर्शितः अभ्युदयश्च निःश्रेयसञ्च अभ्युदयनिःश्रेयसे इति द्वन्द्वः, तयोः सिद्धिः अभ्युदयनिःश्रेयससिद्धिरिति षष्ठीसमासे, द्वन्द्वादौ द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते इति नियमेन यतः इति पूर्वपदेन एतयोरुभयोः अन्वयः। उक्तञ्च उपस्कारकृता तदुभयं यतः स धर्मः। परन्तु तथाविधार्थस्वीकरणे जन्यपदार्थमात्रं प्रति कालस्य कारणत्वकल्पितत्वात् कालस्य तदुभयसिद्धिं प्रति कारणत्वसत्त्वात् तस्यापि धर्मत्वापत्तिरिति चेदुच्यते – अभ्युदयद्वारकनिःश्रेयसमिति मध्यपदलोपी समासः, पञ्चमीतत्पुरुषो वा। अभ्युदयनिःश्रेयसे प्रति कालस्य

कारणत्वेऽपि अभ्युदयं द्वारीकृत्य निःश्रेयसकारणं नैव भवतीति नातिव्याप्तिः। अभ्युदयात् निःश्रेयससिद्धिः अभ्युदयनिःश्रेयससिद्धिरिति पञ्चमीतत्पुरुषसमासाश्रयेणापि धर्मलक्षणातिव्याप्तिर्निवारिता भवति, स्वजन्यतत्त्वज्ञान वत्त्वसम्बन्धेन निःश्रेयसजनको न भवति कालः।

नव्यन्यायग्रन्थेषु च दृश्यते आधिक्येन शब्दशास्त्रस्य उपयोगित्वम्। यथा व्याप्तिपञ्चकस्य मथुरानाथतर्कवागीशप्रणीतायां रहस्यटीकायां बहुत्र व्याकरणनियमानां प्रसङ्गः दरीदृश्यते। तथाहि व्याप्तेः प्रथमलक्षणस्य साध्याभाववदवृत्तित्वम् इत्यस्य समासार्थकथनकाले प्राञ्चः एवं विग्रहं प्रदर्शयन्ति – वृत्-धातोः क्तप्रत्यये वृत्तम्, वृत्तस्य अभावः अवृत्तमिति अव्ययीभावसमासः, साध्याभाववतः अवृत्तम् साध्याभाववदवृत्तम् इति षष्ठीसमासः, साध्याभाववदवृत्तम् यत्र अस्ति साध्याभाववदवृत्ती इति मत्वर्थीयेन्प्रत्ययः, साध्याभाववदवृत्तिनः भावः साध्याभाववदवृत्तित्वम् इति। अत्र वैयाकरणनियमविशेषः उल्लङ्घित इति रहस्यटीकायामुच्यते – न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत् नदर्थप्रतिपत्तिकरः इति अनुशासनविरोधात् इति। वस्तुतो यथा महाबलवान् इति शब्दम् अप्रयुज्य महाबलः इति शब्दः प्रयोक्तव्यः, तद्वदिहापि। नन्वत्र तत्पुरुषसमासात् मत्वर्थीयो दृश्यते इति कुतोऽनुशासनविरोध इति नाशङ्कनीयः – कर्मधारयपदस्य बहुव्रीहीतरसमासपरत्वात्। एवं नवीनाः प्राचीनव्याख्याने समासार्थापत्तिमुत्थाप्य नव्यमतीयसमासार्थं प्रस्तुवन्ति – वस्तुतस्तु साध्याभाववतः न वृत्तिः यत्र इति त्रिपदबहुव्रीह्युत्तरं त्वप्रत्ययः। एवं दृश्यते नव्यन्यायग्रन्थे व्याकरणचर्चा।

शाब्दबोधे पाणिनीयशब्दशास्त्रं पारम्पर्येण सहायकं वर्तते इति समेषां विदितचरम्। शाब्दबोधे शक्तिज्ञानं सहकारिकारणं भवति। शक्तिग्रहश्च व्याकरणादिभ्यः भवति। तथाहि –

शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद् व्यवहारतश्च इति। व्याकरणतः विशिष्टतया धातुप्रत्ययादिपरिज्ञानं घटते। तथाहि उच्यते विश्वनाथेन न्यायसिद्धान्तमुक्तावल्यां – धातुप्रत्ययादीनां शक्तिग्रहो व्याकरणाद् भवति। धातवो भू-पच्-प्रभृतयः, प्रकृतिर्निपातरूपा, प्रातिपदिकरूपा च, प्रत्ययाः स्वादितिबादिविभक्तयस्तद्धिताख्यातकृतश्च, आदिना समासादिपरिग्रहः। उक्तञ्च, श्रीमत्पञ्चाननभट्टाचार्यशास्त्रिणा – भूसत्तायां वर्त्तमाने लडित्यादिव्याकरणात् सत्ताद्यर्थे भ्वादिधातोर्वर्तमानाद्यर्थे तिबादिप्रत्ययस्य समुच्चयाद्यर्थे चादि-निपातस्यैकत्वाद्यर्थे स्वादिप्रत्ययस्य शक्तिग्रहः।

एवं दृश्यते प्राचीनन्यायवैशेषिकग्रन्थेषु नव्यनैयायिकग्रन्थेषु पाणिनीयशब्दशास्त्रम् उपकारकम्। किञ्च, वस्तुतस्तु शास्त्रद्वयं हि परस्परसापेक्षम्। व्युत्पत्तिवादसारमञ्जरीकारकचक्रादिग्रन्थेषु परस्परसापेक्षत्वस्य चित्रं परिस्फुटम्। इह तु केवलं न्यायशास्त्रस्य व्याकरणापेक्षित्वं प्रदर्शितम् इति शिवम्।

**सहायकग्रन्थावली**


कणादः. १३१३ वङ्गाब्दः. *वैशेषिकदर्शनम्* (श्रीपञ्चाननभट्टाचार्यकृतपरिष्कारटीका-श्रीशङ्करमिश्रकृतोपस्कार-टीकोपेतम्). सम्पा॰ श्रीपञ्चाननभट्टाचार्यः. प्रका॰ श्रीनटवरचक्रवर्ती. वङ्गवासी इलेक्ट्रोमेसिन प्रेस ३८/२ भवानीचरण दत्त लेन. कोलकाता.

गौतमः. १९८४. *न्यायसूत्रम्* (वात्स्यायनभाष्यसहितम्) (उद्योतकरवार्तिकसहितम्).सम्पा॰ महामहोपाध्यायगङ्गानाथझा. मोतीलालवनारसीदासः, दिल्ली.

गौतमः. १९८५. *न्यायदर्शनम्* (वात्स्यायनभाष्यसहितम् उद्योतकरवार्तिकसहितम् विश्वनाथवृत्तिसहितञ्च). सम्पा॰ तारानाथन्यायतर्कतीर्थः अमरेन्द्रमोहनतर्कतीर्थः, मुन्सीराममनोहरलालपाब्लिशार्स् प्राइभेट् लिमिटेड.

नवदेहली.
न्यायपञ्चाननः, विश्वनाथः. १९५१. *कारिकावली* (मुक्तावली-दिनकरी-रामरुद्रीसमेता). सम्पा॰ हरिरामशुक्लः. चौखम्बा संस्कृत सीरिज आफिस, बनारस.
प्रशस्तपादाचार्यः. २०१०. *प्रशस्तपादभाष्यम्* (प्रथमो भागः). अनुवादादिकारकः दण्डीस्वामी दामोदराश्रमः. दामोदराश्रमः कलकाता.
राजेन्द्रनाथघोषः. १९८२. *व्याप्तिपञ्चक*. पश्चिमवङ्गराज्यपुस्तकपर्षत्, कलिकाता.

Received on 21. 03. 2017 Accepted on 17. 07. 2017

# NASADIYASUKTASAMIKSA
## (NASADIYASUKTA: AN ANALYSIS)

*Prof. Bhagirathi Biswas**

**ABSTRACT**

*"No country except India and no language except the Sanskrit can boast of a possession so ancient or venerable. No nation except the Hindus can stand before the world with such a sacred heirloom in its possessions, unapproachable in grandeur and infinitely above all in glory. The Vedas stand alone in their solitary splendour, serving as a beacon of divine light for the onward march of humanity". "HindhuSuperioty".*

*There are four Vedas, known as the Rig Veda, the Yajur Veda, the Sama Veda and the Atharva Veda. The Rig Veda is identified with the path of knowledge, the Yajur Veda with the path of action, and the Sama Veda with the path of devotion.*

*Rg Veda has ten Mandals. 1028 Suktas and 10552 Mantras are in ten Mandals of Rig Veda Samhita. 191 Sukata and 1754 Mantras are in the 10th Mandal. Sukta no 129 out of 191 is Nasadiyasukta. Many of the provisions of the Rig Veda are very scientific and pragmatic. In Rig Veda mythology, cosmology and religion are intermixed. In the tenth book (Mandalam) of Rig Veda, 129th Hymn (Suktam) deals with the origin of the universe and creation. There are Seven Mantras are in Nasadiyasukta.*

*The present paper is fully devoted to the discussion of the fundamental issues related to the creation of the Universe. The contemporary scientific issues related to the creation of universe by the scientist have drowned the attraction of the human society very much whereas the Vedic Rsis had already discussed this in ancient time long back. Thus it appears that the Nasadiyasukta of the Veda has paved the way to the scientist of the Morden world to look forward for the Big Bang theory. The Vedic Rsis have already been proposed the proposition of creation. This paper is fully engaged in the interpretation of all the Mantras of Nasadiyasukta which has finally lead to the power of Brahman.*

"No country except India and no language except the Sanskrit can boast of a possession so ancient or venerable. No nation except the Hindus can stand before the world with such a sacred heirloom in its possessions, unapproachable in grandeur and infinitely above all in glory. The Vedas stand alone in their solitary splendour, serving as a beacon of divine light for the onward

** Professor and Head, Department of Sanskrit, Assam University, Silchar*

march of humanity”. “HinduSuperioty”.

Thereare four Vedas, known as the Rig Veda, the Yajur Veda, the Sama Veda and the Atharva Veda. The Rig Veda is identified with the path of knowledge, the Yajur Veda with the path of action, and the Sama Veda with the path of devotion.

Rg Veda has ten Mandals. 1028 Suktas and 10552 Mantras are in tenMandals of Rig Veda Samhita. 191 Sukata and 1754 Mantras are in the 10thMandal. Sukta no 129 out of 191 is Nasadiyasukta. Many of the provisions of the Rig Veda are very scientific and pragmatic. In Rig Veda mythology, cosmology and religion are intermixed. In the tenth book (Mandalam) of Rig Veda, 129th Hymn (Suktam) deals with the origin of the universe and creation. There are Seven Mantras are in Nasadiyasukta.

The present paper is fully devoted to the discussion of the fundamental issues related to the creation of the Universe. The contemporary scientific issues related to the creation of universe by the scientist have drowned the attraction of the human society very much whereas the Vedic Rsishad already discussed this in ancient time long back. Thus it appears that the Nasadiyasukta of the RgVeda has paved the way to the scientist of the Morden world to look forward for the Big Bang theory. The Vedic Risishave already been proposed the proposition of creation. This paper is fully engaged in the interpretation of all the Mantras of Nasadiyasukta which has finally lead to the power of Brahman.

It is a “cosmology” hymn that seeks to explain the origin of creation. Briefly, it describes the chaos that preceded creation, when there was neither death nor immortality. From this chaos, the “One”, animated by its own impulse, breathed and came into existence. From the unfathomable depths of water, from the darkness of the cosmic void, emerged this spirit, animated by desire.

It goes on to say how the wise seers are able to perceive the kinship between being and non-being (that are separated merely by a thin line) by searching their heart for wisdom. They see the seminal powers that create the mighty, fertile forces.

Among the various Suktas of Rg Veda NasadiyaSukta has been most popular among the scholars. This sukta is also known as the creation Hymn. *Na asat* which is the root of the word *Nasadiya* means ‘not the nonexistent’.

NasadiyaSukta makes its own contribution to our understanding of the origin of the Universe. NasadayaSuktas contains seven mantras:

নাসদাসীন্নো সদাসীত্ তদানীং নাসীদ্ রজো নো ব্যোমাপরো যৎ ।
কিমাবরীবঃ কুহ কস্য শর্মন্নম্ভঃ কিমাসীদ্ গহনং গভীরম্ ।।১।।

[Rig Veda. 10, 129,1]

Before creation neither existence nor nonexistence was there
Neither matter nor space around
What covered it, where it was and who protected?
Why, that plasma, all pervading, deep and profound?

The *rsi*says that there was neither *sat* nor *asat*at that time, i.e. at the time of the creation of the universe. There was no space, nothing else were present. Then what covered on? Where? The deep primordial waters also were not there at that time.

At the time of the creation of universe the root cause which brings back the cosmic again cannot be named as 'asat' i.e. cannot be said to be non-existent because such thing cannot give rise to this universe. It cannot be called 'sat' also because nothing perceptible was present at that time. Actually author of the NasadiyaSukta is going to say that 'sat' and 'asat' both existed together.

The sage says that there were no space*(vyoman)* at that time. There was nothing to be covered or protected at that time and therefore no principle of envelopment existed. The word 'Kuha' means that there was no place to support to carry out the act of envelopment.

In this mantra it is said ina poetic fashion by questioning what covered on? Where? By the first question he tells that some matter was created at some point. He is indicating toward the concept of Big Bang (the Universe bean as an infinitely dens cosmic singularity that expanded explosively in the event called Big Bang). This also shows that space was created whichwas covered by some matter. Big Bang theory agrees with this view.

The word 'Ambhas' usually means water. The root ambha means to Sound. Hence *ambhas*should be taken as material producing sound. For that thing which originated in the space and which was very vast and unfathomable. The sage has *coined* a new word *ambhas.* Thus the word *ambhas*(sound producing matter) is scientific and appropriate. The sound that was created during Big Bang was the sound of *Om.*

In the first line of mantra the sage tells that there was nothing and inthe next line he questions what covered on. Thus poetically he suggested that formation of *ambhas* took no time.

In the second line of Mantra the sage puts the question "For whose shelter all this was prepared?" The sage did not know the answer so he has put forth his question to all the wise men. This question is still unanswered by the modern scientists.

ন মৃত্যুরাসীদমৃতং ন তর্হি ন রাত্র্যা অহন আসীৎ প্রকেতঃ ।
আনীদবাতং স্বধয়া তদেকং তস্মাদ্ধানন্ ন পরঃ কিং চনাস ।।২।।

The second mantra states that there was neither death, nor immortality. There was no indication of day or night. There was only that one breathing without air with its own energy. There was nothing else.

Breathing without air with its own energy ---Sayana takes Svadha as meaning Maya or Prakrti (Illusion or Nature), the source of the world of phenomena. He understands Sa 'breathed along with Maya'.

The Seer's statement that there was only one thing at the time of the birth of universe is accepted by all modern cosmologists. At the very instant of its creation, all matter and all four fundamental forces (gravitational force, electromagnetic force, nuclear force and weak interaction) were indistinguishable from each other.

The Rishi *(rsi)* says that there was only one primeval principle (MulaTattva) which breathed without air for the sake of creation. The *prana*is only an outward indication of the fact that the entire cosmos to be created is already within this *Mulatattva.* During creation it only comes out just like air comes out from the lungs when we breathe out.

In this Mantra sage says that there was neither death nor immortality. This statement is true because there was no sun and no earth so there was no indication of day or night. This is also correct because unless there is a planet, rotating and travelling around a sun, there cannot be any day or night.

তম আসীত্ তমসা গূঢ়মগ্রেঽপ্রকেতং সলিলং সর্বমা ইদম্ ।
তুচ্ছ্যেনাভ্বপিহিতং যদাসীত্ তপসস্তন্মহিনাজায়তৈকম্ ।।৩।।

Darkness there was: at first concealed in darkness all was indiscriminate chaos. All that existed then was void and formless: by the great power of warmth was born that unit.

There was darkness to begin with. There was something mysterious in the darkness. It was impossible to understand. It was all undulating matter *(Salil), Abhu*originated from the surrounding was wrapped by lighter material. It developed further due to might of heat.

কামস্তদগ্রে সমবর্ততাধি মনসো রেতঃ প্রথমং যদাসীৎ ।
সতো বন্ধুমসতি নিরবিন্দন্ হৃদি প্রতীষ্যা কবয়ো মনীষা ।।৪।।

Thereafter raisedesire in the beginning, desire the primal seed and germ of spirit. Seers who searched their heart for wisdom discovered the kinship between the being and non-being.

The great worldly desire comes from the minute, invisible unworldly seed of mind in the same way '*Sat* came from '*asat.* The learned with far reaching intelligence have recognized this fact after complete thinking in the mind and through scanning in their hearts.

In the first stage of creation there arose a desire in the mind of the almighty to create. The good deeds of being in the previous *kalpa*culminated in the form of a seed of the cosmos in the mind of the creator at the time of creation.

The learned after deep thought came to conclusion that all action associated with the observed cosmos have their origin in the discernible source. Now scientists start thinking that the facts of the Big Bang as they are slowly uncovered could suggest the work of a creator or creative force.

Science seems to have uncovered a set of laws that within the limits set by the uncertainty principle tells us how the universe will develop with time, if we now its state any time. The ultimate essence of the universe is space consciousness is but a condition of space. The content of the world is the distortion *(Vikara) or* desire of its container, consciousness space. The distorted 3-Dspace is *Sagun Brahma.* The space minus its *Vikara*or distortion (or desire) that is the unified field is *Nirgun Brahma. Brahman*-space is the ultimate reality underlying all existence.

তিরশ্চীনো বিততো রশ্মিরেষামধঃ স্বিদাসীদুপরি স্বিদাসীৎ ।

রেতোধা আসন্ মহিমান আসন্ত স্বধা অবস্তাৎ প্রযতিঃ পরস্তাৎ ।।৫।।

Their rays was stretched out, whether across, or below, or above; (some) were shedders of seed (others) were mighty; food was inferior, the eater was superior.

**Their ray was stretched out**---this, according to Sayana, refers to the suddenness of creation, which was developed in the twinkling of an eye, like the flash of the sun's ray. It was so quick, he continues, that it was doubtful whether the things in the central space (understood by the word' across') were created first, or those above or those below; in other words, creation took place simultaneously in all three portions of the universe. Sayana tries to reconcile this with the received notion of creation in a series (viz. that from *atma*came the *akasa*, and from the *akasa* the wind, from the wind fire etc,) (AtmanaAkasahSambhutaAkasatVayuhVayoragnih---Tai. Upa 8.1) by saying that this was the order in which things were created, but the development of the world was like a flash of lightning, so that the series could not be distinguished (Tat SristvaTadevanupravisat---Tai. Upa. 8.3).

Whether across, or below, or above---the word *tirascinah*, 'across', perhaps refers to the *tiryaksrotas*, 'that in which the stream of life is horizontal', i.e. the animal world. The epithets in the second line of the verse are unusual and obscure; according to Sayana, the meaning is that among the created objects some were living creatures, others were great, as the sky, etc. the

former being the enjoyers (bhoktarah), the later the things to be enjoyed (bhojyah),so the creation was distinguished as the food and feeder.

কো অদ্ধা বেদ ক ইহ প্র বোচৎ কুত আজাতা কুত ইয়ং বিসৃষ্টিঃ ।

অর্বাগ্দেবা অস্য বিসর্জনেনাথা কো বেদ যত আবভূব ।।৬।।

Who knows and who can say, whence it was born and whence came this creation? The Gods are later than this world's creation. Who knows then whence it first came into being?

The quality of an eternal mystery of the cosmos is brought out in 6th mantra of Nasadiya Sukta of Rig Veda. In this mantra Risi says it is very difficult for anybody to say exactly how all that we see around us came into being. He says that he is well aware of the complexity of the problem.

ইয়ং বিসৃষ্টির্যত আবভূব যদি বা দধে যদি বা ন ।

যো অস্যাধ্যক্ষঃ পরমে বোমন্ত্ সো অঙ্গ বেদ যদি বা ন বেদ ।।৭।।

Who knows whether this universe is supported by the creator or not? Does He who is the highest authority of the universe and who is in the super space know it definitely or not?

The sage tells here that universe is supported by its creator. Here sage suggest that probably that superior power knows how the universe is created and then he raised suspicion whether this is the final authority or is there anyone else superior still. Expressions of such doubts are very common among Vedic seers. They were earnest seekers of truth.

The science has pointed very clearly in the direction of the Big Bang creation of the universe, but the cause of the Big, Bang still remains very much enigma. The philosophers have often concluded that there must be a 'first uncaused cause' and this they have identified with God. The Big Bang theory of the beginning of the universe seems at first sight to satisfy their proof. Scientific explanations come to an end, provided a God gives opportunity to ascribe the universe to a transcendent cause. A cosmologist can say nothing about transcendent causes.

It is fact that the Vedas are the complete Science or Vijnana in the real sense containing both the *para*and *apara*vidya. The belief has tempted the presenter to decipher the knowledge of various kinds from the Vedas by applying different methods. Of course, these methods mayor may not be the right keys in extracting the knowledge from the Vedas, but these must be considered, to be basic steps towards finding the right key for proper utilization of treasure in the Vedas.

## Conclusion

The NasadiyaSukta ends with a rather startling refrain. "After all, who really knows what happen and who can presume to tell it? What is the origin of creation? For, even the Gods themselves are younger than it. He whether he created it or did not, He who surveys it all from the highest heaven, He knows- or maybe even he does not!"

Thusit appears that even the Supreme Being may ignorant of the mystery of creation, makes it rather unique among the creation songs. There are many commentaries that attribute a mass deeper significance to this hymn and explain each term in great detail but some of them use really creative interpretation of the words to arrive at their conclusions. Therefore, scientists are trying to discover the cause of creation or source of creation, which is also falling in the line of the NasadiyaSukta and the inner meaning of thissukta leads to the conception of creation of the universe is the intention of the absolute Brahma. And that absolute Brahma can be denoted as Nad Brahma. The modern science is saying the same thing what Rg Veda declared earlier.

## Reference

Vedas, The Source of Ultimate Science. Dr. Shri Ram Verma, Nag Publishers 11A/U.A Jawahar Nagar, Delhi-110007,India, 2005.

RgvedaSamhita,vol 4,mandala-9,10. Edited by RaviprakashArya K.L. Joshi, Parimal Publications Delhi, Second Revised Edition 2001.

VederPorichoy, Dr. JogirajBasu, Farma K.L.M. Pvt., Kolkata,1980.

India of The Age of The Brahmanas, Jogirajbasu, Sanskrit Pustak Bhandar,38BidhanSarani, Calcutta-6.

Saral jog Sadhan, Sri SriPurnandaBrahamachari, Girija 22/C, College raw Calcutta-700009, 2009.

Veda, RikvedaSamhita, PrthomKhonda, Sri HarimayBandapadya, HarafPrakashini, A-126 College Striate market, Calcutta 7, duralapani,316208, Second edition 1987.

www.academia.edu
www.vedaravindamu wordpress.com
www.apamnapat.com
www.asabharwal.com

Received on 12. 04. 2017 Accepted on 17. 07. 2017

# भारतीयशास्त्रेषु जल्पस्वरूपम्

खोकन-भट्टाचार्य्यः*

भारतीयशास्त्रानुसारं विचारः कथाशब्देनोच्यते। तथाहि वार्तिककारेणोक्तम् "तत्र विचारो वादो जल्पो वितण्डा"इति। सा कथा कुत्रचित्संभाषा शास्त्रार्थं वेत्यनेनाभिधीयते। नैष कथाशब्दो गद्यविशेषवाचकः, अपि तु न्यायादिशास्त्रस्य पारिभाषिक एव। न्यायनये कथात्वं नाम वादजल्पवितण्डान्यतमत्वमिति। तथाहि भाष्यकारः आह –"तिस्रः कथा भवन्ति, वादो जल्पो वितण्डा च"इति। अपिच द्यूतिमालिकाटीकायां नृसिंहयज्वनः अनुरूपं कथयति कथात्वं वादजल्पवितण्डात्वविशिष्टत्वमिति। तन्मते "वादिप्रतिवादिनोः पक्षप्रतिपक्षपरिग्रहः कथे"ति। यत्र वादी पक्षं तथा प्रतिवादी प्रतिपक्षमाश्रित्य परस्परं परपक्षदूषणं स्वपक्षसाधनं च कुरुतस्तत्र कथा भवति। अतः पक्षप्रतिपक्षसाधन- दूषणपरिग्रह एव कथा इति वक्तुं शक्यते। कथायाः साफल्यञ्च वाक्यविशेषप्रयोगेणैव स्यादिति वाक्यविशेषनिरूपणान्तम् अवयवनिरूपणान्तं कथा इत्यपि वक्तुं युज्यते कथायाः अवयवसाध्यत्वात्। तत्त्वनिर्णयप्रयोजकः साधकदूषकवचनसमूहो वा कथा। न्यायसूत्रवृत्तिकारो विश्वनाथः कथयति –"तत्र तत्त्वनिर्णयविजयान्यतरस्वरूपयोग्यन्यायानुगत-वचनसन्दर्भः कथा" इति। न्यायकोशे चोक्तं भीमाचार्य्यझाल्किकारेण सन्दिग्धविषये प्रत्यक्षादिप्रमाणैः तत्त्वनिर्णयप्रयोजको वाक्यसमूहः कथेति। तात्पर्यटीकायाञ्चोक्तम् - "नानाप्रवक्तृकविचारविषया वाक्यसंदृब्धिः कथा।" इति।

न्यायसम्मतवादादित्रिविधकथासु जल्पो हि मध्यमो विजिगीषुकथारूपः। तत्र जल्पाख्यं कथायां बुद्धिपूर्वकं छलजातिनिग्रहस्थानप्रयोगपुरःसरं वादिप्रतिवादिनोः पुरुषयोः जयपराजयौ स्तः। तदुक्तं हि भट्टपादेन न्यायमञ्जर्य्याः आदिमे आह्निके अभिधेयस्वरूपवर्णनकाले – "विजिगीषुकथा पुरुषशक्तिपरीक्षणफलो जल्पः।" इति। वादे तु तत्वनिर्णय एव फलम्। तत्र उभययोरपि पक्षिणोः कस्यापि मनसि विजिगीषा न तिष्ठति। किन्तु अत्र जल्पे उभावेव पक्षौ वादिप्रतिवादिनौ हेत्वाद्युपस्थापनद्वारा परमतखण्डनपूर्वकं स्वमतं साधयितुं चेष्टेते। अतो मिश्रपादेन वादिविनोदाख्ये प्रबन्धे जल्पलक्षणमालोचितम् – "उभयपक्षसाधनवती विजिगीषुकथा जल्प इति लक्षणम्।" (पृ. १२) इति। वस्तुतस्तु मिश्रपादकृते जल्पलक्षणे 'उभयपक्षसाधनवती'ति पदेन वितण्डायाम् अतिव्याप्तिर्निवारिता। वितण्डायां वैतण्डिकः स्वपक्षं न साधयति, अपि तु अपरपक्षस्य दोषं दर्शयति। अतस्तत्र विजिगीषुकथायां उभयपक्षसाधनचेष्टा न तिष्ठतीति ज्ञेयम्।

इदानीं तावत् गौतमीये न्यायसूत्रे किमुक्तं जल्पलक्षणं तद्द्रष्टव्यम्। तथा च न्यायसूत्रम् –"यथोक्तोपपन्नच्छलजातिनिग्रहस्थानसाधनोपलम्भो जल्पः। इति (१.२.२)।अत्र 'जल्प' इति लक्ष्यनिर्देशः। यथोक्तोपपन्नेत्यादिना च लक्षणनिर्देशः विहितः। तथा हि भाष्यम् – "यथोक्तोपपन्न इति प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धःपञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहः।" इति। वार्तिककारोऽपि आह –"समस्तं वादलक्षणं छलजातिनिग्रहस्थानसाधनोपालम्भश्च जल्पः।" इति। ए

तथा हि वादवत् जल्पोऽपि प्रमाणतर्कोपालम्भः सिद्धान्ताविरुद्धः पञ्चायवयवोपपन्नः पक्षप्रतिपक्षपरिग्रहः स्यादिति यथोक्तोपपन्नपदेनैवोपपादितम्। किन्तु तत्रायं विशेषः यत् छलादिनिग्रहस्थानैः साधनमुपालम्भश्च क्रियते इति। यथोक्तोपपन्न इति वादसूत्रे यो निग्रहस्थानविशेषनियमः कथितः, सोऽत्र नोच्यते, जल्पे सकलनिग्रहस्थानप्रयोगसम्भवात्,

* पि. एइच्. डि शोधकर्ता, पश्चिमबङ्गराज्यविश्वविद्यालये

तादृशनियमासम्भवाच्चेति वार्तिककारमतिः। वाचस्पतिमिश्रेणापि व्याख्यातं जल्पसूत्रे यथोक्तोपपन्न इत्यनेन वादसूत्रस्थितशब्दलभ्योऽर्थो ग्राह्यः। सूत्रोक्तं यद् द्वितीयं पदम् – 'छलजातिनिग्रहस्थानसाधनोपालम्भः' इति, तस्यार्थः स्पष्टीकृतस्तावत् भाष्ये – "छलजातिनिग्रहस्थानैः साधनोपालम्भश्चास्मिन् क्रियते इति एवं विशेषणो जल्पः।" इति।

ननु वादस्य तत्त्वनिर्णयार्थत्वात् मोक्षशास्त्रेऽस्ति प्रयोजनम्, किन्तु जिगीषोपेतस्य जल्पस्य किं प्रयोजनमिति चेन्न, मुमुक्षोरपि क्वचित् प्रसङ्गे तदुपयोगात्। यदि रहस्यतत्त्वोपदेशसमये कुतश्चित् कोऽपि आगत्य कमपि मोक्षप्रतिकुलं सिद्धान्तम् उपस्थापयति, तदा छलादिप्रयोगेण जल्पेनाचार्येण तद्विघ्न आशु शमयितव्यः। नोचेत् शिष्याणां मतिभ्रमोऽपि क्वचित् भवितुमर्हत्येव। अतो महर्षिणा गौतमेनोक्तम् अङ्कुररक्षार्थं यथा कण्टकशाखावरणं कर्तव्यम्, तथैव तत्त्वरक्षार्थं जल्पवितण्डारूपं कथाद्वयम् अवश्यमेव विधातव्यम्। तथा च सूत्रम् –"तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत्।" इति (४।२।५०)।

पूर्वमेवोक्तं यत् आयुर्वेदशास्त्रे सन्धायसंभाषा न्यायनये वादः। अपि च आयुर्वेदस्य विगृह्यसंभाषा न्यायस्य जल्पवितण्डारूपा। ते च जल्पवितण्डे अत्र वादशब्देनाभिहिते। इदानीं किं तावत् विगृह्यसंभाषालक्षणमुक्तं महर्षिणा चरकेण तद् द्रष्टव्यम् –

"तत्र वादो नाम स यत् परः परेण सह शास्त्रपूर्वकं विगृह्य कथयति। स च द्विविधः संग्रहेण जल्पो वितण्डा चेति।" इति (२७.८)।

यत्र एकः अपरेण सह संभाषायां शास्त्रपूर्वकं परस्परं विगृह्य कथयति, सा विगृह्यसंभाषा भवति। लक्षणे शास्त्रपूर्वकमितिशब्दयोगे अर्थादिकलहवादनिषेधः कृतः। अपि चात्र विगृह्यसंभाषारूपत्वात् छलजातिनिग्रहस्थानानां विजिगीषाप्रवृत्तानां प्रयोगः स्वीकृतः। इह वादशब्देन विगृह्यवादोऽभिप्रेतः, तत्त्वबुभुत्सुवादस्तु सन्धायसंभाषयैवोक्तः। – आ. दी.

आयुर्वेदशास्त्रे जल्पलक्षणमुक्तं तावत् –"तत्र पक्षाश्रितयोर्वचनं जल्पः" इति (वि ८।२८)। पक्षाश्रितयोर्नाम पक्षं साधयतोरित्यर्थः। जल्पे वादिप्रतिवादिनः स्वस्वपक्षं हेतूपस्थापनद्वारा साधयतः। यथा एकस्य पक्षः पुनर्भवोऽस्तीति, पुनर्भवो नास्तीति अपरस्य पक्षः। इदानीं तौ वादिप्रिवादिनौ च स्वस्वपक्षहेतुभिः स्वस्वपक्षं स्थापयतः, परपक्षञ्च उद्भावयतो जल्पे।

लक्षणे यः परशब्दः निविष्टः, तस्य तात्पर्यमप्यत्रावधेयम्, समप्रवरप्रत्यवरभेदेन परस्त्रिविधो गुणपरिमाणतारतम्यात्। आद्यपेक्षया समगुणवान् परः समः, उत्कृष्टगुणवान् प्रवरः, हीनगुणश्च प्रत्यवर इति ज्ञेयम्। समप्रवरादिभेदस्तु अवश्यमेव संभाषोपयोगिकगुणान् अपेक्षते। न तु कुलशीलधर्मादिभिस्तेषां प्रवरादिभेदः अभिप्रेतः। अतः उक्तम् – "तत्र त्रिविधः परः सम्पद्यते – प्रवरः प्रत्यवरः, समो वा,गुणविनिक्षेपतः, नत्वेव कार्त्स्न्येन।" इति। (वि.८।१९)।

यत्र सभायां परिषदि वा विगृह्यसंभाषा भवति, सा द्विविधा ज्ञानवती मूढपरिषच्च। सा च कारणविभागेन पुनस्त्रिविधा – सुहृत्परिषत् उदासीनपरिषत् प्रतिनिविष्टपरिषच्चेति। ज्ञानिजनानां परिषत् ज्ञानिजनसमृद्धा परिषद्वा ज्ञानवती परिषत्। तत्रैव विगृह्यसंभाषा विधीयते। यत्र तु मूढानां परिषत् मूढजनसंकुला परिषत् तत्र क्वचिद् विगृह्यसंभाषा कर्तव्या। एवञ्च प्रतिनिविष्टपरिषदि तादृशसंभाषा निषिद्धा। प्रतिकुलत्वेन निविष्टाः सभ्या यत्र सा प्रतिनिविष्टपरिषत्, शत्रुपरिषदित्यर्थः कृतः योगीन्द्रनाथसेनमहाभागेन। तथा चाकलितं चरकसंहितायाम्–"तत्र प्रतिनिविष्टायां परिषदि ज्ञानविज्ञानवचनप्रतिवचनशक्तिसम्पन्नयां

मूढायां वा न कथञ्चित् केनचित् सह जल्पो विधीयते। मूढायान्तु सुहृत्परिषद्युदासीनायां वा ज्ञानविज्ञान वचनप्रतिवचनशक्तीरन्तरेणाप्यदीप्तयशसा महाजनविशिष्टेनापि सह जल्पो विधीयते।" इति (वि.।८।२०)।

अत्रेदमवधेयं न सर्वैः अपरैः सह विगृह्यसंभाषा कर्तव्या। केचित् श्रेयसा सह वादं प्रशंसन्ति। किन्तु ग्रन्थकारमते श्रेयसा विग्रहं न प्रशंसनीयम्। अतः आह –

"श्रेयसा सह विगृह्य वक्तव्यमित्याहुरेके।
नत्वेवं ज्यायसा सह विग्रहं प्रशंसन्ति कुशलाः।।" इति (वि.।८।२०)।

वस्तुतः ज्यायसा सह विग्रहं पराजयस्य नामान्तरमेव अतः ग्रन्थकारेण तन्न प्रशंसितम्। अपरतः तन्मते प्रत्यवरेण समेन वा सह सुहृत्परिषदि विगृह्यसंभाषा विहितैव। उदासीनपरिषदि तु परस्य साद्गुण्यदोषबलादिकं समवेक्ष्य, श्रेष्ठं मन्येत चेत् तेन जल्पं न कुर्य्यात्। अवरं मन्येत चेत् एनमाशु निगृह्णीयात्। तदुक्तम् – "यत्रेनं श्रेष्ठं मन्येत नास्य तत्र जल्पं यो जयेदनाविष्कृतमयोगंकुर्वन्, यत्र त्वेनमवरं मन्येत तत्रैवेनमाशु निगृह्णीयात्।" इति (वि.।८।२१)।

तत्र च कथं प्रत्यवराणामाशु निग्रहं स्यादित्यपि निगदितम् – "तत्र खल्विमे प्रत्यवराणामाशु निग्रहे भवन्त्युपायाः। तद्यथा – श्रुतहीनं महता सूत्रपाठेनाभिभवेत्, विज्ञानहीनं पुनः कष्टशब्देन वाक्येन, वाक्यधारणाहीन माविद्धदीर्घसूत्रसंकुलैर्वाक्यदण्डकैः, प्रतिभाहीनं पुनर्वचनेनैकविधेनानेकार्थ-वाचिना, वचनशक्तिहीनमर्धोक्तस्य वाक्यस्याक्षेपेण, अविशारदम् अपत्रपणेण, कोपनमायासनेन, भीरुं वित्रासनेन अनवहितं नियमनेनेति। एवमेतैरूपायैः परमवरम् अभिभवेच्छीघ्रम्।" इति (वि.।८।२१)।

अत्र श्रुतहीनो हि अपरिचयाद्दीर्घसूत्रपाठे अक्षम एव। विज्ञानहीनः अज्ञातार्थः। स च कष्टशब्देन निगृहीतः स्यात्। वाक्यधारणाहीनञ्च दीर्घसूत्रसंकुलवाक्यं बोद्धुमशक्तः। प्रतिभाहीनो हि अनेकार्थवाचिशब्दप्रयोगात् अनेकार्थं नावधारयतीति यत्केनाभिप्रायेण अनेनायं शब्दः प्रयुक्त इति। वचनशक्तिहीनो खलु अर्धोक्तवाक्याभ्रयान्न पुनर्वक्तुं क्षमः स्यात्। अविशारदः अदृष्टसभः। अपत्रपनेन लज्जितः सन् किञ्चिन्न प्रतिपद्यते। एवञ्च कोपनस्वभाव आयासनेन क्रुद्धः सन्, भीरुजनः त्रासद्वारा भीतः सन्, अनवहितो नियमनेन च नियमितः भुत्वा पराजयं लभन्ते। तथा हि श्लोकः तत्रैव चरकसंहितायाम् –

" विगृह्य कथयेद्युक्त्या युक्तं च न निवाययेत्।
विगृह्यभाषा तीव्रं हि केषाञ्चिद् द्रोहमावहेत्।।
नाकार्यमस्ति क्रुद्धस्य नावाच्यमपि विद्यते।
कुशला नाभिनन्दन्ति कलहं समितौ सताम्।।" इति।(वि.।८।२२,२३)।

वादमार्गज्ञानार्थं भिषग्भिः ये तावन्तः विषयाः ज्ञेयाः, तेषां विषयाणामुल्लेखः कृतः महर्षिणा चरकेण। तथा चोक्तम् – "इमानि तु खलु पदानि भिषग्वादमार्गज्ञानार्थमधिगम्यानि भवन्ति। तद्यथा – वादः, द्रव्यं, गुणाः, कर्म, सामान्यः, विशेषः, समवायः, प्रतिज्ञा, स्थापना, प्रतिष्ठापना, हेतुः, दृष्टान्तः, उपनयः, निगमनम्, उत्तरम्, सिद्धान्तः, शब्दः, प्रत्यक्षम्, अनुमानम्, ऐतिह्यम्, औपम्यम्, संशयः, प्रयोजनम्, सव्यभिचार?, जिज्ञासा, व्यवसायः, अर्थप्राप्तिः, सम्भवः, अनुयोज्यम्, अनुयोगः, प्रत्यनुयोगः, वाक्यदोषः, वाक्यप्रशंसा, छलम्, अहेतुः,

अतीतकालम्, उपालम्भः, परिहारः, प्रतिज्ञाहानिः, अभ्यनुज्ञा, हेत्वन्तरम्, निग्रहस्थानम्” इति (विमान.।८।२८)। एते चतुश्चत्वारिंशत्संख्यकाः विषयाः वादमार्गज्ञानार्थं भिषग्भिरवश्यमेव ज्ञातव्याः। एतेषां ज्ञानं विहाय कोऽपि भिषग् वादमार्गं प्रवेष्टुं न पारयति, प्रविष्टश्चेत् तस्याशु पराजयः भवतीति निश्चयः।

उल्लिखितेषु एतेषु चतुश्चत्वारिंशद्विषयेषु केचन न्यायवैशेषिकसम्मताः द्रव्यादयः पदार्थाः। केचिच्च न्यायमतानुयायिनः प्रत्यक्षप्रमाणादयः षोडशपदार्थान्तर्गताः। केचित्तु आयुर्वेदस्य विशेषा ऐतिह्यादयः। अत्र तु सन्दर्भे आयुर्वेदस्य वादमार्गज्ञानसहायकत्वेन विशेषाणामेव किञ्चिद् आलोचनं विहितम्। अन्यत्तु न्यायादिशास्त्रे द्रष्टव्यम्।

न्यायशास्त्रे तथायुर्वेदशास्त्रे विजिगीषुकथारूपो जल्पः स्वीकृतः। किन्तु बौद्धशास्त्रे न्यायसम्मतो जल्पो नाङ्गीकृतः। तत्र विजिगीषुवादः निषिद्ध एव तस्य कलहप्रवर्धकत्वात्। तथाहि उक्तं वादन्याये –“तस्मान्न योगविहितः कश्चित् विजिगीषुवादो नाम। परानुग्रहप्रवृत्तास्तु सन्तो विप्रतिपत्तिं प्रतिपादयन्तो न्यायमनुसरेयुः सत्साधनाभिधानेन भूतदोषोद्भावनेन वा।” इति।

वादे छलादिप्रयोगनिषेध एव कृतः, छलादेरसदुत्तरत्वात्। तथाहि वादन्याये कथितम् –

“छलव्यवहारोऽपि विजिगीषुणां वाद इति चेन्न, दुर्जनविप्रतिपत्त्यधिकारः सतां शास्त्रप्रवृत्तेः। न हि परानुग्रहप्रवृत्ता मिथ्याप्रलापारम्भात् सोत्कर्षपरविपंसनादीन् असद्व्यवहारानुपदिशन्ति। न च परविपंसनेन लाभसत्कारश्लोकोपार्जनं सतामाचारः।” इति।

आर्हता अपि अनुरूपं कथयन्तो वादे छलजातिनिग्रहस्थानानां प्रयोगं न स्वीकुर्वन्ति। तथाहि उक्तं प्रमाणमीमांसायाम् – “असदुत्तरैः परप्रतिक्षेपस्य कर्तुमयुक्तत्त्वात्, न ह्यन्यायेन जयं यशो धनं वा महात्मानः समीहन्ते” इति (२।१।३०) ।

वस्तुतस्तु सौगतास्तथा जैनाः अहिंसावादिनः। न्यायसम्मते जल्पे छलजातिनिग्रहस्थानानां सुवात्, तत्र विवादशङ्कया ते तादृशं जल्पं निषेधयन्ति। तथाहि परमकारुणिकस्य बुद्धदेवस्योपदेशः –

“अहिंसका ये च मुनयो निच्चं कायेन संवुता।
ते यन्ति अच्चुतं ठानं यथ्थ गन्त्वा न सो चरे।। इति (धम्मपद २२५)।
“सव्वे सत्ता अवेरितो होन्तु मा वेरिणो।
सुखिनो होन्तु मा दुक्खिनो।।” (बौद्धसूक्त)।

अहिंसाविषये चोक्तं परमार्थसिद्ध्युपायग्रन्थे –

“अप्रादुर्भावः खलु रागादीनां भवत्यहिंसेति।
तेषामेवोत्पत्तिर्हिंसेति जिनागमस्य संक्षेपः।।” इति (४४)।

ज्ञानी कदापि हिंसां न करोति। अहिंसैव सर्वधर्मसाररूपेति उक्तं सूत्रकृताङ्गसूत्रे –

“एवं खु नाणिणो सारं जं न हिंसा किञ्चण।
अहिंसा समयं चेव एतावंतं वियाणिया।।” इति(१।१।४।१०)।

ननु बौद्धजैनसम्प्रदाये जल्पो नाङ्गीकृतः, तेषामहिंसाधर्ममूलत्वात् इति चेत् न्यायादिसम्प्रदायाः किं हिंसकाः यस्मात् ते जल्पं पृथक् पदार्थत्वेनाकलयन्ति इत्यापेक्षो जायते। तत्रोच्यते न, न्यायाचार्यादयोऽपि अहिंसकाः, जल्पवितण्डास्वीकारस्तेषां तत्त्वसंरक्षणार्थमेव। तथा च न्यायसूत्रम् –“तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत्।” इति (४।२।५०)।

यदा प्रबलैः प्रतिपक्षैः तत्त्वज्ञानहानिः अनिवार्या तत्र छलादिप्रयोगद्वारा जल्पेन वादी तं निराकरोति। न हि सर्वत्र जल्पादेः प्रयोगः भवति। अपि तु धर्मरक्षणाय उपायान्तराभावात् तेषां प्रयोगः अवश्यं कर्तव्यः। उदाहरणत्वेन एतत् वक्तुं शक्यते यत् महाभारते कुरुक्षेत्रस्य युद्धे तु हिंसा जाता। अहिंसकं युद्धं तु न सम्भवेत्। किन्तु तत्र धर्मरक्षणाय युद्धमिदं अत्यावश्यकीयम् आसीत्। अतस्तत् युद्धं धर्मयुद्धमित्यनेन प्रसिद्धम्। तस्माच्च धर्मरक्षार्थं कृता हिंसा न दोषाय।

अत्र तु छलादिप्रयोगेन हिंसा न भवत्येव। जल्पे वादी प्रतिवादी च उभयौ छलादिज्ञानवन्तौ भवतः। तौ च क्रोधादिरहितौ। अतः कथामाध्यमेन जयपराजयौ चेत् कुतः तयोर्विवादः। यः खलु जल्पे पराजितो सन् क्रुद्धो भवति, स अभिमान्येव, स च न जल्पाधिकारी। यतो हि उक्तं कथाधिकारिविषये वादिविनोदे – " ते हि तत्त्वनिर्णायार्थिनो विजयार्थिनः सर्वजनीनानुभवसिद्धान्तानपलापिनः श्रवणादिपटवोऽकलहकारकाः..." इति। अतस्तत्त्वसंरक्षणाय सौगतार्हताभ्यामपि न्यायदर्शितः मार्गोऽनुसरणीयः।

किञ्च यत्र कथायां न्यूनादीनि निर्दिष्टानि निग्रहस्थानानि प्रयुज्यन्ते स वादः। यत्र च सर्वाण्येव निग्रहस्थानानि आपतन्ति स जल्पः इति वादजल्पयोर्भेदः। अपि च विजिगीषासत्त्वासत्त्वभेदेऽपि वादाद् जल्पो भिद्यते इति ज्ञेयम्। अतः जल्पो न वादान्तर्गतः इति निश्चितम्।

न्यायमते जल्पे विजिगीषा विद्यते। बौद्धमते च वादे जयपराजयव्यवस्थादर्शनात्, तत्र विजिगीषा वर्तते इत्यपि निश्चितम्। अपि च न्यायबौद्धमतयोः उभयत्र वादे तत्त्वनिर्णयः भवतीति सर्वसम्मतम्। तेन च वक्तुं शक्यते यत् न्यायसम्प्रदायस्य वादजल्पयोः साकल्येन गृहीत्वा बौद्धा वादस्वरूपं स्वकीयं कथयन्ति। जल्पस्य वैशिष्ट्यद्वयं वर्तते जिगीषावत्त्वं छलादिप्रयोगयोग्यत्वञ्चेति। मुख्यन्तु आद्यं वैशिष्ट्यम्। वादी प्रतिवादी वा छलादिप्रयोगं विहायापि हेत्वाभासादिप्रयोगेन जेतुं शक्यः। अतः केषाञ्चित् निग्रहस्थानानां प्रयोगम् अस्वीकृत्यापि बौद्धास्तथा जैनाः जल्पं स्वीकुर्वन्ति पारोक्ष्येणेति अवगन्तव्यम्।

**ग्रन्थसूची**


1. अमरकोषः, गुरुनाथविद्यानिधिभट्टाचार्यः, संस्कृत पुस्तक भाण्डार, कलिकाता, २०००।
2. उपायहृदयम्, नागार्जुनः, संगणकीकृतम् बौद्धसंस्कृतत्रिपिटकम् (डिजिटल् सांस्कृत् बुद्धिस्ट् क्यानन्)।
3. कथाकोशः, प्रभाचन्द्रः, सं- ड. ए. एन. उपाध्ये, भारतीयज्ञानपीठ, न्यु दिल्ली, १९७४।
4. कारिकावली, विश्वनाथन्यायपञ्चाननः, सं- हरिरामशुक्लः, चौखाम्बासंस्कृतसंस्थानम्,वाराणसी, १९९७।
5. चरकसंहिता आयुर्वेददीपिकासमेता, अग्निवेशः, कृष्णदास अकादेमी, वाराणसी,२००६।
6. न्यायकुमुदचन्द्रः, प्रभाचन्द्रः, सं- महेन्द्रकुमारन्यायाचार्यः, श्री जैन संस्कृति संरक्षक संघ, शोलापुर।
7. न्यायकोशः, महामहपाध्यायः भीमाचार्यः झाल्कीकरः, दि भान्डार्कर अरियेन्टाल् रिसर्च इन्स्टिटियुट्, पुना, १९२८।
8. न्यायदर्शनम्(प्रथमखण्डः),गौतमः, सं- फणिभूषणतर्कवागीशः, पश्चिमबङ्गराज्य -पुस्तकपर्षत्, कलिकाता, १९७१।
9. न्यायदर्शनम्(चतुर्थखण्डः),गौतमः, सं- फणिभूषणतर्कवागीशः, पश्चिमबङ्गराज्य -पुस्तकपर्षत्, कलिकाता, १९८९।
10. न्यायदर्शनम्(वृत्तिभाष्यवार्तिकतात्पर्ययुतम्), गौतमः, सं- तारानाथ -न्यायतर्कतीर्थः, एम्. मनहरलाल

पावलिशरस्, न्यु दिल्ली, २००३।
11. न्यायदर्शने निग्रहस्थान, रत्ना दत्तशर्मा, यादवपुर विश्वविद्यालय, कलिकाता, २०११।
12. न्यायपरिशुद्धिः,उदयनाचार्य्यः, सं- अनन्तलालठाकुरः, मिथिला इनस्टिटिउट्,१९६१।
13. न्यायरत्नम् (द्युतिमालिकाटीकायुतम्), मनिकण्ठमिश्रः, गभर्नमेन्ट अरियेन्टाल् म्यनुस्कृप्टस् लाइब्रेरी, माद्रास्, १९५३।
14. न्यायमञ्जरी(३), जयन्तभट्टः, गौरीनाथ शास्त्री, सम्पुर्णानन्दसंस्कृत- विश्वविद्यालयः, वाराणसी, १९८४।
15. परीक्षामुखम् (प्रमेयरत्नमालायुतम्), माणिक्यनन्दी, हिन्दी ग्रन्थ कार्यालय, मुम्बइ, १९९०।
16. प्रमाणमीमांसा, हेमचन्द्रः, सं- जिनविजयमुनिः, सिंघी जैन ज्ञानपीठ, कलिकाता, १९३९।
17. प्रमेयकमलमार्तण्डः, प्रभाचन्द्रः, सं- महेन्द्रकुमारन्यायाचार्यः, निर्णयसागर प्रेस, मुम्बइ, १९४१।
18. पार्श्वनाथचरितम्, सकलकीर्तिः, पी. वीर प्रेस्, जयपुर, राजस्थान।
19. बौद्ध-दर्शन, बलदेवः उपाध्यायः, काशी, १९४६।
20. मध्यमकशास्त्रम्, नागार्जुनः, मिथिलाविद्यापीठम्, दारभाङ्गा,१९६०।
21. वादन्यायः,धर्मकीर्तिः, सं- राहुलसंकृत्यायनः, दि विहार एन्ड औरिशा रिसर्च सोसाइटि, पाटना, १९३६।
22. वादिविनोदः,शङ्करमिश्रः, सं- गङ्गानाथझा, इन्डियान् प्रेस्, प्रयाग, १९१५।
23. वैशेषिकसूत्रम्, कणादः, सं- पञ्चाननतर्करत्नः, कलिकाता, १३१३।
24. शब्दकल्पद्रुमः, राजाराधाकान्तदेववाहदुरः, चौखाम्बा संस्कृत सिरिज, वाराणसी,२००१।
25. सर्वदर्शनसंग्रहः (दर्शनाङ्कुरव्याख्यासमेतः), सायणमाधवाचार्यः, निर्णयसागर प्रेस, मुम्बइ, १९२४।
26. The Dhammapada, with Bengali Trans.,DharmadharMhasthavir, BauddhaDharmankurSabha, Calcutta, 1958.
27. Krishna, D., Discussion and Debate in Indian Philosophy, Delhi, 2004.

Received on 20. 04. 2017 Accepted on 17. 07. 2017

# CONTRARIES IN THE COMMENTARIES ON THE GITA

**Kaushik Acharya** *
**Dr. Kiriti Sengupta****

A commentary is a bunch of critical notes about a particular text that demands and deserves detailed explanation. Commentaries on the Sanskrit text are an age-old tradition that needs contemplation. Here "commentary" does not imply "literal translation" into other languages; a commentary can be referred to as an "explanation," "interpretation" or "exegesis" of the original Sanskrit text in the light of the philosophy or understanding of the commentators involved. But then, commentaries on the Sanskrit text have often created confusion among scholars and readers, and thus, the commentators have often created their exclusive lineage of followers. *The Gita* has been interpreted by many scholars, saints and monks down the ages. One considers another wrong or bad. One interpretation invites another, and it has been observed that what once had been considered "proper," has later been criticized as a misinterpretation. Our study centers around the commentaries on *The Gita*, which has been described as "*Brahmavidya*" by the editor(s) of *The Mahabharata*.

**About *The Mahabharata* and *The Gita***

Traditionally, the authorship of *The Mahabharata* is attributed to sage *Vyasa*. There have been many attempts to explore its historical growth and compositional layers. The oldest preserved parts of the text are thought to be not much older than around 400 BCE, though the origins of the epic probably fall between the 8th and 9th centuries BCE. The text probably reached its final form by the early Gupta period (c. 4th century CE). The title may be translated as "the great tale of the *Bharata* dynasty." According to *The Mahabharata* itself, the tale is extended from a shorter version of 24,000 verses, called simply *Bharata*.

*The Bhagavad Gita*, often referred to as simply *The Gita*, is a 699-verse scripture in Sanskrit that is an integral part of *The Mahabharata* [chapters 25–42 of the *Bhisma Parva*, which is the 6th segment of *The Mahabharata*). *The Gita* is set in a narrative framework of a dialogue between *Pandava* prince *Arjuna* and his guide and charioteer,

* Ph.D research Scholar, Jadavpur University
** Chief Editor, Ethos Library Journal

*Lord Krishna*. Facing the duty as a warrior to fight the *Dharma Yudhha* or righteous war between *Pandava*s and *Kaurava*s, *Arjuna* was counseled by *Lord Krishna* to "fulfill his *Kshatriya* (warrior) duty as a warrior and establish *Dharma*." Also, there are messages on the ways that lead to liberation or *moksha*.

*The Bhagavad Gita* is also called *Gitopanisad*. It is the last scripture of the *Sanatana Dharma* and one of the most important *Upanisad*s in literature. There are many commentaries on *The Gita*, and one may question the necessity for another one. *Srila Prabhupada* in his introduction to *The Bhagavad-gita As It Is* wrote: "This present edition can be explained in the following way. Recently an American lady asked me to recommend an English translation of *The Bhagavad Gita*. Of course in America there are so many editions of *The Gita* available in English, but as far as I have seen, not only in America but also in India, none of them can be strictly said to be authoritative because in almost every one of them the commentator has expressed his own opinions without touching the spirit of *Bhagavad-gita* as it is." *Srila Prabhupada* explained his take further: "It is just like this: if we want to take a particular medicine, then we have to follow the directions written on the label. We cannot take the medicine according to our own whim or the direction of a friend. It must be taken according to the directions on the label or the directions given by a physician. Similarly, *Bhagavad-gita* should be taken or accepted as it is directed by the speaker himself. The speaker of *Bhagavad-gita* is *Lord Sri Krsna*."

Srila Prabhupada considered commentators as people who were re-telling *The Gita* like *Lord Krishna*. Prabhupada in his introduction to *The Bhagavad-gita As It Is* wrote: "…*Bhagavad-gita* should be taken up in a spirit of devotion. One should not think that he is equal to *Krsna*, nor should he think that *Krsna* is an ordinary personality or even a very great personality. *Lord Sri Krsna* is the Supreme Personality of Godhead, at least theoretically, according to the statements of *Bhagavad-gita* or the statements of *Arjuna*, the person who is trying to understand the *Bhagavad-gita.* We should therefore at least theoretically accept *Sri Krsna* as the Supreme Personality of Godhead, and with that submissive spirit we can understand the *Bhagavad-gita.* Unless one reads the *Bhagavad-gita* in a submissive spirit, it is very difficult to understand *Bhagavad-gita* because it is a great mystery."

*The Gita* consists of eighteen chapters and each chapter ends with the line, "*Iti… Brahmavidyayang Yogashastre Sri Krishnarjun Samvade…*" Hence, *The Gita* may be referred to as *Brahmavidya* which directs one to realizing the *Brahma* or "self." Also, *The*

*Gita* is *Yogashastra*; therefore, the nuances of *The Gita* can only be comprehended by true *Yogi*s who have achieved enlightenment.

*The Gita* has defined Yoga as: "*yogah karmasu kaushalam*" [chapter II, verse 50]. "*[The] art of all work*" is called Yoga. The gist as included in *Bhagavad-gita As It Is* reads as: "One's ignorance can be removed by the instruction of the *Bhagavad-gita* which teaches one to surrender unto *Lord Sri Krsna* in all respects and become liberated from the chained victimization of action and reaction, birth after birth. *Arjuna* is therefore advised to act in *Krsna* consciousness, the purifying process of resultant action." Acting in "Krishna consciousness" is a typical phenomenon, prevailing among the followers of *Srila Prabhupada* who founded ISKCON.

In the postscript to *Mumuksha* (by Kaushik Acharya) *Raghunath Ghosh* (Professor Emeritus, Department of Philosophy, North Bengal University) wrote: If there is no meditation, no result can be achieved as endorsed in the *gītā*— "*yogah karmasu kauśalam*" (meditation is the key to success). Here the same verse got a unique dimension through Ghosh's interpretation.

On the other hand, *Sri Lahiri Mahasaya* in his commentary on *The Gita* rendered his take as, "[By] staying in the *paravastha* of *kriya-yoga*—abandon the wish for acts, good or bad. To do this, stay in the *kriya-yoga*'s *paravastha* and do your duty. Yoga is a very big art, art of all arts. It should be done by keeping your eye-sight in your forehead and your breath steady in your heart."

It is obvious that *Lahiri Mahasaya*'s take on *The Gita* can only be understood by someone who practices *Kriyayoga*, for the nuances (like *paravastha*, etc.) need to be taken care of.

*The Gita* imparts knowledge to mankind; knowledge which prepares a reader for seeking enlightenment. The fourth chapter (*Jnana Yoga*) deals with wisdom. Verse 39 reads as:

*shraddhavan labhate jnanam tatparaha samyatendriyaha*
*jnanam labdhva param shantim acirenadhigacchati*

[*Only a faithful man who is focused to God and has complete control over the mind and body (indraiyas), can gain knowledge, not otherwise. Thus, supreme spiritual peace can be achieved.*]

While explaining this verse in *Bhagavad-gita As It Is*, *Srila Prabhupada* contradicted his stand as mentioned in the introduction and wrote: "One is called a faithful man who

thinks that, simply by acting in *Krsna consciousness*, he can attain the highest perfection. This faith is attained by the discharge of devotional service, and by chanting "*Hare Krsna, Hare Krsna, Krsna Krsna, Hare Hare/ Hare Rama, Hare Rama, Rama Rama, Hare Hare*," which cleanses one's heart of all material dirt." Nowhere in *The Gita* can one spot the importance of chanting *mantra*, and it was *Srila Prabhupada* who defined other interpretations as "whims" of the commentators.

The yogic explanation runs as follows: "By *Kriya*—with a devoted and controlled mind and *indriya*s and staying in the *paravastha* of *Kriya*, soon a sentiment of 'I am nothing, and mine is nothing' is obtained." It is worth mentioning that supreme peace can never be attained until a man becomes free of the "I-feeling."

Looking at verse 9 in chapter IV:

*janma karma ca me divyam evam yo vetti tattvatah*
*tyaktva deham punar janma naiti mam eti so arjuna*

[*One who knows the transcendental nature of my appearance and activities, does not, upon leaving the body take birth again in this material world, but attains my eternal abode, O Arjuna*]

This verse has its reference to the previous two verses [verses 7 and 8] where God claims that to rescue the *sadhu*s and to demolish the evils He arrives in the world at all times. The *Bhagavad-gita As It Is* explains verse 9 as: "One who can understand the truth of the appearance of the Personality of Godhead is already liberated from material bondage, and therefore he returns to the kingdom of God immediately after quitting this present material body. Such liberation of the living entity from material bondage is not at all easy." *Srila Pabhupada* challenged the ones with no so-called *Krishna-consciousness* and explained the verse further: "The impersonalists and the yogis attain liberation only after much trouble and many, many births. Even then, the liberation they achieve—merging into the impersonal *brahmajyoti* of the Lord—is only partial, and there is the risk of returning again to this material world. But the devotee, simply by understanding the transcendental nature of the body and activities of the Lord, attains the abode of the Lord after ending this body and does not run the risk of returning again to this material world."

Lahiri Mahasaya, on the contrary, delivered a clear stand on the verse and did not include any warning for non-*kriyavan*s (A *Kriyavan* is one who performs *Kriya*yoga having been taught by an authorized Master). The yogic explanation of verse 9 reads

as: “One who understands My birth and acts as the clear sky and with a knowledge of it, performs *Kriya*, does not have to be re-born.”

We will now discuss verse 66 in chapter XVIII:

*sarva-dharman parityajya mam ekam sharanam vraja*
*aham tvam sarva-papebhyo moksayisyami ma sucah*

[*Abandon all varieties of religion and surrender only unto me. I shall relieve you from all the sins. Don’t be sorrowful.*]

The explanation of the verse, as contained in *Bhagavad-gita As It Is*, reads as: “Now, in summarizing *Bhagavad-gita,* the *Lord* says that *Arjuna* should give up all the processes that have been explained to him; he should simply surrender to *Krsna*. That surrender will save him from all kinds of sinful reactions, for the *Lord* personally promises to protect him.” One with or without the *Krishna-consciousness* may question the rationality of such an explanation as it probably categorized the verse as a summarizer of all advices as laid down in *The Gita*.

*Srila Prabhupada* refuted the importance of labor attached with *Karma* (action) and mentioned: “There is no need of strenuous effort to free oneself from sinful reactions. One should unhesitatingly accept *Krsna* as the supreme savior of all living entities.” May we now raise a question: Does not the act of accepting Krishna as the savior call for *Karma* that demands austerity? We may again ask if the tenets of *Yoga* and/or *Patanjal Yoga Sutra* does not allow unconditional acceptance of the God as the only savior. And also, how does one accept *Krishna* as the supreme savior?

The yogic explanation of the same verse is crisp and to-the-point: “Do not get attracted anywhere, only concentrate on the *atma* and carry on with the acts taught by the Guru. Keep remembering—*Aum*—whilst engaging in this act if you get tempted elsewhere—I shall deliver you, rather in the [advanced] stage of *paravastha* of *Kriya* no temptations occur, thus don’t worry about it.”

There are several other verses whose interpretations differ from one book to another; it is all about the school-of-thought that one follows. It is to be noted that the author (sage *Vyasa*) did not explain the verses himself as contained in *The Gita*; this has been the chief reason why the interpretations have been made down the ages. The question remains: Why did not the author explain the verses himself? The answer to this question can be spotted in chapter IX where God claims *The Gita* as “*rajavidya rajaguhyam pavitram idam uttamam*” [*The majestic knowledge is extremely confidential and pious*, Verse 2].

We can guess that the author of *The Mahabharata* [or *The Gita*, as in this case] let the verses remain mysterious to general readers and allowed them to be interpreted by the sages and scholars according to their understanding of self-realization. After all, *The Gita* aids in realizing the self and imparts knowledge on *moksha* [salvation].

Considering verse 66 in chapter XVIII [as mentioned in this study] many scholars nurture the notion that *sharanagatih* [the act of surrendering to God] is possibly the chief action *The Gita* has endorsed. This belief holds little merit, because had this been true, the author would not have written all seventeen chapters prior to chapter XVIII. There is no reason to call the author unwise and imprudent.

Let us read and contemplate on verse 29 in chapter IV:

*apane juhvati pranam pranepanam tatha pare*
*pranapana-gati ruddhva pranayama-parayanah*
*apare niyataharah pranan pranesu juhvati*

[*And there are even others who are inclined to the process of breath restraint to remain in trance, and they practice stopping the movements of the outgoing breath into the incoming, and incoming breath into the outgoing, and thus remaining in trance finally by stopping breathing completely. Some of them, controlling the eating process, offer the outgoing breath into itself as a sacrifice.*]

In explaining the verse in *Bhagavad-gita As It Is*, *Srila Prabhupada* wrote: "[Through] *kumbhaka-yoga*, the yogis increase the duration of life by many, many years. A *Krsna conscious* person, however, being always situated in the transcendental loving service of the Lord, automatically becomes the controller of the senses. His senses, being always engaged in the service of *Krsna*, have no chance of becoming otherwise engaged. So at the end of life, he is naturally transferred to the transcendental plane of *Lord Krsna*; consequently he makes no attempt to increase his longevity.

Here are a few points for our serious consideration: 1. *Kevala Kumbhaka* is a state which occurs spontaneously, and is characterized by complete stoppage of external breathing. 2. Increasing the tenure of life [longevity] is not an objective the yogis strive for. 3. *The Gita* urges devotees to become *pranayama-parayanah*, thereby becoming realized of God or the "self." Moreover, *The Rudrayamala* has recommended *Pranayama* to the seekers:

*pranayama mahadharma vedanamapyagocarah*
*sarvapunyasy- a sarohi paparasi tulanalah*

[*Pranayama is the maha-dharma (ultimate religion), which is incomprehensible*

*even to The Vedas; it is the essence of all virtues and the destroyer of all sins.*]

There is one immensely popular verse in *The Gita* [chapter II, verse 47]:

*karmanyevadhikaraste ma phalesu kadacana*
*ma karmaphalaheturbhurma te sangostvakarmani*

[*You have a right to perform your prescribed duty, but you are not entitled to the fruits of your action. Never consider yourself to be the cause of the results of your activities and never be attached to not doing your duty.*]

Reflections on this verse have been attempted elsewhere by the authors of the paper, and the literal meaning of this verse has been challenged simply on the basis of humane logic. Before concluding our study we would like to ask: What good did *Vyasa*, the author of *The Gita*, do by not explaining the verses himself? One might defend by saying *Vyasa* did not have an example set before he wrote *The Mahabharata*. But then, sages set examples to be followed in future days.

There is more than one commentary on almost every Sanskrit text. The present study elaborates the contraries as found in the commentaries on *The Gita*. We usually read and follow the commentary that is popular among the scholars. But, we hardly bother to study other commentaries available on a particular text. *The Gita*, as we said before, has been interpreted by many sages and scholars, and thus, contradictions occurred. The general readers find it difficult though as to choose the commentary to look up to. This was perhaps the reason Sanskrit texts like *Tarka-Samgraha*, *Vakroktijivitam* had been explained by the authors [Annambhatta and Kuntaka respectively] themselves. Such work helps in retaining the real meaning of the original text, and thus, the chance of misinterpretation is cautiously avoided. However, commentaries on the Sanskrit texts are even more important nowadays; while reasons are many, one of them being the lack of interest to learn Sanskrit, the language.

**Sources and suggested readings:**

*Bhagavad-gita As it Is* by Srila Prabhupada [ISKCON, Mayapur, West Bengal]

*Spiritual Gita* by Shyamacharan Lahiri and Bhupendranath Sanyal [English translation by Chandrakanta Agarwala, published by Sundeep Agarwala, Calcutta]

*Srimad Bhagavad Gita* [Edited in Bengali by Atulchandra Sen, Haraf Publishers, Calcutta, 1936]

*Wikipedia*
*Mumuksha* by Kaushik Acharya [Hawakal Publishers, Calcutta, 2016]
*Reflections on Salvation* by Kiriti Sengupta [Transcendent Zero Press, Texas, 2016]

Received on 22. 04. 2017 Accepted on 17. 07. 2017

# शब्दशास्त्रे उपमास्वरूपम्


अनुप कुमार खाँ*



**शोधसारः (Abstract)**

अर्थालङ्काराणां मध्ये उपमा विशिष्टा। अलङ्कारशास्त्रेषु अलङ्काररूपेण प्रयोगात्पूर्वम् उपमा इति पदस्य प्रयोगः स्वरूपञ्च दृश्यते वेदे (ऋग्वेदः १/११५/२), उपनिषदि (कौ.उ. १/३-४) (बृ.उ. ३/९/२८), रामायणे, महाभारते च। महामुनिना गार्ग्येणोपमायाः लक्षणं चक्रे - "यदतत्तत्सदृशम्" इति। यास्काचार्येणोपमायाः- कर्मोपमा-भूतोपमा-रूपोपमा-सिद्धोपमा-लुप्तोपमाचेति भागपञ्चमुपस्थाप्यते निरुक्ते। अष्टाध्यायाम् - उपमानानि सामान्यवचनैः, उपमितं व्याघ्रादिभिः सामान्याप्रयोगे, उपमानाच्च, उपमानादाचारे चेति सूत्राणि रचितानि भगवता पाणिनिना। कात्यायनेनापि - सप्तम्युपमानपूर्वपदस्योत् तरपदलोपश्च वक्तव्यः, उपमानात् पक्षात् पृच्छाच्च चेति वार्तिकद्वयमपि रचितम्। महाभाष्ये भगवता पतञ्जलिना उपमानस्य स्वरूपं, उपमितमिति सूत्रे सामान्याप्रयोगे इति पदस्यावश्यकञ्चोपस्थापिते। वैदिककालात्महाभाष्यकालपर्यन्तमलङ्कार, उपमा, उपमावयवभूता उपमानोपमितसामान्यधर्माः चास्माभिः लब्धाः। किन्तु काव्यतत्त्वाङ्गीभूतः पारिभाषिकोऽलङ्कारो न प्राप्तो नापि काव्यालङ्कारविशेषोपमा। वैदिकमन्त्रेषु रामायणादिकाव्येषु वा या उपमाः प्रयुक्ता अभवन्, तासूपमासु सादृश्यं सौन्दर्यञ्च प्राप्येते। "सौन्दर्यमलङ्कारः" इति वामनाचार्येणोक्तम्। शब्दशास्त्रे प्राप्ताया उपमाया अर्थः सादृश्यम्। शब्दशास्त्रे प्रयुक्तायामुपमायां सौन्दर्यव्यतिरेकसादृश्यं प्राप्यते।



**कुञ्चिशब्दाः (Keywords)**

अरंकृताः, ऋञ्जतिः, कर्मोपमा, भूतोपमा, रूपोपमा, सिद्धोपमा,लुप्तोपमा, उपमानम्, सामान्यवचनैः, पद्मगन्धिः, सौन्दर्यमलङ्कार इत्यादयः।


## मूलम्

संस्कृतवाङ्मये व्याकरणस्य गौरवं स्वीक्रियते। व्याकरणं न केवलमेकं वेदाङ्गम्, अपि तु वेदाङ्गप्रतिपादितविषयावबोधे कारणस्वरूपं यत् पदपदार्थज्ञानं तज्ज्ञानं व्याकरणादृते न सम्भवति। शास्त्राण्यन्यानि व्याकरणमपेक्षन्ते। शास्त्राणामर्थस्य यथायथं प्रयोगाय वाक्यानां च परिशुद्धज्ञानलाभाय व्याकरणं नितरामपेक्षितम्। अतः साहित्येऽपि मुखं व्याकरणमेव - मुखं व्याकरणं स्मृतम्।[1]- भर्तृहरिणोक्तम् -

अर्थप्रवृत्तितत्त्वानां शब्दा एव निवन्धनम्।
तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते।।[2]-

1 पाणिनीयशिक्षा - ४२
2 वाक्यपदीयम् - ब्रह्मकाण्डम् कारिकासंख्या १३


*वर्धमानविश्वविद्यालयस्य संस्कृतविभागस्य शोधच्छात्रः

तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।
पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते॥[3] –

ध्वन्यालोकेऽपि उक्तम् - "प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम्" इति।

शास्त्रेष्वन्येष्वलङ्कारशास्त्रमन्यतमम्। अलङ्काराणां मध्ये उपमान्यतमा। 'उपमा' इत्यस्यालङ्काररूपेण प्रयोगात् पूर्वं तस्याः स्वरूपं किमासीदावैदिकशब्दशास्त्रे इत्यधिकृत्यालोचयिष्यते सीमिते प्रबन्धपरिसरेऽस्मिन्।

आविष्कृतानां भारतीयानामलङ्कारग्रन्थानां रचनाकालः षष्ठशताब्दी। किन्तु तदा 'अलङ्कारस्य परिपक्वता'(Maturity) इति दृश्यते। तर्हि कदा केन प्रकारेण तस्य प्रारम्भो जातः, केन वा प्रकारेण नवजातकः परिबर्द्धमानो विवर्तितो वाभवदिति विषयः स्पष्टीक्रियते यथासामर्थ्यम्।

'अलङ्कार' 'उपमा' चेति शब्दयोः प्रयोगः भारतीयसाहित्ये सुप्राचीनः।

वैश्वामित्र-मधुच्छन्दा-ऋषिणा वायुदेवतामुद्दिश्य प्रोक्तमृङ्मन्त्रे " वायावायाहि दर्शतेमे सोमा अरंकृताः॥"(ऋग्वेद १/२/१) इति। यास्काचार्येणोक्तम् निरुक्ते - "अरंकृताः अलङ्कृताः"(१०/२/२)- [4]इति।

ऋग्वेदे दृश्यते - कश्चित् मानवः शोभनावयवां गच्छन्तीं स्त्रियं सततमनुगच्छति तद्वत् सूर्योदानादिगुणयुक्तां दीप्यमानां देवीमुषसं पश्चादभ्येति। उषसः प्रादुर्भावानन्तरं तामभिलक्ष्य गच्छति -

सूर्यो देवीमुषसं रोचमानां
मर्यो न योषामभ्येति पश्चात्॥ इति। (ऋग्वेद १/११५/२)

ऋग्वेदीये कौषितक्युपनिषद्युक्तम् - "तं ब्रह्म आह अभिधावत मम यशसा विजरामयं नदीं प्रापत्...। तत् पञ्चशतान्यपसरसां प्रतिषन्ति। शतं मालाहस्ताः। तं ब्रह्मालङ्कारेण अलङ्कुर्वन्ति। स ब्रह्मालङ्कारेण अलङ्कृतो ब्रह्मविद्वान् ब्रह्माभिप्रैति।" इति (कौषीतक्युपनिषद् १/३-४)

बृहदारण्यकोपनिषदि तृतीयाध्याये - उपस्थितान् ब्राह्मणान् प्रति याज्ञवल्कस्य जिज्ञासायामुपमा प्रकाश्यते -

यथा वृक्षो वनस्पतिस्तथैव पुरुषोऽमृषा।
तस्य लोमानि पर्णानि त्वगस्योत्पाटिका बहिः[5]॥

तत्प्रश्नस्य व्याख्यायां वनस्पतेः पर्णानि बहिरुत्पाटिका, उत्पटो रसो वा, शकराणि, किनाटमस्थीनीत्यादिभिः सह मानवशरीरस्य यथाक्रमेण लोमानि त्वक्, रुधिरम्, मांसानि, स्नाव दारुणीत्यादीनां सादृश्यमुपस्थापितमभवत् -

मांसान्यस्य शकराणि किनाटं स्नाव तत् स्थिरम्।
अस्थीन्यन्तरो दारुणि मज्जा मज्जोपमा कृता॥ (बृहदारण्यकोपनिषद् ३/९/२८/३)

**रामायणम्**

आदिकविविरचिते 'श्रीमद्रामायणम्' इति महाकाव्ये 'अलङ्कार' 'उपमा' चेति शब्दद्वयस्य बहुलप्रयोगो दृश्यते।

वसिष्ठोपदेशक्रमेण रामस्योपवासः गृहालङ्करणं, पौरैः पुरालङ्करणपूर्वकं रामाभिषेकमित्यादिविषयकेषु श्लोकेषु अलङ्कारशब्दः प्रयुक्तोऽभवत्।

---

3 वाक्यपदीयम् - ब्रह्मकाण्डम् कारिकासंख्या १४
4 अलङ्कृतास्तेषां श्रृणु नो ह्वानमिति ॥ ( निरुक्ते दशमाध्याये द्वितीयपरिच्छेदे द्वितीयकारिका )
5 बृहदारण्यकोपनिषद् ३/९/२८/१

एकयामावशिष्टायां रात्र्यां प्रतिविबुध्य सः।
अलङ्कारविधिं कृत्स्नं कारयामास वेश्मनः॥ [6]
अलङ्कारं पुरसैवं कृत्वा तत्पुरवासिनः।
आकाङ्क्षमाणो रामस्य यौवराज्याभिषेचनम्॥ [7]

टीकायामुक्तम् - 'अलङ्कारविधिं अलङ्कारविधानम्' इति - "विधिर्विधाने दैवेपि" इति अमरकोशः।

सीतापहरणकाले आकाशपथि दृश्यते, रावणाङ्कगतं सीतायाः सुनयनयुक्तमुखं शुभ्रैः सुनिर्मलैः दन्तैरलङ्कृतम्-

शुक्लैः सुविमलैर्दन्तैः प्रभावद्भिरलङ्कृतम्।
तस्याः सुनयनं वक्त्रमाकाशे रावणाङ्कगतम् ॥[8] इति ।

ब्रह्मोपमा महात्मानः कुशवंश्या नरोत्तमा (बालकाण्डम् ३४/२०)। तिलकटीकायामुक्तम् - ब्रह्मोपमा ब्रह्मार्षितुल्य इति।

अनाथ इव भूतानां नाथस्त्वं वासवोपमः।
मया प्रेषेण काकुत्स्थ किमर्थं परितप्यसे॥[9]

व्याख्यायामुक्तम्[10] - वासव उपमीयतेऽनेनेति वासवोपः इति।

**महाभारतम्**

महाभारते वनपर्वे तृतीयपाण्डवस्य समीपे किरातवेशिनः स्वर्णमयबृक्षसदृशकान्तिविशिष्टस्य महादेवस्य रूपवर्णनायामुपमा परिलक्षते - किरातस्य बाणः सर्प इव विषाक्तः महादेवस्य शरीरं साक्षादग्निरिव प्रतीयते -

श्रीमद्धनुरूपादाय शरांश्चाशी वेषोपमान्।
निष्पपात महावेगो दहनो देहवोनिव॥ [11]

ततः परं मूकनामदानवजिघाङ्क्षोः अर्जुनस्य वाणस्य वर्णनायाम्[12]; किञ्च शिवस्य वाणस्य वर्णनायामुपमा[13] प्रत्यक्षते।

एताभिः उद्धृतिभिः बुध्यते यत् , अलङ्करणं हि सौन्दर्यकरणम्। प्रत्यक्षतया वस्तुविशेषस्य परोक्षतया च वाक्यसमूहस्य सौन्दर्यदानं हि अलङ्करणम्। ऋषिः वामदेवः यजमानमवदत्, भो यजमान! तव वाक्यैः सर्वज्ञममृतमग्निमलङ्कुरुष्व – "वो विश्ववेदसं हव्यवाहम् अमर्त्यमृञ्जसे गिरा" इति। ऋञ्जधातोरर्थः अलङ्करणम् – "ऋञ्जतिः प्रसाधनकर्म्मा" (६/२१/५) इति निरुक्तम्। प्रसाधनशब्दस्यार्थोऽलङ्करणं सज्जीकरणं वा। ऋञ्जधातोरन्योऽर्थो भर्ज्जनम् इति।

किन्तु वैदिकयुगे छन्दशास्त्रवदलङ्कारशास्त्रस्य पृथकस्तित्वं नासीत्। तदा कोऽपि ग्रन्थो न प्राप्तो यत्र उपमा 'अलङ्कारविशेषः' इत्युल्लिखिताभवत्। किन्तु साम्प्रतमुपलब्धस्यालङ्कारस्य बीजं दृश्यते वैदिकसाहित्ये - इति वक्तुं शक्यते।

---

6 श्रीमद्रामायणम् - अयोध्याकाण्डम् ६षष्ठ सर्गःपञ्चमश्लोकः (२/६/५)
7 श्रीमद्रामायणम् - (२/६/१९)
8 श्रीमद्रामायणम् - आरण्यकाण्डम् (५२/२२)
9 श्रीमद्रामायणम् - आरण्यकाण्डम् (२/२३)
10 श्री-गोविन्दराजीय-रामानुजीय-तनिश्लोकी-महेश्वरतीर्थीयाख्यव्याख्या
11 महाभारतम् ३/३९/३ ( वनपर्वे ऊनचत्वारिंशदध्याये तृतीयश्लोकः)
12 महाभारतम् ३/३९/९
13 महाभारतम् ३/३९/१३

इदानीं व्यावहारिकजीवने यत्र अलङ्कारशब्दः प्रयुज्यते, तत्र तस्यार्थो भवति लाक्षणिकः। 'स्वर्णमयं कङ्कनम्', 'हिरण्यमङ्गुलीयकम्' इत्यादिस्वर्णकारादीनां सुन्दरं शिल्पमात्रम्, न तु अलङ्कारः। शरीरं विना एतेऽलङ्कारा आकाशकुसुममिव निरर्थका इति प्रतीयते। कङ्कनादिनिर्माणकाले शिल्पी मनुष्यशरीरं स्मरति। कङ्कनादीनामलङ्कारत्वं सापेक्षकम्, शिल्पः हि स्वाभाविकः परिचयः।

अलङ्करणं ह्युपमायाः कर्म। तथाप्यावैदिकमहाभारतकालात् कुत्राप्युपमा 'अलङ्कारः' इत्यनेन पदेन नोक्ता। तदा किमप्यलङ्कारशास्त्रं न सृष्टमासीत्। किन्तु वेदोत्तरकाले भारतीयचिन्तायामुपमा क्रमवर्धमानमस्तित्वमेकं लब्धवतीत्यस्य प्रमाणान्युपस्थाप्यन्ते यथासामर्थ्यम्।

**निरुक्तम्**

व्याकरणभाषातत्त्वयोरेकाधारविशेषं निरुक्तं षडङ्गवेदस्यान्यतममङ्गम्। यास्काचार्येणोक्तं निरुक्ते तृतीयाध्याये त्रयोदशपरिच्छेदे - "अथात उपमाः" इति। अथ अतः उपमाः भवन्तीति अन्वयः। उपसर्गनिपातपरिचयदानान्तरम् "इदमिव", "इदं यथा", "अग्निर्न ये" इत्याद्युपमासमूहमभिहितं भवति। उपमाया उपविभागाः तेनोपस्थापिताः। एतदर्थम् "उपमाः" इति बहुवचनान्तप्रयोगः। यास्काचार्यस्य पूर्वं महामुनिना गार्ग्येणोपमायाः लक्षणं चक्रे - "यदतत्तत्सदृशम्" इति। यत् (यत् वस्तु) अतत् (न तत् वस्तु) [तथापि] तत्सदृशम् (तत् वस्तु इव) इति तत्रोपमा। किमपि वस्त्वितरवस्तुनो भिन्नं भूत्वापि तत्सदृशमिति मन्यते तदा तयोः वस्तुनोर्मध्ये उपमा वर्तते। तत्वस्त्वपरेण वस्तुनोपमितं भवति। खद्योतः अग्नेः भिन्नः तथाप्यग्निना साकं खद्योतस्य सादृश्यं वर्तते। खद्योतोऽग्निना सहोपमियते - "अग्निरिव खद्योतः" इति गार्ग्यमतम्। उपमायां सादृश्ये वा साधारणधर्मो हि भित्तिस्वरूप एव। अयं धर्मो द्वयोर्विजातीययोर्वस्तुनोर्मध्ये विद्यते।

"तदासां कर्म्म" (निघण्टुकाण्डे ३/१३/२५) इति यास्कवचनस्यान्वयार्थः - तत् आसाम् (उपमानं) कर्म्म (अर्थः) - यस्यकस्यचिदन्येन गुणप्रकाशनमिति। यस्य गुणः प्रसिद्ध एव, तेन प्रसिद्धगुणविशिष्टेण वस्तुनाप्रसिद्धगुणविशिष्टस्य वस्तुनो गुणः प्रकाश्यते इत्युपमाया अर्थः। चन्द्रस्याह्लादकत्वगुणः प्रसिद्धः, मुखस्याह्लादकत्वगुणोऽप्रसिद्धः। चन्द्र इव मुखम् - इति वाक्ये चन्द्रेण सह मुखस्याप्याह्लादकत्वगूणः प्रतिस्थाप्यते। एतदर्थं "यदतत्तत्सदृशं तदासां कर्म्म इति गार्ग्यः" इत्यर्थस्य पक्षपाती स्कन्दस्वामी।

**कर्म्मोपमा**

निरुक्ते नैघण्टुककाण्डे निपातव्याख्यानावसरे उक्तं यास्काचार्येण "यथेति कर्म्मोपमा" (३/१५/१५) इति। अत्र 'यथा' इति निपातः। यथेति निपातः कर्म्मणा सह कर्मणः तुलनां प्रकाशयति। अत्र कर्म्मशब्दस्यार्थः क्रिया। यथेति निपातेन प्रायश एका क्रिया क्रिययान्यया सहोपमीयते। यस्यामुपमायां क्रिया हि साधारणधर्मः यास्कमते सा कर्म्मोपमा - "दीप्यमानः अग्निरिव सूर्यरश्मिः / अरुणः दृश्यते" इति। अग्नेः प्रधानक्रिया तमोदूरीकरणम्। सैव क्रिया सूर्यरश्मिनः। सूर्ये उदिते धरणी आलोकिता भवति। तर्हि 'तमोनाशः' ह्युभयोः साधारणधर्मः। अग्निरुपमानम्, सूर्यरश्मिरुपमितम्। तमोनाशरूपा क्रिया उभयोर्विद्यते। क्रियया तयोः सादृश्यमवगम्यते। एतदर्थं 'कर्म्मोपमा' इति। ऋग्वेदस्य "अग्निर्न ये------- (ऋग्वेदः १०/७८/२) इति मन्त्रे 'न' इति निपातस्योपमार्थत्वं प्रतिस्ठाप्यते। मन्त्रेऽस्मिन् चत्वारः नशब्दाः सन्ति। नकारा इवार्थे उपमार्थे वा प्रयुक्ताः।

**भूतोपमा**

भूतोपमा यास्कनिर्दिष्टानामुपमानां मध्येऽन्यतमा - मेष इति भूतोपमा (नैघण्टुकम् ३/१६/१०) इति। भूत शब्देन यदा उपमा सूच्यते तदा सा भूतोपमा भवति। मेषो भूतो मेष इव। मेषो भूतोऽभिषन्नयः (ऋग्वेद ८/२/४०)। इति ऋङ्मन्त्रे उपमार्थको भूतशब्दः प्रयुक्तोऽभवत्। इन्द्रमुद्दिश्य ऋषिरवदत् - मेषो यथा तस्य पोषणकर्तारमनुसरति आह्वानमात्रेण तथैव भवानपि मेधातिथिमनुसृत्य तं प्राप्तवान्।

**रूपोपमा**

रूप इति शब्देन यत्रोपमा सूच्यते तत्र रूपोपमा भवति। हिरण्यरूपः (ऋग्वेद २/३५/१०) इति मन्त्रे अग्नि इत्यनेनाग्निदेवताया माहात्म्यं वर्णितमस्ति। मन्त्रस्यास्य देवता अपांनपात् अर्थात् वैद्युताग्निः। अतोऽग्निशब्देनात्र अपांनपात् वैद्युताग्निः वा बोद्धव्यः। मन्त्रेऽस्मिन्नृषेरभिप्रायः - स वैद्युताग्नि हिरण्यरूपविशिष्टो हिरण्य इव दर्शनीयः। स एव हिरण्य इव वर्णविशिष्ट इति। मन्त्रेस्मिन् 'रूपः' 'वर्णः' चेति पदद्वयेनोपमा प्रतिपाद्यते। 'अपांनपात्' शब्दस्यार्थः 'अपां पौत्रः' इति। यतो हि, अद्भ्यो जायते मेघः, मेघाच्च वैद्युतः विद्योतते। 'हिरण्यरूपः' 'हिरण्यवर्णः' चेति समासबद्धपदद्वये रूपवर्णशब्दौ उत्तरपदे स्थित्वा हिरण्येन साकम् अपांनपात् देवताया उपमा प्रकाश्यते। एतद्बोधार्थं 'हिरण्यवर्णस्येवास्य रूपम्' (निरुक्तम् ३/१६/१५) इत्युक्तम् यास्केन।

**सिद्धोपमा**

'वदि'त्युपमावाची प्रत्ययः। यथा - ब्राह्मणवत् = ब्राह्मणा इव, बृषलवत् = बृषला इवेति। एतत्प्रत्यययुक्तोपमा हि सिद्धोपमा। लौकिके वैदिके चोभयत्रैव एतादृश्या उपमाया बहुलप्रयोगो दृश्यते। लोकप्रसिद्धत्वाद्धि 'सिद्धोपमे'त्येतादृशी संज्ञा।

**लुप्तोपमा**

निरुक्तस्य नैघण्टुककाण्डेऽष्टादशपरिच्छेदे लुप्तोपमालोचिताभवद्यास्काचार्येण – अथ लुप्तोपमानि इति। येभ्यः पदेभ्यः परमुपमावाचक इवादिशब्दो न प्रयुज्यते तान्येव पदानि व्याख्यायन्तेऽस्मिन् परिच्छेदे। उपमावाचकस्येवादिशब्दस्य लोपे लुप्तोपमेति संज्ञा। अर्थपर्यालोचनयोपमा प्रतीयते। अतो लुप्तोपमार्थोपमेत्यनेनाभिहिता - इति प्राचीना लौकिकाश्च।

"सिंहः सहनाद्धिंसेर्वा स्याद्विपरीतस्य संपूर्वस्य वा हन्तेः संहाय हन्तीति वा" (निरूक्तम् ३/१८/१२) इति वाक्ये यास्काचार्यः सिंहशब्दस्य निर्वचनं दर्शयति। सिंहोऽन्यानां प्राणिनामभिभवतीत्यर्थेऽभिभवार्थकात् सहधातोः सिंहशब्दस्य निष्पत्तिर्भवितुमर्हति - "सिंहः सहनात्" इति। विपर्यस्तस्य हिंस्धातोः (हिंस्धातोः वर्णविपर्ययेन) सिंहशब्दस्य निष्पत्तिर्भवितुमर्हति सिंहः हिंसतीत्यर्थे - "हिंसेर्वा स्याद्विपरीतस्य" इति। संपूर्वकहन्धातोः सिंहशब्दस्य निष्पत्तिर्भवितुमर्हति - "संपूर्वस्य वा हन्तेः" इति। सिंह आदावात्मानं सङ्कोच्यानन्तरं प्रकाशितः सन् मृगादिं हन्तीति सिंहशब्दस्य व्युत्पत्तिः।

वस्तुतस्तु संपूर्वकहन्धातोः निष्पन्नस्य सिंहशब्दस्यार्थानां मध्ये नास्ति कोऽपि भेदः। संपूर्वकहन्धातोरर्थ एव "संहाय हन्तीति वा" इति प्रतीयते। दुर्गाचार्यमते - 'संपूर्वस्य वा हन्तेः' 'संहाय हन्तीति वा' इत्येते भिन्ने

निर्वचने।अनयोर्मध्ये कोऽपि सम्बन्धो नास्ति[14]।

अपरपक्षे वि-आपूर्वकघ्राधातोः व्याघ्रशब्दो निष्पद्यते। व्याघ्रस्य घ्राणशक्तिरतीव प्रवलः। घ्राणात् स वध्यमनुधावति। वि-आपूर्वक्हन्धातोः व्याघ्रशब्दस्य निष्पत्तिर्भवितुमर्हति। व्याघ्रो मुखव्यादानपूर्वकं विधिरूपेणाकर्षणपूर्वकं वा हन्ति। सिंहो व्याघ्रो वेत्युक्ते देवदत्तादीनां शौर्यादिप्रशंसनीयानां गुणानां बोधो भवति - "सिंहो व्याघ्र इति पूजायामि"ति यास्कः[15]। अतः 'सिंहो देवदत्तः'; 'व्याघ्रः पुरुषः' इत्यादावुपमा विद्यते।

विपरीतपक्षे 'श्वन्' शब्दस्य व्युत्पत्तौ यास्काचार्येणोक्तं - "श्वा शुयायी शवतेर्वा स्याद् गतिकर्म्मणः शसितेर्वा" इति। द्रुतगमनविशिष्ट इत्यर्थे शुशब्दपूर्वकाय्धातोः श्वन्शब्दो निष्पद्यते। गत्यर्थकात् शव्धातोः श्वन्शब्दो निष्पद्यते। धातुपाठे श्वस्धातोरर्थः प्राणः श्वासग्रहणं वेति। श्वा अतिरिक्तं श्वासवायुं गृह्णाति। अतः श्वस्धातोः श्वन्शब्दस्य निष्पत्तिर्भवितुमर्हति। नैघण्टुककाण्डेऽप्युक्तं - श्वस्धातुः हिंसार्थकः। शव्धातुवत् श्वस्धातुः गत्यर्थक इति दुर्गाचार्यः।

काको यथा शब्दायते तादृशस्य शब्दस्यानुकरणात् स काक इति नाम्नाभिधीयते - काक इति शब्दानुकृतीति यास्काचार्यः[16]। तथापि उपमन्यव आचार्य्यो मन्यते काकादीनि सर्वाणि नामानि न शब्दानुकरणनिमित्तकानि। तन्मते सर्वाणि नामाण्याख्यातजातानि क्रियानिमित्तकानि। पक्षिणो न व्यतिक्रमाः। काल्धातोरर्थो निषेधः। स्पर्शेन द्रव्यदूषणं न भवेदेतदर्थं काको निषेद्धव्यो विताडयितव्यः - "काकोऽपकालयितव्यो भवती"ति। अतः काल्धातोः काकशब्दस्य निष्पत्तिर्भवितुमर्हति। वैयाकरणाः कैधातोः काकशब्दस्य निष्पत्तिं स्वीकुर्वन्ति।

श्वन्काकशब्दोच्चारणे लौलादिनिन्दनीयानां दोषाणां बोधो जायते। अतो 'अयं श्वा', 'अयं काकः' इत्यादावुपमा विद्यते। अर्थप्रतीयमानत्वातदर्थोपमानः। इवाद्युपमानवाचकशब्दाभावे च लुप्तोपमेति।

**अष्टाध्यायी**

पाणिनिव्याकरणे समासश्चतुर्विधोऽव्ययीभावस्तत्पुरुषो द्वन्द्वो बहुव्रीहिश्चेति - "समासश्चतुर्विध इति तु प्रायोवादः"। तत्र तत्पुरुष उत्तरपदप्रधानः। यस्मिन्समासे विग्रहवाक्यस्थितानां समस्यमानपदानां मध्ये उत्तरपदस्यार्थः प्रधानरूपेण प्रतीयते स तत्पुरुषः। यथा - 'स्तोकेन मुक्तः = स्तोकमुक्त'इति। समासबद्धपदेऽस्मिन् 'मुक्त'पदस्यार्थः प्रधानतया प्रतीयते। समासे विग्रहवाक्यस्थितपदानां समानाधिकरणत्वे सति तत्पुरुषः कर्मधारयसंज्ञा प्राप्यते। यथा - 'नीलमुत्पलम् = नीलोत्पलम्' इत्यत्र 'नीलम्' 'उत्पलम्' चेति पदद्वयं सुब्विभक्तिविशिष्टम्। अपरञ्चोदाहरणम् - 'राजा चासौ ऋषिश्चेति = राजर्षिः' इति। अत्रापि 'राजा' 'ऋषिः' चेति पदद्वयं सुब्विभक्तिविशिष्टम्। अत्र कर्मधारयसमासः प्रयुज्यते। कर्मधारये यदि तुलना वा प्रतीयते तर्हि 'उपमानकर्मधारय' 'उपमितकर्मधारयो' वा भवति।

समासोऽयं विषयत्रयात्मकः। उपमानोपमेयसामान्यवचनान्यत्र विषयाः। यस्य पदस्य तुलना वर्तते तदुपमेयम्। उपमीयते येन तदुपमानम्। उपमानोपमेययोर्मध्ये विद्यमानो धर्मः साधारणधर्मः सामान्यवचनं वा। साधारणधर्मवशत उपमेयोपमानयोर्मध्ये तुलना जायते। उदाहरणम् - मुखं चन्द्रमिव मनोज्ञम् = मुखचन्द्रमि'ति। उदाहरणेऽस्मिन्। मुखमुपमेयं चन्द्रमुपमानं मनोज्ञं च साधारणधर्मः। 'इव'शब्दः समासावयवो न। विग्रहवाक्ये इवशब्दः चन्द्राद्युपमानार्थं सूचयति। "उपमितं व्याख्यादिभिः सामान्याप्रयोगे" (२/१/५६)इति सूत्रस्य व्याख्यानावसरे उद्योतटीकायां नागेशेनोक्तम् - इवशब्दस्तु तद्वतोपमानत्वद्योतक इति बोध्यमि'ति। अत्र चन्द्रशब्दस्यार्थः 'चन्द्र इव' ; 'चन्द्रसदृश' इति इवशब्देन सूच्यते। चन्द्रशब्दस्य लाक्षणिकार्थो प्रकाश्यते न वाच्यार्थः। एतदर्थं दीक्षितपादेनोक्तम् - पूर्वपदं तत्सदृशे लाक्षणिकमि'ति। विग्रहे पूर्वपदस्य 'तत्सदृश' इति भवति लाक्षणिकार्थः।

14 संपूर्वस्य वा हन्तेरुपसर्गस्येत्वेन संहाय हन्तीति वा वैयाकरणानामेषा व्युत्पत्तिः - दुर्गाचार्यः।

15 निरुक्तम् ३/१८/३

16 निरुक्तम् ३/१८/५

**उपमानानि सामान्यवचनैः (२/१/५५)**

उपमानकर्मधारयसमासस्य संज्ञाप्रसङ्गे पाणिनिना सूत्रं कृतम् - उपमानानि सामान्यवचनैः (२/१/५५) इति। सूत्रस्यास्य वृत्तौ दीक्षितपादेनोक्तम् - घन इव श्यामः। इह पूर्वपदं तत्सदृशे लाक्षणिकमिति सूचयितुं लौकिकविग्रहे इवशब्दः प्रयुज्यते। पूर्वनिपातनियमार्थं सूत्रमिति। उपमानवाचकपदेन सह सामान्यधर्मवाचकपदस्य यः समासः स उपमानकर्मधारयसमासः। यथा - घन इव श्यामः घनश्यामः इति। घनशब्दस्य घनसदृश इत्यर्थः। घनसदृशः श्यामश्चेति पदद्वयमुभे उह्यकृष्णाद्युपमेयस्य विशेष्यस्य विशेषणम्। यदा उपमेयमनुक्तं वाक्ये तदा कस्य पूर्वनिपातः भविष्यतीत्या शङ्कायामालोच्यसूत्रावतारणा। सूत्रे उपमानानीति प्रथमानिर्दिष्टेनोपमानस्य विशेषणत्वं स्वीकृत्य तस्यैव पूर्वनिपातः स्यात्।

अत्र घनेन सह भगवतः कृष्णस्योपमा वर्तते श्यामेति सामान्यधर्मोपस्थितेः। अतो घन उपमानं श्यामः सामान्यवचनम् इवोपमावाचकशब्दः। उदाहरणेऽस्मिन् कृष्णपदमुपमेयमनुल्लिखितमस्ति। अत उपमेयानुल्लेखे सत्युपमानसामान्यवचनयोर्यः समासः स उपमानकर्मधारयः।

**उपमितं व्याघ्रादिभिः सामान्याप्रयोगे (२/१/५६)**

"उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" (२/१/५६) इति सूत्रे कथयति साधारणधर्मस्यानुल्लेखे व्याघ्राद्युपमानेन सहोपमेयं समस्यते। "विशेषणं विशेष्येण बहुलम्" (२/१/५७) इति सूत्रेण विशेष्यविशेषणयोर्मध्ये यदि सर्वत्र विशेषणस्यैव पूर्वनिपातो भवति, तर्हि कुत्रापि विशेष्यस्य पूर्वनिपातो न भविष्यति। अतो विशेष्यस्य (उपमेयस्य) पूर्वनिपातार्थं प्रयुक्तमिदं सूत्रम्। व्याघ्रादिराकृतिगणः। व्याघ्रादिगणे पठिताः शब्दाः - व्याघ्र-पुंगव-ऋभु-कुञ्जर-सिंह-शार्दुल -नाग-वृषभ-पल्लव-पद्म-कमल-किशलय-वराह-सोम-चन्द्र-इन्द्वित्यादिः। उत्तरपदं पुंसि व्याघ्रादिरिव श्रेष्ठार्थवाची। नपुंसकेऽपि समस्यते। यथा - मुखं पद्ममिव मुखपद्ममिति। अत्र मुखपद्मं तु न श्रेष्ठार्थवाचकम्। साधारणधर्मोल्लेखे न समस्यते। एतदर्थं सूत्रे सामान्याप्रयोगे इति पदं गृहीतम्।यथा - 'पुरुषो व्याघ्र इव शुरः' इत्यत्र समासोऽविधेयः।

**उपमानाच्च (५/४/१३७)**

बहुव्रीहिसमासविधायकेऽस्मिन् सूत्रे "गन्धस्येदुत्पूतिसुसुरभिभ्यः" (५/४/१३५) इति सूत्राद् 'गन्धस्येत्' इति पदमनुवर्तते। अतः सूत्रस्यार्थो भवति - उपमानवाचकात्पूर्वपदात्परस्य गन्धशब्दस्येकारोऽन्तादेशः स्यादिति। यथा - पद्मस्येव गन्धो यस्य स पद्मगन्धिरिति। अत्र पद्म इत्युपमानवाचकपूर्वपदं गन्ध इत्युत्तरपदम्। अतः सूत्रानुसारेण गन्धशब्दस्यान्त्यस्वरस्य स्थाने इकारादेशे 'पद्मगन्ध् इ > पद्मगन्धि' इति रूपं सिद्धति।

**उपमानादाचारे (३/१/१०)**

क्यच्प्रत्ययविधायके "सुप आत्मनः क्यच्" (३/१/८) इति सूत्रे उच्यते - आत्मेच्छायां सत्यामिष्धातोः कर्मणः परं विकल्पे क्यच्प्रत्ययः प्रयुज्यते। यथा - आत्मनः पुत्रमिच्छति = पुत्रीयतीति। क्यजिति प्रत्ययेन 'पुत्रीय' इति धातुः सिध्यति। काम्याच्च (३/१/९) इति सूत्रेणापि विकल्पे काम्यच्प्रत्ययः प्रयुज्यते। यथा - आत्मनः पुत्रमिच्छति = पुत्रकाम्यतीति। "उपमानादाचारे" इति सूत्रस्यार्थः - आचरणार्थे उपमानवाचकात् कर्मणः कर्मवाचकादुपमानाद्वा परं

क्यच्प्रत्ययः प्ययुज्यते। यथा - पितरमिवाचरति = पित्रीयतीति। दीक्षितपादेनोक्तम् - "उपमानात् कर्मणः सुवन्तादाचारार्थे क्यच्स्यात्। पुत्रमिवाचरति पुत्रीयति छात्रम्, विष्णूयति द्विजम्" इति।

**वार्तिकम्**

**सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च वक्तव्यः**

कण्ठेस्थितः कालोऽस्य कण्ठेकालः इत्यादौ समानाधिकरणत्वादन्यपदार्थप्रधानत्वाच्च बहुव्रीहिः स्थिताद्युत्तरपदलोपार्थं वार्तिककारेण सूत्रं कृतम् - सप्तम्युपमानेति।

सप्तमी चोपमानञ्चेति सप्तम्युपमाने ते पूर्वपदे यस्य तत्सप्तम्युपमानपूर्वपदम्। सप्तम्यन्त्यपूर्वपदविशिष्टसमस्त पदस्योपमानपूर्वपदविशिष्टसमस्तपदस्य च पदान्तरेण सह बहुव्रीहिर्वक्तव्यः। समस्तपदात्मके पूर्वपदे यदुत्तरपदं तस्य लोपश्च वक्तव्यः। यथा - कण्ठे स्थितः कालो यस्य सः कण्ठेकालः। अत्र कण्ठे इति सप्तम्यन्त्यं पदम्। सप्तमी (कण्ठे) पूर्वपदे यस्य तत् सप्तमीपूर्वपदम् (कण्ठेस्थितः) सप्तम्यन्त्यपूर्वपदविशिष्टसमस्तपदं (कण्ठेस्थितः) पदान्तरेण सह (कालः) समस्यते। स बहुव्रीहिसमासः।

किञ्च, उष्ट्रस्य मुखम् उष्ट्रमुखम्। उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखम्। उष्ट्रमुखमित्येतद्बहुव्रीहेः पूर्वपदम् (उष्ट्रमुखम्) तदुत्तरपदस्य मुखशब्दस्य लोपः।

**उपमानात् पक्षात् पुच्छाच्च**

"स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्" (४/१/५४) इति ङीष्'प्रत्ययविधायकस्यास्य सूत्रस्यार्थो भवति - उपधायां संयुक्तवर्णाभावे सति विशेषणरूपेण (उपसर्जनरूपेण) प्रयुक्तस्वाङ्गवाचकशब्दात् स्त्रियां विकल्पे ङीष्प्रत्ययः प्रयुज्यते।

यथा - अतिकेश > अतिकेशी अतिकेश वा। 'केशान्नतिक्रान्ता' इति विग्रहे "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" इति वार्तिकानुसारेण तत्पुरुषसमासे निष्पन्ने जायमानः 'अतिकेश' इति शब्दः स्वाङ्गवाचकः। एषः शब्दः प्राणिसंश्लिष्टत्वात् साकारत्वाच्च स्वाङ्गः तत्पुरुषसमासनिष्पन्नत्वाच्च विशेषणमुपसर्जनं गौणं वेति। अतोऽस्य शब्दस्य स्त्रियां ङीषि 'अतिकेश ङीष् > अतिकेश ई > ("यस्येति च" इत्यनेन शकारस्याकारलोपे) अतिकेशीति शब्दः सिद्धः। पक्षे तु ङीष्प्रत्ययाभावे टापि अतिकेश इति।

'चन्द्र इव मुखं यस्याः सा' इति विग्रहे "अनेकमन्यपदार्थे" (२/२/२४) इति सूत्रेण बहुव्रीहौ 'चन्द्रमुख' इति शब्दात्परं स्त्रियामालोच्यसूत्रेण ङीषि, अनुबन्धलोपे च 'चन्द्रमुख ई >चन्द्रमुखी'ति सिद्धम्। परवर्तिनि "नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च" (४/१/५५) इति सूत्रे नासिकादीनां सप्तस्वाङ्गवाचकानां शब्दानामसंयोगत्वेप्युपसर्जन त्वादुपधत्वाच्च स्त्रीत्वविवक्षायां विकल्पे ङीष्विधानस्योल्लेखोऽस्ति। यथा - दीर्घजङ्घी, दीर्घजङ्घा ; समदन्ती, समदन्ता ; चारुकर्णी, चारुकर्णा इति।

पाणिनीयसूत्रेऽस्मिन् पुच्छशब्दस्योल्लेखो नास्ति। उपसर्जनत्वेऽपि संयोगोपधत्वेऽपि च स्वाङ्गवाचिनः पुच्छशब्दान्तप्रातिपदिकादपि स्त्रियां विकल्पेन ङीष्विधानार्थं वार्तिककारेण सूत्रं कृतं - "पुच्छाच्चेति वक्तव्यम्" इति। उदाहरणम् - कल्याणं पुच्छमस्याः = कल्याणपुच्छी, कल्याणपुच्छा ; शोभनं पुच्छमस्याः = सुपुच्छी, सुपुच्छा।

ततः परं कबर-मणि-विष-शर-इत्येतेभ्यः शब्देभ्यः परं यः स्वाङ्गवाची पुच्छशब्दस्तदन्तादुपसर्जनात् (विशेषणात्) प्रातिपदिकात् स्त्रियां नित्यं ङीष्प्रत्ययविधानार्थमपि सूत्रं कृतं वार्तिककारेण – "कबरमणिविषशरेभ्यो

नित्यम्'' इति। यथा - कबरं (नानावर्णं) पुच्छमस्याः सा कबरपुच्छी मयूरी। मणिपुच्छी खद्योती। विषपुच्छी वृश्चिकी। शरपुच्छी पक्षी (पक्षीविशेषः)।

पक्षशब्दान्तात् परं ''स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्'' (४/१/५४) इति सूत्रेण ङीष्प्रत्ययो न भवति। पुच्छशब्दान्ताच्च ''पुच्छाच्चेति वक्तव्यम्'' इति वार्तिकेन विकल्पेन ङीष्प्रत्ययो विधीयते। उपमानशब्दपरस्थितात् पक्षः पुच्छश्चेति शब्दद्वयात् परं नित्यं ङीष्विधानार्थम् ''उपमानात् पुच्छाच्च'' इति सूत्रं कृतं वार्तिककारेण। उपमानपूर्वपदादपि पक्षान्ताच्चोपसर्जनात् स्वाङ्गवाचिनः प्रातिपदिकान्नित्यं ङीष्प्रत्ययो भवतीति वक्तव्यम्।

उदाहरणम् - उलूकस्य पक्षम् = उलूकपक्षम् ; उलूकपक्षमिव पक्षमस्याः = उलूकपक्षी सेना। उलूकस्य पुच्छम् = उलूकपुच्छम् ; उलूकपुच्छमिव पुच्छमस्याः = उलूकपुच्छी सेना। उलूकपुच्छमिव व्यूहे स्थापित इत्यर्थः। उभयत्र ''सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च वक्तव्यः'' इति वार्तिकेन बहुव्रीहिसमासः।

**महाभाष्यम्**

''उपमानानि सामान्यवचनैः'' इति सूत्रस्य भाष्ये भाष्यकारेणोक्तम् - ''मानं हि नामानिर्ज्ञातज्ञानार्थमुपादीयते - 'अनिर्ज्ञातमर्थं ज्ञास्यामि' इति। तत्समीपे यन्नात्यन्ताय मिमीते तदुपमानम्'' इति। मानम् (प्रमाणम्) अनिर्ज्ञातवस्तुविषयके ज्ञाने प्रयुज्यते। अर्थात् प्रमाणेन हि अनिर्ज्ञातस्य वस्तुनो ज्ञानं भवति। प्रमाणात् ज्ञानस्य सम्पूर्णता प्राप्यते। किन्तूपमाने सादृश्यमात्रस्य बोधो भवति। यथा - 'गौरिव गवयः' इत्यत्र 'गोसदृशो गवय' इत्यर्थबोधो भवति। अत्र गौर्ज्ञातो गवयश्चाज्ञातः। 'गवयो गौर्भवति' इत्येतादृशं सम्पूर्णं ज्ञानं (एकात्मकता बोधः) प्रमाणेनैवोत्पद्यते न तूपमानेन। किन्तु 'गवयो गोसदृशो भवति' इत्यर्थे 'गौरिव गवयः' इत्यत्र ज्ञानस्य सम्पूर्णता न प्राप्यते नापि बोधस्यैकात्मकता वर्तते। एतादृशं सादृशज्ञानमुपमानेनैव भवतीति भाष्यकारस्याशयः।

''उपमितं व्याघ्रादिभिः सामान्याप्रयोगे'' (२/१/५६) इति सूत्रे 'सामान्याप्रयोगे' इति पदस्यावश्यकताविषये आलोचितमस्ति महाभाष्ये। यदा व्याघ्रादिशब्देन पुरुषगतशौर्याद्यर्थो बुध्यते तदा 'पुरुषो व्याघ्रः' इत्यत्र समानाधिकरणत्वात् समासो भवितुमर्हति। यदा प्रकरणादिना नियतसाधारणगुणानां ज्ञानं जायते तदा ''उपमितं व्याघ्रादिभिः सामान्याप्रयोगे''(२/१/५६) इति सूत्रे 'सामान्याप्रयोगे' इति शब्दस्योपस्थितिवशात् समस्यते। यथा - पुरुषो व्याघ्र इव इति। किन्तु गुणान्तरव्यवच्छेदकस्य (विशिष्टसाधारणस्य) गुणवाचकस्य शूरादिशब्दप्रयोगे समासस्य प्रतिषेधार्थं सूत्रे सामान्याप्रयोगे इति पदं गृहीतमभवत्। यथा - पुरुषोऽयं व्याघ्र इव शूरः ; पुरुषोऽयं व्याघ्र इव बलवानिति।

**ममाभिप्रायः**

एतावत्पर्यन्तं येषां ग्रन्था आलोचिता अभवन् ते केऽपि नालङ्कारिकाः, ते वैयाकरणाः काव्यिका वा। शब्दानां यं सम्बन्धमधिकृत्य सूत्राणि रचितानि , सः सम्बन्ध ओपचारिको, न तु वास्तविकः। सदृशयोर्वस्तुद्वयोः सादृश्यम् (उपमा) लाक्षणिकं, न तु अभिधासिद्धम्। यास्काचार्येण स्पष्टमुक्तम् - उपमार्थीयः उपचारः तस्य येन उपमिमीते (निरुक्तम् १/२/१) इति। घनश्यामः पुरुषसिंहः इत्यादिः प्रकृतपक्षे वक्रोक्तिः, वक्रोक्तिरेव शब्दालङ्कारः। यद्यपि व्याकरणं न वैयाकरणानां सौन्दर्य्यबोधप्रकाशस्थानं, तथापि तत्र बहुलांशे एतादृशो बोध आभासितोऽभवत्। ऋषिणा बृहस्पतिना प्रोक्तम् - पाठको वाचं दृष्ट्वापि न पश्यति, श्रुत्वापि न शृणोति। पुनः पाठकविशेषं प्रति तत् स्वरूपे प्रकाश्यते -

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्।
उत त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः ॥ इति।

वक्तव्येऽस्मिन्नधिकतरसौन्दर्यदानेच्छाया ऋषिरुपमां प्रयुक्तवान् - दयितस्य समीपे कामासक्ता कृतप्रसाधना वासनामयी जाया यादृशमात्मानमुपस्थापयति, तथैव वाक् विदुषां पाठकानां समीपे आत्मानं प्रकाशयति। निरुक्तकारस्य मनस्युपमायाः प्रभावो दृश्यते। तेनोक्तम् - प्रकाशनमर्थस्योपमोत्तया वाचा। अस्माभिः 'अलङ्कारः' इत्यनेन य उच्यते सौन्दर्यमयेण शिल्पकर्मणा तस्यावेदनशक्तिः परिवर्धते - इत्येतत् सत्यतया तैः ज्ञातम्।

वैदिककालान्महाभाष्यकालपर्यन्तमलङ्कार उपमा, उपमावयवभूता उपमानोपमितसामान्यधर्माः चास्माभिः लब्धाः। किन्तु काव्यतत्त्वाङ्गीभूतः पारिभाषिकोऽलङ्कारो न प्राप्तो नापि काव्यालङ्कारविशेषोपमा। वैदिकमन्त्रेषु रामायणादिकाव्येषु वा या उपमाः प्रयुक्ता अभवन्, तासूपमासु सादृश्यं सौन्दर्यञ्च प्राप्येते। "सौन्दर्यमलङ्कारः" इति वामनाचार्येणोक्तम्। शब्दशास्त्रे प्राप्ताया उपमाया अर्थः सादृश्यम्। सौन्दर्यव्यतिरेकसादृश्यं प्राप्यते शब्दशास्त्रे प्रयुक्तायामुपमायामिति शम्।

**सहायक-ग्रन्थपञ्जी (Bibliography)**


१। दीक्षितः, भट्टोजिः. २०११ ख्रीष्टाब्दः, *वैयाकरणसिद्धान्तकौमुदी. सं.* - गिरिधरशर्मा परमेश्वरानन्दशर्मा च. कोलकाता : मोतीलाल वानारसीदास.

२। पाणिनिः. २००९ख्रीष्टाब्दः, *अष्टाध्यायी*. सं. - गोपालदत्तपाण्डे. वाराणसी : चौखाम्बा सुरभारती प्रकाशन्.

३। *पाणिनीयम् (२०१२ ख्रीष्टाब्दः). ७म सं.* - प्रबोधचन्द्रलाहिडी-हृषीकेशशास्त्री-प्रद्योतकुमार बन्द्योपाध्यायः . कलिकाता : ढाका स्टुडेण्टस् लाइब्रेरी.

४। चक्रबर्ती, श्यामापदः. २०१५ ख्रीष्टाब्दः. *अलङ्कार चन्द्रिका* . कलकाता : कृताञ्जली प्रकाशनी. *(बङ्गभाषायाम्)*.

५। *Procedings of National Seminar on Contribution of the Paninian Scool in the arean of Sanskrit Studies*, Organised by Dept, of Sanskrit - Ramakrishna Mission Vidyamandira ; in collaboration with The School of Vedic Studies – Rabindrabharati University, 2009.

६। Yaska. 2005 . *Nirukta (with Bengali Translation and Notes).* Ed. Amareswara Thakur. Kolkata : University of Calcutta. *( Bengali ).*

७। पतञ्जलिः. २०१९ ख्रीष्टाब्दः, *व्याकरण-महाभाष्यम्*. अनुः - चारुदेवशास्त्री. कोलकाता : मोतीलाल बनारसीदास. *(हिन्दिभाषायाम्)*.

८। *वार्तिक-प्रकाशः* (१९९३ ख्रीष्टाब्दः).व्याख्या. - आनन्दप्रकाशमेधार्थी. वाराणसी : चौखम्भा संस्कृत संस्थान.

९। भर्तृहरिः. २०१५ ख्रीष्टाब्दः, *वाक्यपदीयम्*. सं. - हरिनारायणतिवारी. वाराणसी : चौखम्भा संस्कृत सीरीज अफिस.

१०। पतञ्जलिः. २०१४ ख्रीष्टाब्दः, *व्याकरणमहाभाष्यम्. सं.* - शिवदत्तशर्मा. दिल्ली : चौखम्भा संस्कृत प्रतिष्ठान.

११। वेदव्यासः. १९८८ ख्रीष्टाब्दः, *श्रीमन्महाभारतम्*. दिल्ली : नाग पाब्लिशार्स.

१२। वाल्मीकिः. २००५ ख्रीष्टाब्दः, *श्रीमद्वाल्मीकीयरामायणम्*. २य सं. - दिल्ली : राष्ट्रीय संस्कृत संस्थान.

१३। वाल्मीकिः. १९९० ख्रीष्टाब्दः, *श्रीमद्वाल्मीकीयरामायणम्*. दिल्ली : नाग पाब्लिशार्स.

१४। *ऋग्वेद-संहिता*.(२००० ख्रीष्टाब्दः). कलकाता : हरफ प्रकाशनी. (बङ्गभाषायाम्).

१५। *उपनिषद : अखण्ड संस्करण* (२०००ख्रीष्टाब्दः), सं. - अतुलचन्द्रसेनः- सीतानाथ तत्वभूषणः- महेशचन्द्रघोषः. कलिकाता : हरफ प्रकाशनी. (बङ्गभाषायाम्).


Received on 27. 04. 2017 Accepted on 17. 07. 2017

# Multifarious Uses of Languages by Women and Men Characters in Sanskrit Dramas- An Analysis.

**Sovan Chakraborty***

**Abstract:**

Equality does not mean that women and men will become the same. It means that the equal rights, responsibilities, spoken language and opportunities of individuals will not depend on whether they are born male or female. Equality between women and men has a qualitative aspect. Now a day's equality between women and men is seen both as a human rights issue. For long long ages injustice, cruelty and torture to women have been prevalent there in our patriarchal society. In all places, particularly in dramas, the women folk have been neglected, subjugated and underestimated. They are not given importance in social infrastructure. They are not even given the scope of speaking the 'Language'. Here 'Language' refers to the sophisticated Sanskrit language of the so called elite class society. In this chapter, I shall try to focus on those unnoticed features highlighting the discriminatory attitude to women as reflected in the dramas. At the same time I shall also try to figure out that the position of women is not always neglected; rather they have competed beautifully with the male characters and ventured to carve their own position in the midst of several dominant male characters. I have also made an effort to show the fact that the male characters have not always been created following the rules of dramaturgy (Naṭyaśāstra) or even their social standard, position , pattern of speech (dialogue) have been declined remarkably.

**Keywords** : Equality, Languages, Women, Men, Dramaturgy, Nāṭaka, Rūpaka, Uparūpaka.

**Introduction**

The form of literature which is related to the elite and erudite people of the royal court is Epic. However, the tale of common people is generally reflected through that form of literature which is popularly known as 'Drama'. India has the longest and the richest tradition in drama. Moreover drama is a prismatic literary genre reflecting the multitudinous aspect of human life and an expression of the religious impulse

** Contractual Full Time Lecturer, Department of Sanskrit, University of Kalyani.*

of the society. First of all, I should like to say that the Sanskrit synonym for drama is *R*ūpaka and not *Nāṭaka*, the later being a variety of the former which has a more comprehensive import. Writers on ancient Indian dramaturgy have classified Sanskrit drama into two types i.e. major popularly known as *Rūpaka*, which is again ten kinds and the minor one, which is eighteen types. *Nāṭaka* is one of the important varieties of *R*ūpaka.

First of all, let us discuss the similarities and dissimilarities of the male and female characters regarding their application of language in Drama. In a play we are confronted with three kinds of female character like male characters i.e. 'E¨ÉqÉ-qÉkrÉqÉ-AkÉqÉ'*(Uttama –Madhyama –Adhama)*. In both cases the male & female characters do not speak in same language. This is due to the different social status or position of the characters. Such variety of selection and application of language or phrases make the characters belonging to the different classes of society appear lively and realistic. Thus through the selection and application of various kinds of language of different male and female characters, the dramatist wants to show us a varied range of diverse culture lying in various sections of society.

Bharata's *N*āṭyaśāstra is the earliest (the third century A.D is the generally accepted date of *N.*Ś) composition in Sanskrit dramaturgy, which presents a wide spece trum of dramatic idioms covering the whole world beginning with non-human beings and ending with divine beings. Bharata in his chapter xviii, called Bhāṣā-vidhāna says that the languages to be used in drama are four kinds, such as *atibhāṣā*, ā*ryabhāṣā* , *j*ātibhāṣā and *j*ātyantarī *or yonyantarī.* He says that-

'अतिभाषार्यभाषा च जातिभाषा तथैव च । तथा योन्यन्तरी चैव भाषा नाट्ये प्रकीर्तिता[1]'॥

Of these four languages, atibhāṣā- is for the gods, āryabhāṣā is for the Kings or noble beings. The jātibhāṣā has various forms which contents many words of Barbarians (Mleccha) origin and is spoken in Bhārata-varṣa and yonyantarī bhāṣā- is the language for the beings belonging to other living species, even the lower animals.

'अतिभाषा तु देवानामार्यभाषा तु भूभुजाम्। संस्कारगुणसंयुक्ता सप्तद्वीपप्रतिष्ठिता ॥
द्विभाषा जातिभाषा च प्रयोगे समुदाहृता । म्लेच्छदेशप्रयुक्ता च भारतवर्षमाश्रिता ॥
अथ योन्यन्तरीभाषा ग्राम्यारण्यपशूद्भवा। नानाविहङ्गजा चैव नाट्यधर्मी प्रयोगतः[2]'॥

He further describes seven deśabhāṣās, regional languages, as Śaurasenī,

1 *Nāṭyaśāstra.* Chapter-xviii *Bhāṣā vidhāna*, Sloka – 26.
2 *Ibid* …. Śloka – 27, 28, 29.

Māgadhī, Avantikā, Prācyā, Ardhamāgadhī, Bāhīkā, and Dākṣiṇātyā. All these names show the regional basis of this classification. Thus –

'मागध्यवन्तिजा प्राच्या शौरसेन्यर्धमागधी ।वाल्हीका दाक्षिणात्या च सप्त भाषाः प्रकीर्तिताः[3]'॥

The jātibhāṣā has two different forms, one is Sanskrit (Saṃskrta) and the other Prākrta.

'जातिभाषाश्रयं पाठ्यं द्विविधं समुदाहृतन्। प्राकृतं संस्कृतं चैव चातुर्वर्णसमाश्रयम् [4]'॥

According to the orthodox view, Sanskrit which is the dominant language of India for a period covering over four thousand years, generally divided into Vedic and Classical. In the Vedic language was written the entire sacred literature of the Aryan Indians. Phonetically Vedic and Classical languages are identical, but grammatically they differ. Again they differ with regard to the use of metre and accent and also use of prefixes etc. Classical Sanskrit is that vernacular, which was "refined", "rendered fit" by the grammatical rules of Panini, while the dialect Prākṛta is derived from the word 'Prakṛta', which means 'the basic forms', viz. Sanskrit[5]. However European scholars says that prākṛta , which represents the Middle Indian period of the Indo-Aryan languages , may again be sub–divided into three stages, such as Old Prākṛta or Pali, Middle Prākṛta and late Prākṛta or Apabhraṃśa. According to Patanjali, Sanskrit was a spoken language but it was confined to the cultured section of the people, while the popular dialect of India was known by the general name of Prākṛta. Moreover Prākṛta stands for a group of vernaculars initially spoken by different communities settled in different parts of ancient India which were later systematically formalized by grammarians and developed into literary idioms. Sanskrit was tied down by rules of grammar and became almost a fixed language, while Prākṛta were still freely breathing. From the distribution of languages in Sanskrit dramas it appears that the masses while speaking prākṛta, could understand Sanskrit. That's why it has been said by Bharatta in his *Nāṭyaśāstra* that Prākit and Sanskrit are different branches of one and the same language.

'एतदेव विपर्यस्तं संस्कारगुणवर्जितम्। विज्ञेयं प्राकृतं पाठ्यं नानावस्थान्तरात्मकम् [6]'॥

In the beginning Saṃskṛta and some Prākṛtas were very much similar in form,

3 *Ibid* … Śloka – 47.

4 *Ibid* …. Śloka – 30.

5 प्रकृतिः संस्कृतम्, तत्र भवं ततः आगतं वा प्राकृतभाषा ।

6 *Nāṭyaśāstra.* Chapter-xviii , *Bhāṣā vidhāna*, Sloka – 2.

almost like twin sisters. They deviated from each other in course of time.

India is gratified with a rich collection of literature both in Sanskrit and Prakrit. Sanskrit dramatic literature is compact with poetic features, garnished with literary, imaginary, legendary elements and full of literary apparatus and ornaments of all categories. Even it provides some historical information. Furthermore, the stories that the plays dramatize tend to reinforce upper-class authority and values. At first glance, the Sanskrit dramas seem to be very exclusive. Though Sanskrit was the vernacular of the educated people, it was understood and used as conversational language in wider section of society. In Dramatic literature we can see that the most elite characters in the plays- brāhmaṇas, divine beings, kings and ministers speak Sanskrit while other characters like soldiers, merchants, town people etc. and most women characters speak a variety of colloquial languages referred to, collectively, as Prakrits, except that Nuns and Courtesans occasionally converse in Sanskrit. Uneducated Brāhmaṇas are introduced speaking popular dialects. These statements accomplished by the fact that characters occupying the stage together, and carrying on conversations with each other are very often speaking different languages. But it is highly significant that dialogues between Sanskrit-speaking and Prakrit-speaking persons are very frequent and this suggests that in real life Sanskrit was understood by those who would not speak it themselves. For example, citizens from every part of India speak their own languages (regional languages) and are understood by others when they communicate in daily life. Though none of them attempts to speak what is not his mother tongue. So Drama is the only form of classical Indian literature which is a multilingual composition. Dr. T.N. Dave refers to the view of A. Weber who accounts for this multilingualism as "due to the existence of high degree of social stratification existing in Indian society of the time when dramatic literature came into existence in India". Multilinguality is, in fact, not unusual.

The theory of drama as laid down in the *Nāṭyaśāstra* prescribed regarding the uses of languages for those characters who are performing in the Drama. But there are so many exceptions in use of language amongst the woman characters. In Sanskrit drama, both in theory and practice, Śaurasenī and Māgadhī Prākṛta is spoken by female characters, Vidūṣaka, children etc. Māhārāṣṭrī is yet another variety of Prakrit employed for songs of female characters. But sometimes, the women characters of Sanskrit drama are found speaking Sanskrit in various ways. In respect of this

exception many female characters exceed the men characters. For example, in the drama *Abhijñāna-śakuntala* of Kālidāsa, the famous female character Priyaṃvadā speaks Sanskrit verse as quotation in the fourth act of the drama like -

'दुष्यन्तेनाहितं तेजो दधानां भूतये भूवः। अवेहि तनयां व्रह्मन्नग्निगर्भां शमीमिव [7]'॥

Anyone from the critics can ask me that the quote is not her own. But there is a question from the researcher towards the conscious readership that if someone does not know anything about a language then how can she /he remembers the entire details? Is that very easy? Therefore, it is quite clear that Priyaṃvadā has the efficiency to converse in Sanskrit.

We can see another female character in the nāṭaka of Kalidasa's *Vikramorvaśīya*, named Nipunikā formally known as Cetī. However she is a companion cum servant of kāsirajputrī and always converses in Prākr̥ta, she is literate enough. As we find in the mentioned nātaka by order of kāsirajputri, she recited the writing of Ūrvasī's bhūrjropatra promptly.

"देवि ट्ट अनुवाचय तावदेतत् यद्यविरुद्धं ततः श्रोष्यामि।
निपुणिका ट्ट भट्टिनि , तदेव कौलिनमेव प्रतिभाति. भर्तारमुद्दिश्योर्वश्याः काव्यबन्ध इति तर्कयामि।
आर्यमाणवकप्रमादेनावयोर्हस्तं गत इति। ( निपुíhÉका राज्ञा पूर्ववाचितं वाचयति )" [8] ।

Again in Harṣa's play *Priyadarśikā* in four acts, there is a wonderful creation of female character, named Sānkr̥tyāyanī. She is a childhood friend of Vāsavadaṭṭa. In this drama (nāṭaka) she is raised as a poet, dramatist and also as an educated sophisticated woman. The reader is astonished to see how she is talking in Sanskrit at her own vanity. She has mastery in dramaturgy as well as in dharmaśāstra. As we see in the above mentioned play Sānkr̥tyāyanī staged a drama composed by herself .She supports the gāndharva-vivaha exhibited at garvaṅka in the 3rd act of the mentioned nāṭaka. Such as follow:

'राजपुत्रि धर्मशास्त्रविहित एष गान्धर्वो विवाहः किमत्र लज्जास्थानम् [9] '। इति ।

*Mr̥cchakaṭika* of Sudraka (The Little Clay Cart) is a beautiful drama full of vitality. *It depicts the love between a beautiful, intelligent courtesan Vasantasena and a poor Brahmin Charudatta. The characterization is remarkable, with even minor characters having a distinct personality. The scenes are well-laid out and there are poetic*

7 *Abhijñāna-śakuntala*. Act- 4.

8 *Vikramorvaśiya*. Act- 2

9 *Priyadarśikā*. Act - 4.

*descriptions of beauty. Vasanttasena is portrayed as an ideal thoroughbred woman of the town. Though she lives in a vulgar society, she has a broad heart, human emotions and knows how to love someone devotedly. She wants to be a house wife and also a mother. In this drama she uttered Sanskrit in two cases. Firstly in the fifth act when she converses with Vitā to describe the beauty of rainy season, she uses eleven verses and secondly in act eight she recites two verses with face bent down while accusing śakāra. Such as:*

‘ मूढे निरन्तरपयोधरया मयैव् कान्तः सहाभिरमते यदि किम् तवात्र ।

मां गर्जितैरिति मुहुर्विनिवारयन्ती मार्गं रुणद्धि कुपितेव निशा सपत्नी ॥[10]’ इत्येवम्॥

‘खल! चरित–निकृष्ट! जातदोषः कथमिव मां परिलोभसे धनेन ।

सुचरितचरितं विशुद्धदेहं न हि कमलं मधुपाः परित्यजन्ति ॥[11] ’इति ।

‘यत्नेन सेवितव्यः पुरुषः कुलशीलवान् दरिद्रोऽपि । शोभा हि पणस्त्रीणां सदृशजनसमाश्रयः कामः[12] ॥’ इति ।

acters. Vasantasena, the courtesan is at the pinnacle of intense passion and emotion. So while conversing with Vita, Vasantasena presents consecutive pictures of the beauty of rainy season and describes the importance of love to a whore, through glorified Sanskrit language. Hence, language and emotion have been well amalgamated to create a real artistic beauty. However, the drama *Mṛcchakaṭika* adopted a multilingual composition using both Sanskrit and the many Prākṛits – the languages of the people. The surveys by K.R. Chandra and T.N.Dave show that 50% of the text of Sanskrit dramas appears in different Prākṛits. The *Mṛcchakaṭika* has the maximum number of Prākṛts, about 15, spoken by about 32 characters. Bharata's *Nāṭyaśāstra* provides some guide lines here. Generally women and persons of low rank speak in Prākṛta. But the queens, courtesans and female artists in some special situations may speak in Sanskrit. As follows:

‘राज्याश्च गणिकायाश्च शिल्पकार्यास्तथैव च। कार्यावस्थान्तरकृतं योज्यं पाठ्यन्त संस्कृतम् ॥ [13]’

Pṛiṭhidhara in his commentary of *Mṛcchakaṭika* occasionally supports above with this explanation, such as –

‘कार्यतश्चोत्तमादीनां कार्यो भाषा व्यतिक्रमः’ – इति भरोक्त्यनुसारेण वसन्तसेनायाः संस्कृतोक्तिः[14]’।

Moreover there are so many examples in Sanskrit dramas where the minor and major, even personified female characters speak Sanskrit in different times and

10 *Mṛcchakaṭika* . Act 5, Śloka 15.

11 *Ibid* . Act 8 , Śloka -31

12 *Ibid* . Act 8, Śloka- 32

13 *Nāṭyaśāstra.* Chapter-xviii, *Bhāṣā vidhāna*, Śloka -36.

14 *Mricchakaṭika.* ed by M.R.Kale. Page -119, M.L.B.D.

ways. Kalāvatī, a woman character of *Mālavikāgnimitra* of Kālidāsa, speaks Sanskrit. Pravrajika, the learned and noble lady, uttered Sanskrit in the 3rd act of the same drama.

Women, even of the noble class, speak Śaurasenī (the predecessor of Hindi), such as the character of Draupadī in the Mahabharata based play *Venisaṃhāra*.

Above all the most significant examples are found in the drama *Uttararāmacrita* of Bhavabhūti. The *Uttararāmacarita* is one of those few plays in Sanskrit literature which is compared with the best plays of any other nation and for this play the author fixed himself in world-wide fame as a dramatist and secured a very high rank among the master minds of the world. In this drama Tamasā, Muralā, the two sacred rivers are personified as woman characters who uttered Sanskrit instead of Prakrit. Vasanti, the *Vanadevi* and Arundhati, the female sage of the same drama uttered all verses and dialogues in Sanskrit only. So in Sanskrit drama there are so many instances of female characters, those are learned, dignified, sophisticated, and simple virtually exceeds typical female limitations. Finally we may state that, their involvements, activities, dealings with each other, status are responsible to gain respect from the society. In spite of this, females are not ignored entirely. So there are many female characters in so called Sanskrit drama who are glowing remarkably by dint of their capability, efficiency and genuineness.

Again the theory of drama as laid down in the *Nāṭyaśāstra* prescribes the use of Sanskrit by male characters belonging to noble class, learned and educated. Such as all characters of dhīralalita, dhīroddhata, dhīrodātta and dhīrapraśānta types should speak in Sanskrit language. As follows:

'धीरोद्धते धीरललिते धीरोदात्ते तथैव च । धीरप्रशान्ते च तथा पाठ्यं योजं तु संस्कृतम् ॥ [15]'

But in the play of *Vikramorvaśīya* of Kalidasa, Purūrava who was a king and also an *uttama dhīroddhata* character, uses so many Māhārāṣṭrī prākṛta and Apashaṃśa verse and dialogue in the forth act of this mentioned play. Actually in the 4th act the noble king Purūrava voiced 27 songs, 16 of which are used to narrate king's condition by poet Kalidasa. Here we can confront with a lyrical atmosphere. For that lyricism the 4th act of the play is technically categorized as a 'Troṭaka' in terms of dramaturgy. Few of the songs are sermonized in Māhārāṣṭrī prākṛta and some of them are amal-

15 *Nāṭyaśāstra.* Chapter-xviii , *Bhāṣā vidhāna*, Śloka - 31

gamated in Māhārāṣṭrī prākṛta and Apashaṃśa. These songs are the purest exhibition of older era's dialect.

Now here is a question, the king who is an elevated character; how can he use the Prākṛta and Apashaṃśa in substitute of Sanskrit? Here we can say that, when Purūravā lost nymph Urvasi then his glory of life is spoiled and there left nothing for showing his pride. He then has no difference with a common man. So Kalidasa, the universal poet, offers Prakrit (a language of common man) in his voice. Moreover, here the poet depicts king's love as a romantic unbridled passion leading to madness. So the Fourth act of the drama reaches the zenith of lyrical exuberance in Purūravā's soliloquy in search of the beloved in the lap of nature.

There is another male character in the Sanskrit play *Mudrārākṣasa* of Viśākhadatta, named Virādhagupta. He was a secret agent to Minister Rākṣasa, speaks Prākṛta in public, but switches to Sanskrit when speaking to himself or in private conversation with the Minister.

According to Nāṭyaśāstra, Bharata informs that all the characters of superior classes maddened with the pride of wealth and overwhelmed with poverty should speak in Prākṛta, not in Sanskrit. Such as:

'ऐश्वर्य्येण प्रमत्तस्य दारिद्येण प्लुतस्य च । उत्तमस्यपि पठतः प्राकृतं संप्रयोजयेत् [16]'॥

When we go through the play Pañcarātra of Bhāsa,which is of the samavakāra type, based on the theme of the Mahābhārata, we find there that Arjūna in the disguise of Bṛhannalā speaks in Prākṛta. Such as follows:

बृहन्नला ट्ट जेदु भट्टा । ( जयतु भर्ता ।)
राजा ट्ट अकारणं रूपमकारणं कुलं महत्सु नीचेषु च कर्म शोभते ।
इदं हि रूपं परिभूतपूर्वकं तदेव भूयो बहुमानमागतम् ॥ 2 /33
बृहन्नले ! परिशान्तमपि भवतीं भूयः परिश्रमयिष्ये। उच्चतां रणविस्तरः।
बृहन्नला ट्ट सुणादु भट्टा । ( शृणोतु भर्ता।)
राजा ट्ट ऊर्जितं कर्म । संस्कृतमभिधीयताम् ।
बृहन्नला – श्रोतुमर्हति महाराजः ।[17]"

Here the same question arises why Arjūna, the noble one converses in Prākṛta

16 *Nāṭyaśāstra.* Chapter-xviii , *Bhāṣā vidhāna*, Śloka - 33

17 Bhāsa . *Pañcarātraṃ*. Ed by Krishnagopal Goswami, 2nd Act, page 189-190.

with king Virāṭa. Is there any dramatic intention? If so what is this? Now we can state that in this mentioned drama poet portrays the famous historical character Arjūna (The madhyama paṇḍava) as a neuter (formally known as Bṛhannalā). So as a common person he converses Prākr̥ta while he meets first time with Virāṭa. When the king requests him to describe the heroic picture of the vigorous war in Sanskrit, he presented it properly. The reason is that events of any warfare are full of grave seriousness which cannot be promptly expressed in Prākr̥ta but in Sanskrit. Moreover, the dramatist probably gives Prākr̥ta to Arjun's lips as he plays the role of Bṛhannalā, a neglected character. That's why Arjūna uses two different languages at the same time. This dramatic intention has been implied by the author, according to my observation.

The theory of drama as laid down in the Bharata's Nāṭyaśāstra informs, sometimes according to necessity, use of Prākr̥ta language is quite justified. These are -

'एषामेव तु सर्वेषां नायकानां प्रयोगतः। कारणव्यपदेशेन प्राकृतं संप्रयोजयेत् [18] '॥

Moreover there are so many examples in Sanskrit dramas where the minor male characters speak Sanskrit and so many various dialects in different circumstances. Alike in the drama

*Mr̥cchakaṭika* the minor characters Vita, Śarvilaka, Dardūraka speak Sanskrit. In the drama *Uttararāmacarita* Śambūka (belonging śudra caste), Lava (son of King Rama),Vaṭava converse in Sanskrit etc. These cases are resisting the rules of *Nāṭyaśāstra*. Like –

'व्याजलिङ्गप्रतिष्ठानां श्रमणानां तपस्विनाम् । भिक्षुचक्रचराणाञ्च प्राकृतं संप्रयोजयेत्॥
वाले ग्रहोपसृष्टे च स्त्रीणां स्त्री प्रकृतौ तथा । नीचे मत्ते सलिङ्गे च प्राकृतं पाद्यमिष्यते [19]'॥

In accordance with their social position, the various characters in a Sanskrit play speak different dialects. Sanskrit is employed only by heroes, kings, Brahmans, and men of high rank; Prākr̥ta by all women and by men of the lower orders. Distinctions are further made in the use of Prākr̥ta itself. Thus women of high position employ Mahārāshtrī in lyrical passages, but otherwise they, as well as children and the better class of servants, speak Saurasenī. Māgadhī is used, for instance, by attendants

18 *Nāṭyaśāstra.* Chapter-xviii , *Bhāṣā vidhāna*, Śloka -32

19 *Ibid.. Śloka* -34-35.

in the royal palace, Avantī by rogues or gamblers, Abhīrī by cowherds, Paiśāchī by charcoal-burners, and Apabhraṃśa by the lowest and most despised people as well as barbarians.

Last but not the least, I must say this distribution of dialects over dramatic characters is observed and examined critically in this paper. After examining this, I observe that the questions of sex, prestige, learning, characters with cultural background and social status are involved while distributing the dialects in the stage. I make this explanation for the reason that without it many readers would suppose that all these characters were trying to speak alike and they had no discrimination in using language. Prof. C. Rajendran, Sanskrit scholar and linguist, examines his observations on socio-linguistic problems in Naṭyaśāstra as follows-

"Social hierarchy and power structure are reflected in the elaborate protocols and modes of addresses prescribed in the Naṭyaśāstra. We have an elaborately worked out social hierarchy in Sanskrit drama...the language used by the diverse elements of this vast social hierarchy gives us an idea of their social identity in general manners.[20]"

**Reference Bibliography:**


Bharata. Nāṭyaśāstra. Ed. Manomohan Ghosh. The Nāṭyaśāstra. Nāṭyaśāstra.*Vol.*1 Calcutta (now kolkata): Manisha Grathalaya Pvt. Ltd., 1995. (2nd ev.ed.;1st ed. 1961).

---. Ed. Ramakrishna Kavi. (4 vols.) Baroda (Now Vadodara): Oriental Institute, 1934.

Bhāsa. Pañcarātraṃ. Ed by Krishnagopal Goswami. Kolkata: Sanskrit Madhyaśikṣa Parṣad,1986.

Bhavabhūti, *Uttararāmacarita*. Ed. P.B.Sastri. Ghate (with *Bhavabhutarthabodhikā Ṭīkā)*, Nagpur: Nyāyasudhā Press, 1995.

Bhattarcharya. Syamapada . *An Evolution of The Topics Of Sanskrit Dramaturgy.* kolkata: Sanskrit Pustak Bhander, 2005.

De, S.K. *A History of Sanskrit literature* (vol.1, Classical period). Calcutta (now Kolkatta): University of Calcutta, 1947.

Kālidāsa, *Abhijñanaśakuntala.* Ed.with Rāghavabhaṭṭa's commentary M.R.Kale .Delhi /


20 *Understanding Tradition, Inter-disciplinary Studies on Sanskrit by C. Rajendran, page -45.*

Patna / Varanasi: MLBD.1969.

---.*Vikramorvaśīya.* ed. Shankar.P.Pandit. Bombay (now in Mumbai): Government Central Book Depot, 1879.

---. *Kālidāsa-Granthavali*. ( 3 Vols). Ed. Rajendranatha Vidyabhushana. Calcutta (Now Kolkata).1975.

---. *Kālidāsa-Granthavali.* Complete works of Kalidasa. Ed. Revaprasad Dwivedi. Varanasi: 1986.

---. *Mālavikāgnimitra*. Ed. Narayan Acharya. Bombay (Now Mumbai): NSP, 1950 (9th ed.).

Rajendran,C. *Understanding Tradition, Inter-disciplinary Studies on Sanskrit*. Calicut: University of Calicut, 2004.

Sastri. Gaurinath. *A concise History of Classical Sanskrit Literature.* Varanasi: MLBD.1974.

Śudraka. *Mr̥cchakatika*. Ed. Satya Ranjan Banerjee. Kolkata: Sanskrit Pustak Bhandar, 2013.

---. *Mr̥cchakaṭika.* ed. M.R.Kale. Varanasi: MLBD. 1970.

Viśākhadatta, *Mudrārakṣasa.* ed. Jīvānandavidyāsāgara. Calcutta (now Kolkata): Bācaspatyaṃ Press, 1935.

Viśwanāth, Sāhitya-darpaṇa, ed. Karunākar kar (with *Locana* and *Vijñapriya* two old Commentaries).Lahore: MLBD.1938.

Warder, A.K. *Indian Kavya Literature*.(6 Vols). Delhi/Varanasi/Patna: Motilal Banarsidass, 1969.

Received on 03. 05. 2017 Accepted on 17. 07. 2017

# वेदान्तेषु भाष्यकृत्पञ्चकदृष्ट्या जीवस्वरूपविमर्शः

**विपत्तारण-रुइदासः ***

समेषामेव भारतीयदर्शनानाम् अनावृत्तिप्राप्तिर्हि परमं चरमञ्चलक्ष्यम्। सा चानावृत्तिः मोक्षो वा वेदान्तिनां नये ब्रह्मज्ञानेनैव सम्भवति। 'तमेव विदित्वा अतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय', 'ब्रह्म वेद ब्रह्मैव भवति','ब्रह्मसंस्थोऽमृतत्त्वमेति'चेत्यादीनि श्रुतिवाक्यान्यत्र मानम्। ब्रह्मतत्त्वमिदम् उपनिषदि निहितम्। अतो ब्रह्मविद्या इति उपनिषदः अपराभिधानम्। उक्तञ्च श्रीमच्छङ्करभगवत्पादैः –'सेयं ब्रह्मविद्या उपनिषच्छब्दवाच्या' इति।

श्रुत्यभिधाना वेदा उपनिषदश्च वेदान्तस्य आधारभूताः। वेदो हि भारतीयानां सर्वमान्यः प्रामाणिकग्रन्थः। वेदशब्दस्य ज्ञानवाचके रूढित्वात् वेदस्य चरमविकासो यत्र दृश्यते स वेदान्तः। अथवा वेदस्य अन्तः सारभागो हि वेदान्तः। मुख्यतया उपनिषत्, ब्रह्मसूत्रं, श्रीमद्भगवद्गीतादिशास्त्रञ्च वेदान्तशब्देन व्यपदिश्यते। एतद्विहाय यत्र यत्र ब्रह्मसाक्षात्कारस्वरूपमोक्षस्य साधनीभूतविवेकवैराग्यादीनां विशेषचर्चा परिलक्ष्यते तत्सर्वमेव वेदान्तपदेनोच्यते। अस्य सिद्धान्तस्य वेदसारभूतत्वं मुक्तिकोपनिषद्याम्नातं-

"निःश्वासभूता ये विष्णुर्वेदा जाताः सुविस्तराः।
तिलेषु तैलवद् वेदे वेदान्तः सुप्रतिष्ठितः।।"[1] इति।

वेदान्तं प्रतिपादयता सदानन्दयोगीन्द्रेणोक्तं- 'वेदान्तो नाम उपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च'[2] इति।

वेदान्तशास्त्रे उपनिषदः श्रुतिप्रस्थानमिति श्रीमद्भगवद्गीता स्मृतिप्रस्थानमिति ब्रह्मसूत्रं च न्यायप्रस्थानं सूत्रप्रस्थानं वेति व्यपदिश्यन्ते। वेदान्ताचार्याणां प्रस्थानत्रयभाष्यरचनावसरे वैमत्यवीक्षणात् द्वैताद्वैतविशिष्टाद्वैतद्वैताद्वैतशुद्धाद्वैतादयो वेदान्तशाखा आविर्बभूवुः। तत्र श्रीमच्छङ्कराचार्यस्याद्वैतवादः, रामानुजाचार्यस्य विशिष्टाद्वैतवादः, निम्बाकाचार्यस्य द्वैताद्वैतवादः, मध्वाचार्यस्य द्वैतवादः, वल्लभाचार्यस्य शुद्धाद्वैतवादः। सत्सु अपि अनेकसम्प्रदायेषु समेषां विषयस्तावत् जीवब्रह्मणोरैक्यम्। अतः को नाम जीवः किं वा जीवस्वरूपं तदादौ ज्ञेयम्। प्रस्तुतेऽस्मिन् प्रबन्धे मुख्यतः शङ्कररामानुजनिम्बार्कमध्ववल्लभानां दृष्ट्या जीवस्वरूपं प्रतिपिपादयिष्यते।

चिदानन्दस्वरूप आत्मैव अनाद्यविद्यावशात् सूक्ष्मस्थूलशरीरेन्द्रियावच्छेदेन अनवच्छिन्नोऽपि अवच्छिन्न इव, स्वभावतोऽसीमानन्तसत्त्वेऽपि ससीम इव, अभिन्नोऽपि भिन्न इव, अकर्तापि कर्तेव, अभोक्तापि भोक्तेव, अविषयोऽपि अस्मत्प्रत्ययविषयः इव जीवरूपेणावभासते। जीवोऽयं ब्रह्माग्नेः स्फुलिङ्गः, ब्रह्मसिन्धोर्बिन्दुमात्रमेव। तथाह्याम्नातं

माण्डूक्योपनिषदि-

"यथा सुदीप्तात् पावकाद्विस्फुलिङ्गाः सहस्रसः प्रभवन्ते सरूपाः।
तथाक्षराद् विविधाः सौम्य भावाः प्रजायन्ते तत्र चैवापि यन्ति।। इति।

---

1 *मुक्तिकोपनिषत्*-१.९

2 सदानन्दयोगीन्द्रः. *वेदान्तसारः*.सम्पा. विपदभञ्जनपालः- पृ-१९

* शोधच्छात्रः, कलिकाताविश्वविद्यालयस्य

महर्षिणा बादरायणेन तदीयब्रह्मसूत्रग्रन्थस्य द्वितीयाध्यायस्य तृतीयपादे जीवस्वरूपमालोचितम्। अथ जीवविषये भाष्यकाराणां प्रातिस्विक-मतसंक्षेपोऽधस्तादुच्यते-

**जीवस्य नित्यत्वविचारः**

'जीवापेतं वाव किलेदं म्रियते न जीवो म्रियते', 'अजो नित्यः शाश्वतोऽयं पुराणः'इत्यादिषु श्रुतिषु जीवस्य नित्यत्वमजत्वञ्च प्रतिपादितम्। किन्तु लोके दृश्यते यद् 'देवदत्तो जातो मृतश्च' इति। एवं लौकिकव्यवहारेणास्य विरोधादत्र समाधानतयोच्यते यद् जन्ममरणादि वस्तुतो जीवात्मनः शरीरविषयकमेव। तथा च बादरायणसूत्रं- 'चराचरव्याप्याश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्'[3] इति। सूत्रस्यास्य शङ्करनिम्बार्कबल्लभाचार्यैस्तु अक्षरशः एवार्थः प्रतिपादितः।

ननु'यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रसः प्रभवन्ते सरूपाः।

तथाक्षराद् विविधाः सौम्य भावाः प्रजायन्ते तत्र चैवापयन्ति।।'[4] इत्यादयः श्रुतयो जीवात्मनः उत्पत्तिं प्रलयञ्च प्रतिपादयन्ति, जीवो हि ब्रह्मणो विभक्त इति विकारः इति चेदत्रोच्यते 'एको हि देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा'[5]इत्यादिभिः श्रुतिभिः स्पष्टीकृतं यत् यथा आकाशस्य विभागो घटादिसम्बन्धेन भासते तथैव बुद्ध्याद्युपाधिसम्बन्धेन जीवोऽयं प्रविभक्तः इति प्रतीयते। तथा च सूत्रं -'नात्मश्रुतेर्नित्यत्वाच्च ताभ्यः'[6] इति। शङ्कर-निम्बार्काचार्याभ्यां सूत्रस्यास्य 'न आत्मा अश्रुतेः' इति पदच्छेदः कृतः, रामानुजमध्ववल्लभाचार्यैस्तु 'न आत्मा श्रुतेः' इति। किन्तु सूत्रार्थ उभयत्र समानः।

**जीवस्य ज्ञानत्वविचारः**

जीवः चिद्रूपोऽचिद्रूपो वा। शङ्कराचार्यनये तु जीवः चिद्रूपः। सूत्रञ्चात्र 'ज्ञोऽतएव'[7] इति। तन्नये 'ज्ञः' नित्यचैतन्यः अयमात्मा, 'अतएव' यस्मादेव नोत्पद्यते। परम् एव ब्रह्म अविकृतम् उपाधिसम्पर्कात् जीवभावेन अवतिष्ठते। परस्य हि ब्रह्मणः चैतन्यस्वरूपत्वं 'विज्ञानमानन्दं ब्रह्म', 'सत्यं ज्ञानमनन्तं ब्रह्म', 'अनन्तरः अबाह्यः कृत्स्नः प्रज्ञानघनः एव' इत्यादिषु श्रुतिषु प्रतिपादितम्। तथा सति परं ब्रह्मैव जीवस्तस्माज्जीवस्यापि नित्यचैतन्यस्वरूपत्वम् अग्नौष्ण्यप्रकाशवदिति।

रामानुजनिम्बार्काभ्यां तु 'ज्ञः' इत्यस्य ज्ञानस्वरूपत्वे सति ज्ञानाश्रयः इत्यर्थः कृतः। अत एतेषान्नये तु जीवो न ज्ञानस्वरूपः अपि तु ज्ञानाश्रय एव।

**जीवस्याणुत्वविभुत्वविचारः**

अद्वैतिनां नये –'जीवो ब्रह्मैव नापरः' इति । अतो ब्रह्म यथा आकाशमिव परममहत् विभुः, जीवोऽपि ब्रह्माभिन्नत्वेन विभुः। अपि च, 'तत्त्वमसी'ति श्रुतिवाक्येनापि ब्रह्मजीवयोरेकत्वं प्रतिपादितम्। अतो ब्रह्मणो विभुत्वमिव जीवस्यापि विभुत्वम्। तथा च श्रुतिः –'स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु---' इति। किन्तु 'एषोऽणुरात्मा चेतसा वेदितव्यः यस्मिन् प्राणः पञ्च संविवेश' इति,

---

3 *ब्रह्मसूत्रम्*-२.३.१६

4 *श्वेताश्वतरोपनिषत्*- ६.११

5 *बृहदारण्यकोपनिषत्*-४.४.५

6 *ब्रह्मसूत्रम्*- २.३.१७

7 *तत्रैव*- २.३.१८

'बालाग्रशतभागस्य शतधा कल्पितस्य च।
भागो जीवः स विज्ञेयो स चानन्त्याय कल्पते।।'[8]

चेत्यादिषु श्रुतिषु जीवस्याणुत्वमेव प्रतिपादितम्। अत्र भगच्छङ्करपादैरुच्यते यत् यथा प्राज्ञे परमात्मनि अणुत्वविशिष्टबुद्ध्युपाधिकमणुत्वं तथैव जीवचैतन्यस्य बुद्धौ प्रतिबिम्बतया अणुत्वविशिष्टबुद्ध्युपाधिकमणुत्वम्।

रामानुजाचार्यनये तु ब्रह्म विभु, जीवश्चाणुः। न हि जीवो ब्रह्मतुल्यस्वभावः 'ज्ञाज्ञौ द्वावजावनीशौ' इत्यादिश्रुतिषु तथा 'भेदव्यपदेशाच्चान्यः', 'अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके'[9]इत्यादिब्रह्मसूत्रे च ब्रह्मजीवयोर्भेदप्रतिपादिनात्। उक्तञ्च तेन तदीयश्रीभाष्ये-'अणुरेवात्मा' इति।

ततः निम्बार्काचार्येण आविर्भूय रामानुजवद् जीवस्याणुत्वमेव प्रतिपादितम्। तथापि तेनोक्तं यद् जीवो यद्यपि वस्तुतः अणुस्तथापि कदाचित् तस्मिन् विभुत्वव्यपदेशो जायते। अत्र कारणत्वेन तेनोच्यते –'बृहन्तो गुणा यस्मिन्निति ब्रह्मेति प्राज्ञवदात्मा विभुगुणत्वात् 'नित्यं विभुम्' इति व्यपदिष्टः, दृष्टान्ते बृहदेव प्राज्ञो गुणैरपि बृहद् भवति, दार्ष्टान्ते तु जीवः अणुपरिमाणको गुणेन विभुरिति विशेषः' इति।

मध्ववल्लभाचार्ययोर्मतेऽपि जीवः अणुरूपः। अणोरपि जीवस्य सर्वशरीरव्याप्तिः युज्यते। उक्तञ्च ब्रह्माण्डपुराणेऽपि-

'अणुमात्रोऽप्ययं जीवः स्वदेहं व्याप्य तिष्ठति।
यथा व्याप्य शरीराणि हरिचन्दनविप्रुषः ।। इति।

## जीवस्य कर्तृत्वभोक्तृत्वविचारः

'कर्ता शास्त्रार्थवत्त्वात्'[10] इत्यादिसूत्रे कर्तृत्वादि प्रतिपादितम्। शङ्कराचार्यमते जीवो न कर्ता नापि च भोक्ता। जीवः खलु बौद्धिकोपाधिना आत्मानं कर्तारं भोक्तारञ्चावगच्छति।जीवात्मनः कर्तृत्वं तु अध्यासमात्रम्। जीवात्मनि हि कर्तृत्वमविद्याजन्यमिति तस्याकर्तृत्वम्।

तत्र विहाय शङ्काराचार्यं सर्वे एव आचार्या जीवस्य कर्तृत्वं भोक्तृत्वञ्च स्वीकुर्वन्ति। किन्तु तत्कर्तृत्वं तु परमात्माधीनमेव। 'परात्तु तच्छ्रुतेः'[11] इत्यादिसूत्राणि तथा 'यो विज्ञाने तिष्ठन् विज्ञानादन्तरो यं विज्ञानं न वेद' इत्यादिसूत्रवाक्यानि चात्र मानम्।

## जीवस्यांशांशिविचारः

'अंशो नाना व्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके' इत्यादिसूत्रे जीवस्यांशांशिविचारः सूत्रकारेण समुपस्थापितः । अद्वैतिनां नये तु जीवो न ब्रह्मणः अंशः। निष्कलं निरवयवं हि ब्रह्म, अतस्तस्यांशो भवितुं नार्हति। ननु 'विस्फुल्लिङ्गा इवाग्नेर्हि जडजीवा विनिर्गताः', 'सर्व एवात्मनो व्युच्चरन्ति' इत्यदयः श्रुतयः जीवस्य ब्रह्मांशत्वमेव प्रतिपादयन्ति। अत्रोच्यते ब्रह्मणः पृथक् प्रतीयमानत्वात् जीवो ब्रह्मणः अंशः इति प्रतीयते। वस्तुतस्तु अयं भेदो व्यवहारिक एव। आध्यात्मिकदृष्ट्या तु सत्ताद्वयमेव मिथः अभिन्नम् एकञ्च। 'ब्रह्म दाशा ब्रह्म दाशा ब्रह्म एव इमे कितवाः' इति दाशकितवेत्यादिना प्रतिपाद्यते यत् तुच्छातितुच्छजीवा अपि वस्तुगत्या ब्रह्मैव।

रामानुजनये तु जीवः अग्निस्फुलिङ्गवत् ब्रह्मतो निर्गतो ब्रह्मणः अंशः। तेनांशशब्दस्य एवमर्थः कृतः –'विशिष्टवस्त्वेकदेशः'। अर्थात् ब्रह्मजीवयोः विशेष्यविशेषणभावसम्बन्धः –एकवस्त्वेकदेशत्वं हि अंशत्वं

8 श्वेताश्वतरोपनिषत्- ५.९
9 ब्रह्मसूत्रम्-२.३.४३
10 तत्रैव-२.३.३३
11 ब्रह्मसूत्रम् -२.३.४१

विशिष्टस्य एकस्य वस्तुनः विशेषणमंश एव।

निम्बार्काचार्यस्तु जीवब्रह्मणोर्भेदाभेदसम्बन्धम् अङ्गीकरोति। तन्नये जीवो ब्रह्मणो भिन्नोऽप्यभिन्नः। अंशशब्दस्यार्थस्तेन कृतः शक्तिरिति। जडचेतनादयः सर्वे एव पदार्थाः ब्रह्मणो विभिन्नशक्तयः। तेन जीवब्रह्मणोः शक्तिशक्तिमत्सम्बन्धो वर्तते।

मध्ववल्लभाचार्यौ अपि जीवब्रह्मणोः भेदाभेदसम्बन्धं स्वीकुरुतः। तत्र मध्वाचार्येण अंशशब्दस्य तद्भिन्नत्वे सति तच्छेषत्वम् इत्यर्थः कृतः।

**जीवस्य सत्याभासविचारः**

जीवो हि परब्रह्मणः आभास एव। तथाहि सूत्रितं बादरायणेन 'आभास एव च'[12] इति। सूत्रस्यास्य व्याख्यानावसरे भगवच्छङ्करपादैरुच्यते सूर्यो यथा भिन्ने भिन्ने जलपूर्णपात्रे प्रतिफलितं भवति तथैव एकमेव ब्रह्म अपि मायायाः कारणेन अनेकेषु जीवात्मसुप्रतिफलितं भवति। उक्तञ्च तेन शारीरकमीमांसायाम्-'आभास एव चैषः जीवः परस्यात्मनो जलसूर्यकादिवत् प्रतिपत्तव्यः'[13] इति। तन्नये वस्तुतो ब्रह्ममात्रं सत्यं जीवश्च ब्रह्मणः प्रतिबिम्बोऽसत्यश्च।तथाह्युक्तं विवेकचूडामणौ-

'घटं जलं तद्गतमर्कबिम्बं विहाय सर्वं विनिरीक्ष्यतेऽर्कः।
तटस्थ एतत्त्रयावभासकः स्वयं प्रकाशो विदुषा यथा तथा॥'[14] इति।

किन्तु समेषामेव वैष्णवाचार्याणां राद्धान्तमेतत् यन्न हि जीवो मिथ्यात्वरूपः आभासः। स हि परमात्मा एव सत्यः। तत्र वल्लभाचार्येणोच्यते यद् वस्तु प्रतिबिम्बते तत् साकारं भवति, ब्रह्म तु निराकारम्। अतस्तस्य प्रतिबिम्बो न सम्भवति। किञ्च, 'द्वा सुपर्णा सयुजा...', 'समाने वृक्षे परुषो निमग्नः ...', ज्ञाज्ञौ द्वावाजावीशनीशावजा...' इत्यादिषु श्रुतिषु जीवब्रह्मणोर्भिन्नत्वं स्पष्टमेव। तस्माज्जीवो न ब्रह्मणो प्रतिबिम्बः।

**जीवस्यैकत्वानेकत्वविचारः**

शङ्करनये व्यवहारिकदृष्ट्यासंख्या जीवा ब्रह्मणश्च भिन्नाः। परं पारमार्थिकदृष्ट्या न तयोः कोऽपि भेदो वर्तते, एकमेवाद्वितीयं ब्रह्मैवावशिष्यते।

रमानुजनिम्बार्कादीनां मते तु जीवा अनन्ताः। तत्र रामानुजनये एते जीवा द्विधा विभक्ता बद्धमुक्तभेदेन। मुक्तजीवाः पुनर्द्विविधाः -बद्धमुक्तःनित्यमुक्तश्च। मध्वनयेऽपि ते जीवा द्विविधाः-भिन्नांशाः अभिन्नांशाश्च। तत्र ये ब्रह्मणः अंशाः सन्तोऽपि ब्रह्मणः सर्वथा भिन्नास्ते भिन्नांशजीवाः। एते साधारणजीवात्मनः, स्वल्पशक्तयः, ब्रह्मणा साकञ्च तेषामत्यल्पमेव सादृश्यम्। अपरतो ब्रह्मणः अंशाः सन्तोऽपि न तात्त्विकरूपेण ब्रह्मणो भिन्नाः ते अभिन्नांशजीवाः। एते च मत्स्यकच्छपाद्यवतारस्वरूपाः ये च शक्त्या स्वभावेन न लेशमात्रमपि ब्रह्मणो न्यूनाः।

**जीवस्य ब्रह्मणा सहैक्यपार्थक्यविचारः**

मध्वाचार्यं विहाय सर्वैरेवाचार्यैः जीवब्रह्मणोरभिन्नत्वमुररीक्रियते। 'तत्त्वमसि', 'एकमेवाद्वितीयम्', 'सर्वं खल्विदं ब्रह्म' इत्यादीनि श्रुतिवाक्यान्यत्र प्रमाणम्। तत्र शङ्कराचार्यमते पारमार्थिकदृष्ट्या जीवो ब्रह्मणोऽभिन्नः। अविद्यावशाज्जीवः

---

12 *ब्रह्मसूत्रम्* - २.३.५०
13 स्वामी विश्वरूपानन्दः. *वेदान्तदर्शनम्* (द्वितीयभागः)- पृ-७११
14 शङ्कराचार्यः, *विवेकचूडामणिः*-२११

उपाधिना ब्रह्मणो भिन्नो मन्यते। तन्नये नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मैव सत्यं, नान्यत्। अतः शङ्कराचार्यस्य मतवादः केवालाद्वैतवाद इत्यप्यभिधीयते। तत्र निम्बार्कनये जीवः स्वरूपतो धर्मतश्च ब्रह्मणो भिन्नाभिन्नः। किन्तु मध्वनये तु जीवो ब्रह्मणो नित्यभिन्नः, अभिन्नत्वे तु द्वैतहानिः स्यात्।

सार्विकपर्यालोचनात् स्पष्टमेतत् प्रतीयते यत् जीवस्य नित्यत्वचिद्रूपत्वाणुत्वविभुत्वकर्तृत्वादिषु विषयेषु एकामेव श्रुतिम्, एकमेव च सूत्रं, एकामेव च स्मृतिं भाष्यकाराः स्वस्वसम्प्रदायानुकूल्येन स्वीयराद्धान्तं सयुक्तिकं सुदृढतया स्थापयामासुः। परं भाष्यं यदि न स्यात्तथात्वे तत्तत्सम्प्रदायीया जनाः स्वाभीष्टं न प्राप्नुयुः। कारणं हि श्रुतिषु आपातदृष्ट्या क्वचिद् विरोधो दृश्यते, क्वचिच्च साधारणतया श्रुतीनामर्थावबोधो न जायते, कुत्रचिच्च कथञ्चित् कृतेऽप्यर्थे भिन्नार्थः प्रतीयते।अपि च, वैदिकमन्त्रेषु लोपागवर्णविकारादिकार्याणां भूयो भूयो दर्शनात् कुत्र वर्णानां लोपो जातः, कुत्र वागमः, कुत्र च विकारः, तेन च तत्र कोऽर्थः स्यादित्येवं नैके प्रश्नाः समुत्पद्यन्ते। तेन सर्वे एव दिग्भ्रान्ता भवेयुः, प्रतिपदञ्च स्खलनं भवेत्। तेन इष्टप्राप्तिस्तु नैव भवेत् परम् अनिष्टमेव उद्भवेत्। तस्मात् भाष्यटीकादीन्येव शरणम्। भाष्यटीकादिपर्यालोचनेनानायासेन अर्थावगमात् अभीष्टसिद्धिरपि जायते।

परिशेषे एतदेव वक्तव्यं यत् 'मुण्डे मुण्डे मतिर्भिन्ना' इत्युक्तत्वात् सर्वेऽपि भाष्यकाराः यद्यपि स्वीयसम्प्रदायानुकूल्येन सयुक्तिकं स्वकीयं मतं स्थापयामासुः। परं यथा नदीनां बहवोऽम्बुवेगाः भिन्नमार्गेण गच्छन्तोऽपि समुद्रमेवानुधावन्ति तथैव मार्गभिन्ना अपि सम्प्रदायीयाः सर्वे अन्तेनित्यशुद्धबुद्धमुक्तस्वभावं परमानन्दमेव प्राप्नुवन्ति। यथार्थमेवोक्तं-

'यया यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि।
स सैव प्रक्रिया ज्ञेया साध्वी सा चानवस्थिता।।' इति शम्।

## ग्रन्थसूची


अनन्तकृष्णशास्त्री. *ब्रह्मसूत्रशाङ्करभाष्यम्*. वोम्बाइ : निर्णयसागारप्रेस, १९३८.

आप्टे, वामन शिवराम. *संस्कृत-हिन्दी कोशः*. दिल्ली : मोतीलाल बनारसी दास, २००७. (प्रथमसंस्करणम्.१९६६).

*उपनिषद्भाष्यम्*. सम्पा. मणिद्रविडः. प्रथमखण्डः. वाराणसी : महेश-अनुसन्धान-संस्थानम्.२००४(द्वितीयसंस्करणम्).

*उपनिषद्भाष्यम्*. सम्पा. मणिद्रविडः. द्वितीयखण्डः.वाराणसी: महेश-अनुसन्धान-संस्थानम्,२००५ (द्वितीयसंस्करणम्).

त्रिपाठी, रामशरण. *ब्रह्मसूत्रप्रमुखभाष्यपञ्चकसमीक्षणम्*. वाराणसी : चौखाम्बा संस्कृत सीरीज आफिस, १९७१.

*पूर्णप्रज्ञदर्शनम्*. आनन्दतीर्थविरचितमाध्वभाष्यसहितम्, सम्पा. महेशचन्द्रपालः. कलिकाता : सभार कार्यालय, १८०८.

भट्टाचार्यः, आशुतोषः. *वेदान्तदर्शन-अद्वैतवाद*. कलिकाता : कलिकाताविश्वविद्यालयः, १३४८ बङ्गाब्दः.

व्यासः. *श्रीब्रह्मसूत्रम्*. श्रीनिम्बकाचार्यप्रणीतवेदान्तपारिजातसौरभभाष्योपेतम्. सम्पा. नित्यस्वरूपब्रह्मचारी, १९६२.शङ्कराचार्यः. *विवेकचूडामणिः*. अनुवादकः स्वामी वेदान्तानन्दः. कलिकाता : उद्बोधनकार्यालय, २०१२. (प्रथमसंस्करणम्. १९६४).

श्रीयतीन्द्र-रामानुजाचार्यः. *ब्रह्मसूत्र* (वेदान्तदर्शन). खड़दह : श्रीबलरामधर्म्मसोपान, १३८५ बङ्गाब्दः.

श्रीवल्लभाचार्यः. *अणुभाष्यम्*. मुम्बाइ : पुष्टिमार्गसिद्धान्तकार्यालयः, १९७८.

सदानन्दयोगीन्द्रः .*वेदान्तसारः*. सम्पा. विपदभञ्जनपालः.कोलकाता: संस्कृतस्तकभाण्डार,१४१५ बङ्गाब्दः(अष्टमसंस्करणम्).

स्वामी प्रज्ञानन्दसरस्वती. *वेदान्तदर्शनेर इतिहास*. कलिकाता : मा मङ्गलचण्डी प्रेस, १३६८ बङ्गाब्दः.

स्वामी विश्वरूपानन्दः. *वेदान्तदर्शनम्* (द्वितीयभागः). कलिकाता : उद्बोधनकार्यालयः,२०१४.


Received on 11. 05. 2017 Accepted on 17. 07. 2017

# अनुवादसाहित्ये काश्यपकवेः कालीपदतर्काचार्यस्य कृतित्वम्

शुभ्रजित्सेनः*

निर्यासः

अनुसर्जनं नाम पश्चात्सर्जनमुत्तरसृष्टिर्वेति। अनुसर्जनमित्यस्य सारूप्यम् – मूलस्य पुनः करणमित्यर्थः। इदानीन्तनमनूदितसाहित्यं स्वकं नवनवीनं भव्यञ्च प्रस्थानं निर्माति इतरभाषाणां निरनद्यकाव्यास्वादने तत्पर्यायिवाचकशब्दप्रयोगचमत्कारेण। अनुवादसाहित्ये वङ्गीया प्रतिभा चिरं प्रगल्भा चकास्ति। मधुसूदनसरस्वत्या वंशजस्य कालीपदतर्काचार्यस्य अनुवादकर्मण्यस्मिन् सविशेषं योगदानं वर्तते। तस्यानपवादततिस्तावत्-

1) गीताप्रतिच्छाया
2) गीताञ्जलिच्छाया
3) श्रीश्रीचण्डीप्रतिच्छाया

छन्दःशास्त्रस्य गुरुलघुमात्रानिशितपथेन गच्छतानुवादकेन मुलकवेर्हृद्भावानुगुणं भाषान्तरकरणरूपानुवादलक्ष्यान्न भ्रष्टम्। क्वचिद्वाक्षरशोऽपि तेन कृतः। किन्तु सहृदयहृदयानां सकाशे कवेर्भावान्समुपस्थापयितुमाधिक्येन विहितो भावानुवादः। गीताञ्जलेः प्रथमं गीतं तावत् –

“आमार माथा नत करे दाओ हे तोमार
चरण धुलार तले।
सकल अहंकार हे आमार
डुवाओ चोखेर जले।” इति

कालीपदस्यानुवाद एवम्-

“(मम) शीर्षं नयनति मयि! तव
चरणरेणुतले।
सकलमहङ्कारं मम
मज्जयाश्रुजले” इति।

अनुवादोऽयं सर्वोत्तमतया प्रतिभाति। अनुवादेऽस्मिन् मौलिको भावः शब्दविन्यासश्च प्रायेणाव्याहतौ स्तः। केवलमेका जिज्ञासा –‘चरणरेणुतले’ इत्यत्र चरणधूलितले इति पाठे कृते शब्दविन्यासः समधिको मूलानुगः किं न स्यात्। अत्र सुधियः प्रमाणम्। क्वचित् ‘हे’ इत्यस्य अनुवादार्थं कश्चित् शब्दविशेषो नोपात्तः। ‘मज्जयाश्रुजले’ इत्यत्रमज्जयाक्षिजले इति पाठः साधीयान् स्यान्न वेति सुधीभिर्भाव्यम्। कथमिति चेदुच्यते ‘अश्रु’ इति पदं नेत्रजलस्य वाचकम्। मूले अस्ति- ‘चोखेर जले’। अतः अक्षिजले इत्यनुवादे न पक्षपातः। कवेः मौलिकविचारो यथाक्षुण्णः स्यादित्येतदर्थमनुवादकः

* सहायकाध्यापकः, संस्कृतविभागः, गौड़वङ्गविश्वविद्यालयः

सर्वत्र प्रयत्नशील आसीदिति तस्यानुवादतः प्रतीयते स्पष्टतया।

न केवलं संस्कृतानुवादे कालीपदस्य विशेषत्वं वरीवर्ती, चापि श्रीमद्भगवद्गीतायाः Blank Verse इति नव्यच्छन्दसा कृतो मूलानुरूपो वङ्गानुवादः खलु गीताप्रतिच्छायेति। अनुवादकेन श्रीमद्भगवद्गीताया भावसम्पत्तिं मनसीकृत्य प्रेक्षापटञ्च सम्यक्तयवबुध्य क्वचिद्भावानुवादः क्वचिच्चाक्षरशोऽनुवादः कृतः। कालीपदविरचिता श्रीश्रीचणडीप्रतिच्छाया हि मार्कण्डेयचण्डीग्रन्थानुवादो, यश्च 'Blank Verse' इति छन्दसा लिखितो वङ्गभाषामयः।

ननु संस्कृतभाषायामुपनिबद्धानामनूदितकथानां पाठाद्रसं निपायापि पेपीयन्ते पाठका वङ्गभाषामयरवीन्द्रगीताञ्जलिवदिति चेदुच्यते सहृदयहृदयाः प्रमाणं तत्र।

मूलशब्दावलिः रवीन्द्रनाथः, गीताञ्जलिः, कालीपदतर्काचार्यः, गीताञ्जलिच्छाया, गीताप्रतिच्छाया, श्रीश्रीचण्डीप्रतिच्छाया, भावानुवादः।

## मूलप्रबन्धः

### किं नामानुवादकर्म

कस्याञ्चन भाषायां साहित्यस्य प्रबृद्धावनुवादसाहित्यस्य वरीवर्ति विशिष्टं स्थानम्। यद्यप्यपरस्य कृतिरुत स्वकृतिरेव रूपान्तरीक्रियतेऽत्र तथाप्यनन्यपरतन्त्रा निराकर्तुं न शक्यते। तथाहि, साम्प्रतं मनीषिणोऽनुवाद शब्दमुपेक्ष्यानुसर्जनमिति शब्दं प्रयुञ्जते। अनुसर्जनं नाम तादृशं किञ्चन यत्र मूलस्य शब्दसम्पत्तेर्भावसम्पत्तेश्च चमत्कारित्वमविहाय भाषान्तरीकरणं क्रियते। एतत्तु दृश्यते यत्कस्याश्चन भाषायाः प्रारम्भिकं साहित्यमनुवादात्मकं भवति। मौलिकसाहित्यकर्मानुवादसाहित्यमेकम्। अनुसर्जनं नाम पश्चात्सर्जनमुत्तरसृष्टिर्वेति। अनुसर्जनमित्यस्य सारूप्यम् – मूलस्य पुनः करणमित्यर्थः (Reproduction of the original)। 'अनु पश्चादुद्यत उच्यते कथ्यत' इति विग्रहे अनुपूर्वकाद् वद्धातोरुत्तरं भावार्थकघञा निष्पन्नोऽयमनुवादशब्दः। ननूक्तस्य पुनरुक्तावापद्येत पुनरुक्तदोष इति चेन्न प्रकृतभाषयोपनिबन्धविषयस्य तत्तद्भाषाज्ञज्ञानाय भाषान्तरानुवादस्योपकारकत्वात्। यद्वा भवतु नाम। इदन्त्वनुवादकर्म किमप्यसिधाराव्रतं प्रतिभाति। तत्र मूललेखकस्य भावसाम्राज्यं स्यात्, शब्दसम्पत्तिर्भवेत्, चान्ततो गत्वा लक्ष्यभाषाया भाषामर्यादाप्यक्षुण्णा स्यात्। इदानीन्तनमनूदितसाहित्यं स्वकं नवनवीनं भव्यञ्च प्रस्थानं निर्माति इतरभाषाणां निरवद्यकाव्यास्वादने तत्पर्यायवाचकशब्दप्रयोगचमत्कारेण। प्रतिवर्षं चिरनवीना संस्कृतभाषा साहित्यस्य विविधविधाभिः काव्यकविताकथानाटकादिभिर्भवति सुसमृद्धा तदनुसारं तत्रानूदितसाहित्यस्य प्राचुर्यं लभते। तथापि संस्कृते भारते साम्प्रतं येन परिमाणेन साहित्यनिर्माणं भवति, तदपेक्षया स्वल्पमनुवादसाहित्यं रचितं दृश्यते। तथाहि राधावल्लभत्रिपाठिनोक्तम्- 'कवित्वकण्डुतिर्यथास्मान् बाधते, न तथानुवादचिकीर्षा'इति। अनुवादसाहित्ये बङ्गीया प्रतिभा चिरं प्रगल्भा चकास्ति। संस्कृतभाषायामनूदितवङ्गीयसाहित्यं द्वेधा विभजयितुमलम्-

1) रवीन्द्रसाहित्यम्
2) रवीन्द्रेतरसाहित्यञ्च।

अत्रेदमुल्लेखार्हं यद् रवीन्द्रसाहित्यस्यानुवादक्षेत्रे वङ्गीयकवीनां यादृशः प्रयत्नो, न तथा दृश्यते संस्कृतेतरसाहित्यानुवादे। वङ्गदेशेऽधुना क्वचिदधिकतया अनुदितसंस्कृतसाहित्यं प्रसरति।

कालीपदतर्काचार्यस्यानुवादचिकीर्षाया हेतुः

पितुर्हरिदासस्याभिप्रायानुसारिणि पाश्चात्त्यविद्याशिक्षाकर्मणि प्रवृत्तोऽपि भविष्यत् तस्मान्निवृत्तो भूत्वा पितुः सम्मतिमादाय च कुलधर्मानुसारं संस्कृते रतिं श्रित्वा तत्प्रशिक्षणमारेभे मधुसूदनसरस्वत्या वंशजो महामहोपाध्यायः कालीपदतर्काचार्यः। कियता कालेन च तदानीन्तन-राजकीयसंस्कृत-परीक्षा-समिति-परिगृहीतायां व्याकरणशास्त्रीयप्रथमपरीक्षायामवतीर्णः स्वदेशस्थित एव तां सप्रशंसमुत्तीर्य विलक्षणविद्यापरिग्रहाय कलिकातानगर्यां पितुः समीपमाससाद। कालीपदः कतिचिद्दिनानि कलिकातानगर्य्यामितस्ततो गत्वा काव्यशास्त्राण्यधीत्य तस्मिन्नेव वर्षे प्रथमविभागे प्रथमस्थानमधिकृत्य काव्योपाधिपरीक्षामुदतरत्। काव्यशास्त्रं सम्यक्तयाधीत्य सुमहद्यशोऽर्जितं कालीपदेन। कविरयं दृश्यकाव्यचतुष्टयम्, महाकाव्यमेकम्, गीतिकाव्यमेकं तथा काव्यत्रितयञ्च विरर्च। अनुवादकर्मण्यस्मिन् कालीपदस्य सविशेषं योगदानं वर्तते। तस्यानुवादततिस्तावत्-

1) गीताप्रतिच्छाया (वङ्गभाषायाम्)
2) गीताञ्जलिच्छाया (संस्कृतानुवादः)
3) श्रीश्रीचण्डीप्रतिच्छाया (वङ्गानुवादः)

1. गीताञ्जलिच्छाया

रवीन्द्रनाथेन प्रणीतो गीताञ्जलिरिति समग्रे प्रपञ्चे प्रसिद्धिं प्राप्तोऽस्ति, कारणं तस्मैः गीताञ्जलिकृत्यैव रवीन्द्रनाथो नोवेलविरुदेन सभाजितोऽभवत्। गीताञ्जलेः प्रथमः प्रकाशकालः 1910 क्रैस्तवर्षेऽभूत्। आङ्गलसंस्करणं 1912 ईशवीयाब्दे प्रकाशितम्। 1913 ख्रीष्टाब्दे नोवेल इत्युपाधिना कविवरोऽयं भूषितः। प्रसङ्गत इदमवधेयं यत् गीताञ्जलिः वङ्गभाषया लिखितः कश्चन काव्यसंग्रहोऽस्ति। इदमपि किञ्चन स्मरणीयं तथ्यं यत् गीताञ्जलेरनुवाद एव नोवेलप्रशस्तये विवेचितः सम्मानितश्च। न तु मूलभाषया लिखितो ग्रन्थः। गीताञ्जलिः, नैवेद्यम्, शिशुः, खेया, गीतिमाल्यम्, चैतालिः, कल्पना, स्मरणम्, उत्सर्गः, अचलायतनम्, इत्येतेभ्यः कविकृतकाव्यसंग्रहेभ्यः काश्चन कविताः संगृह्य गीताञ्जलेराङ्गलानुवादो रवीन्द्रनाथेनैव कृतः। अनन्तरं तस्यानुवादकर्मणः परिष्कारं विधाय प्रकाशनं जातम्। अनन्तरं विश्वस्य विविधभाषाभिर्गीताञ्जलेरनुवादकार्यं सातत्येन प्रचलदस्ति। संस्कृतभाषयापि रवीन्द्रनाथस्य कृतेरस्यानुवादो बहुभिः प्राचीनैरर्वाचीनैश्च कृत इत्यवलोक्यते। रवीन्द्रकवितामोहिताः संस्कृतविद्वांसः रवीन्द्रकृतीनां विपुलमनुवादकार्यं कुर्वाणाः सन्ति सम्पूर्णेऽपि भारते। गीताञ्जलेरपि संस्कृतानुवादो वङ्गीयैरवङ्गीयैश्च रवीन्द्रप्रतिभया वशीकृतैर्बहुभिः संस्कृतविद्यावद्भिः कृतः, तेषु केचन गीताञ्जलेराङ्गलकृतिमनुसृत्य केचिच्च वङ्गमूलमनुसृत्य अनुवादा विहिताः। अन्ध्रप्रदेशीयेन पुल्लेलश्रीरामचन्द्रेण तथा च केरलवास्तव्येन एन्. गोपालपिल्लाइ-पादेन विहितानुवादे त्र्यधिकमेकशतमिति गीतसंख्या विद्यते। मूलगीताञ्जलेराङ्गलानुवादोऽत्रोपजीव्यत्वेन परिगृहीतः। पुल्लेलमहोदयेन मन्दाक्रान्ताछन्दसा तथा च पिल्लाइपादेन जातिच्छन्दोऽनुसृत्यानुवादो विहितः। कामिनीकुमाराधिकारिणा कृतेऽनुवादे गीताञ्जलिसंस्कृतमिति नामके ग्रन्थे निर्वाचितपञ्चविंशतिसंख्यानां गीतानामुवादः कृतः प्रचलतिच्छन्दोभिः। एतानतिरिच्य साहित्याकाडेमीतः प्रकाशिते वि. राघवन्वयैः सम्पादिते संस्कृतरवीन्द्रमिति ग्रन्थे विविधैः प्राज्ञैः क्रियमाणस्य गीताञ्जलेरनुवादस्य सामूहिकञ्चित्रमाप्यते। वङ्गभाषामयगीताञ्जलिगीतेषु वङ्गीयकविना दुर्गादासगोस्वामिना षण्णाम्, इन्द्रमोहनचक्रवर्तिना सप्तानाम्, शैलेन्द्रनाथमौलिकेन चतुर्णाम्, एस्. एल्. ताम्बेमहोदयेन द्वयोर्गीतयोरनुवादो विहितः। परमाङ्गलगीताञ्जलिगीतेषु

गणेशलक्ष्मण-अमलादिना त्रयोदशानाम्, उडालिसुब्बरामशास्त्रिणा द्वादशानाम्, को.ल. व्यासरायशास्त्रिणा एकस्य, मा.कृष्ण. नम्पूतिरिमहाभागेन चतुर्णामनुवादः कृतो वर्तते। विश्वेश्वरविद्याभूषणेन प्रणतिनिवेदमिति नाम्ना केवलं वङ्गीयगीताञ्जलेः प्रथमगीतस्यानुवादः कृतः संस्कृतच्छन्दोधारामनुसृत्य। परन्तु न केनापि मूलगीताञ्जलेः संस्कृतानुवादः सम्पूर्णतया संसाधितः ऋते कालीपदतर्कचार्यात्। जीवनसायाह्नमुपागतेन कालीपदेन विविधकर्मसु व्यापृतेनापिकविगुरुवर्यस्यपद्यानिविशेषणगीताञ्जलिकाव्यसंग्रस्यपद्यानिगीर्वाणवाण्यामनूद्यनकेवलंवङ्गीयानामपि चावङ्गीयानां संस्कृतसेविनां रवीन्द्रसाहित्यावबोधनाय सौकर्यमनेन संसाधितम्। महाकवेरशेषश्रद्धास्पदभूतायाः सुरभारत्याः सौभाग्यं भृशं वर्धितम्। अनुवादस्यास्य विशेषत्वमत्रैव यत्कालीपदतर्काचार्येणानुवादकेन सर्वाण्येव पद्यानि सुरचितच्छन्दसा सज्जीकृतानि। तत्रत्यानि पद्यानि 'प्रार्थना', 'दया', 'पाषाणप्रतिमा', 'अपमानमहिमा', 'अधिकारी' चेत्यादीनि। गीताञ्जलौ गीतसंख्या सप्तपञ्चादशधिकमेकशतम्। काश्यपकविना कालीपदेन कृतानुवादग्रन्थे पूर्णतया रक्षिता संख्येयम्। पारम्परिकच्छन्दोनियमस्यानुपालनमनुवादकर्मण्यस्मिन् न सञ्जातम्। अत्रेदमुल्लेखार्हं यदाधुनिकः कविर्यथारचि छन्दांसि नापेक्षते। सत्यन्तर्वर्त्तिनि छन्दसि आधुनिकसामग्रीं यां स प्रयुङ्क्ते, तस्या यः शब्दप्रवाहः, स च किमपि नवीनच्छन्दोनिर्माणं विदधातीति न दोषाय। नवीनच्छन्दसां प्रासङ्गिकत्वं स्वीकृत्य राधावल्लभत्रिपाठिनोक्तं –

"उन्मीलिता नवीना
मार्गा दृष्यनवीनपद्दतयः।
छन्दश्चलितं भूत्वा
पाथेयं दीर्घयात्रायाम्"।।इति।

अर्वाचीनाः कवयः पारम्परिकच्छन्दोभिः सह छन्दसां व्यत्ययं कृत्वा उत छन्दोद्वयस्य मिश्रणं विधाय काव्यानि ग्रथयन्ति। तथा च व्याकरणशास्त्रस्य कठोरशासनशतैः शासितोऽपि छन्दःशास्त्रस्य गुरुलघुमात्रानिशितपथेन गच्छतानुवादकेन मुलकवेर्हृद्भावानुगुणं भाषान्तरकरणरूपानुवादलक्ष्यान्न भ्रष्टम्। क्वचिद्वाक्षरशोऽनुवादोऽपि तेन कृतः। किन्तु सहृदयहृदयानां सकाशे कवेर्भावान्समुपस्थापयितुमाधिक्येन विहितो भावानुवादः।

गीताञ्जलेरादिमं गीतं भक्तिभावास्पदम्। भक्तिसुधारससिक्तो रवीन्द्रो वैदिकवाङ्मये निष्णातः सनप्रथमं गीतं गायति-

"आमार माथा नत करे दाओ हे तोमार
चरण धुलार तले।
सकल अहङ्कार हे आमार
डुवाओ चोखेर जला।
निजेरे करिते गौरव दान
आपनारे शुधु घेराया घेरिआ
घुमे मरि पले पले
सकल अलङ्कार हे आमार

डुवाऔ चोखेर जले।
आमारे ना येन करि प्रचार
आमार आपन काजे,
तोमारि इच्छा करो हे पूर्ण
आमार जीवन माझे।
याचि हे तोमार चरम शान्ति,
पराणे तोमार परम कान्ति,
आमारो आडाल करिया दाँडाओ
हृदयपद्मदले।
सकल अहंकार हे आमार
डुवाओ चोखेर जले"(1)॥ इति

कालीपदस्यानुवाद एवम्-

"(मम) शीर्षं नयनति मया!
तव चरणेणुतले
सकलमहङ्कारं मम
मज्जयाश्रुजले
साधयितुं स्वरौगवम्,
मञ्जयाश्रुजले"
प्रचार्य्यतां न निजगुणो
मयका निजकर्मणे,
पूर्णं कुरु निजवाञ्छिन-
मयि! तव मम जीवने।
दशमाशान्तिरर्थ्या तव,
परमकान्तिरन्तस्तत्व,
तिष्ठ व्यवधाय मां हि हृदयपद्मतजले।
सकलमहंकारं मम मज्जयाश्रुजले"(2) ॥ इति।

अनुवादोऽयं सर्वोत्तमतया प्रतिभाति। अनुवादेऽस्मिन् मौलिको भावः शब्दविन्यासश्च प्रायेणाव्याहतौ स्तः। केवलमेका जिज्ञासा –'चरणरेणुतले' इत्यत्र चरणधूलितले इति पाठे कृते शब्दविन्यासः समाधिको मूलानुगः किं न स्यात्। अत्र सुधियः प्रमाणम्। क्वचित् 'हे' इत्यस्य अनुवादार्थं कश्चित् शब्दविशेषो नोपात्तः। 'मज्जयाश्रजले'

इत्यत्रमज्जयाक्षिजले इति पाठः साधीयान् स्यान्न वेति सुधीभिर्भाव्यम्।कथमिति चेदुच्यते 'अश्रु' इत पदं नेत्रजलस्य वाचकम्। परन्तु एतादृशः प्रयोगो भूयान् लक्ष्यते। मूले अस्ति- 'चोखेर जले'। अतः अक्षिजले इत्यानुवादे न पक्षपातः। कामिनीकान्तेनाधिकारिणा संस्कृच्छन्दोभिरनूदिता गीतयः। तस्यानुवादो यथा –

"शीर्षं मे तव पादसक्तरजसा नीचैः प्रभो धारय।
सर्वं गर्वचयं ममाहमिति मे नेत्राम्बुभिः प्लावयः"(3)॥ इति।

कविताया अनुवादो मौलिककविताग्रथनतो दुष्कर इति अनुवादविशेषज्ञा अभिप्रयन्ति। यतो मौलिककवितायां कवेः स्वकीयानुभूतिरभिव्यक्ता भवति रीतिविशेषमवलम्ब्य । पक्षान्तरेणानुवादेऽन्येनाभिव्यक्ताया अनुभूतेः प्रकाशः करणीयो भवति। सफलानुवादस्य कृतेऽनुवादकस्य भावयित्र्याश्च प्रतिभाया विद्यमानतावश्यिकी। अनुवादको भावयित्र्या प्रतिभया भावयति तत्तद्भाषानिबद्धां कविकृतिम्, कारयित्र्या प्रतिभया च तां भाषान्तरे परिणामयति। अनुवादे यदि क्वचिदनुवादकस्य कण्ठो लभते प्राधान्यं तर्हि मूलानुगत्यं भवति विडम्बितम्। गीताञ्जलिगतं 106-संख्यकं गीतम् – 'हे मोर चित्त, पुण्यतीर्थे जागो रे धीरे...' इत्यादिकं बहुभिरनूदितम्। तत्र कालीपदेन विहितः अनुवादो समधिकमूलानुगतया प्रतिभाति। मूलकवितायाः प्रारम्भांशः –

"हे मोर चित्त, पुण्य तीर्थे, जागो रे धीरे –
एइ भारतेर महामानवेर, सागरतीरे।
हेथाय दाँडाये दुबाहु वाडाये, नमि नरदेवतारे,
उदार छन्दे परमानन्दे, वन्दन करि ताँरे"(4)॥

तर्काचार्यस्यानुवादस्तावत् –

"हे मम मानस पावनतीर्थे, मन्दं जागृहि रे,
एतद्भारमहिमसमन्वितमानवसागरतीरे।
अत्र स्थित्वा प्रसार्य बाहू, नरदैवतमभिवन्दे,
समहाच्छन्दः परमानन्दं, तद्वन्दनमनुविन्दे"(5)॥

तर्काचार्येण मुक्तकच्छन्दसानुवादो विहितः, अन्यैः वसन्ततिलकवृत्तेन। 'जागो' इत्यस्यानुवादे 'सर्वैर्जागृही'ति पदं व्यवहृतम्। तर्काचार्येण 'चित्ते'ति पदस्य 'मानसे'ति अनुवादः कृतः। 'धीरे' इत्यस्यानुवादे तर्काचार्येण 'मन्दमि'ति पदं गृह्णीयात्। 'रे' इति द्वितीयं मूलस्थितं सम्बोधनसूचकं पदमनुवादकेन कालीपदेन विहाय सर्वैरन्यैरनुवादकैः परिगृहीतम्। तर्काचार्येण 'पावनतीर्थे' इत्यनुवादो विहितः 'पुण्यतीर्थे' इति पदस्य। 'ए भारतेर महामानवेर सागरतीरे' इत्यस्यानुवादे 'प्राचीने'ति पदमधिकं पूरितं धीरेन्द्रनाथेन। परं कालीपदेन 'एतद्भारतमहिम...' इत्यनुवादः कृत इति कृत्वानुवादोऽयं प्रशस्यतर इति मन्ये। 'हेथाय दाँड़ाये' इत्यादिपंक्तिद्वितयस्यानुवादे तर्काचार्यः प्रशस्यतमः प्रतिभाति।

एतानि काव्यानि 1960-1966, 2011 वर्षेषु संस्कृतसाहित्यपरिषत्पत्रिकायां प्रकाशितानि, विश्वभारतीग्रन्थविभागेन पुस्तकाकारेण प्रकाशितानि। अत्र संस्कृतच्छन्दोनियमं परित्यज्य अनुवादकस्तथा कविः मुक्तकच्छन्दसानुवदति। स्वोद्देश्यं निरूपयति यथा –

"तथापि तत्काव्यरसं कथञ्चित् वङ्गीयभाषामविद्वत्सु दित्सु।
यथावबोधं विदधेऽनुवादं वैश्वेन वृन्दारकवाङ्मयेन"॥ इति।

अन्तिमचरणद्वितयस्यानुवादेऽपि तर्कार्चायस्य कृतित्वं समधिकं मूलानुगत्यस्य दृक्कोणत, अन्यैरनुवादकैर्भावानुवाद मात्रमेव विहितम्। नवनवरूपेणेति कवितायाः किञ्चित् –

"नवनवरूपेण त्वमुपैहि जीवने

एहि गन्ध वर्णे तथा समुपैहि गाने।

समेहि पुलकमयस्पर्शमङ्गचये

एह्यमृतमयहर्षमन्तरनिलये।

एहि मुग्धनिमीलितनेत्रयुगस्थाने।

नवनवरूपेण त्वमुपैहि जीवने"(6)॥

अस्मिन्ननुवादे मौलिको भावः शब्दविन्यासश्चाव्याहतो वर्तते प्रायेण। अनूदितपद्यस्य भाषा सुरगीरप्यतीव सुषमा, मञ्जुला, सरला च। प्रतिभात्यनुवादोऽयं सर्वोत्तमतया। काश्यपकवेरयमनुवादः सत्यमेव मूलगीताञ्जलेः छायाविशेषः। तथाह्यनुवादस्य नामकरणमपि यथार्थमिति मामकी मतिः। एतन्निश्चप्रचमभिधातुमलं यदनुवादकत्वेन कालीपदः ध्रुवमेव विशिष्टस्थानमधिकरोतीत्यत्र नास्ति संशयलवः कश्चित्। सहृदयहृदयेभ्यो रवीन्द्रकाव्यरसाभिव्यक्तिर्हि मूलं लक्ष्यमासीत् तर्कार्चायस्य। मन्ये कर्मण्यस्मिन् सफलो जातोऽयम्।

अस्माकं चिरपरिचितस्य रवीन्द्रसङ्गीतस्य "विपदे मोरे रक्षा करो एनहे मोर प्रार्थना / विपदे मोरे ना येन करि भय / दुःख तापे व्यथित चित्ते नाइवा दिले सान्त्वना ...." इत्यस्यानुवादो विहितः कालीपदेन रोचिष्णुतयैवम् –

"विपदि मां रक्ष मम नेदमभियाचितं

न विपदो भवतु भयभुक्तिः

दुःखसन्तप्तहृदि दिश न वा सान्त्वनां

भवतु मम दुःखजयशक्तिः"(7) ॥

सरलशब्दोपेतस्यास्य पद्यांशस्याहरणे कवीन्द्रस्य रवीन्द्रनाथस्य काव्यस्यानायासेन रसास्वादनं कर्तुमलम्। कुत्रचिदतिसारल्येन विशेषत्वमेकं महत्त्वम्। यत्प्रतिपादितं निम्नोक्ते पद्ये –

"हे मातस्तव करुणं चरणं

दृष्टमद्य रविरश्मितया

मृतिहर-वाणी नीरवगगनं

सम्पूरयति रहसयतया"(8)।इति।

कवेरस्य सारल्येऽपि उपमार्थगौरवपदलालित्यादीनां श्रेष्ठगुणानां समन्वयो दृश्यते। तस्यानुवादं पाठं पाठं प्रसिद्धा निम्नोक्तिर्मनसि समायाति –

"उपमा कालिदासस्य भारवेरर्थगौरवम्।

दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः"॥ इति।

सावलीलशब्दसूत्रेण ग्रथितोऽयमनुवादग्रन्थः। यद्यप्याक्षरिकः सर्वत्र नानुसृज्यते कर्मण्यनुवादेऽस्मिन् तथापि मूललेखकस्य भावसाम्राज्यं कुत्रापि नातिक्रमत इति भावः। कवेः मौलिकविचारो यथाक्षुण्णः स्यादित्येतदर्थमनुवादकः सर्वत्र प्रयत्नशील आसीदिति तस्यानुवादतः प्रतीयते स्पष्टतया। तथाहि सर्वैः समालोचकैः कालीपदकृतानुवादो गीताञ्जलेः संस्कृतच्छन्दसा श्रेष्ठ इति मन्यते।

2. गीताप्रतिच्छाया

न केवलं संस्कृतानुवादे कालीपदस्य विशेषत्वं वरीवर्ति, चापि श्रीमद्भागवद्गीतायाः Blank Verse इति नव्यच्छन्दसा कृतो मूलानुरूपो वङ्गानुवादः खलु गीताप्रतिच्छायेति। अनुवादोऽयं देवयानपत्रिकायां प्रचरद्रूपतां गतः। अनुवादकेन श्रीमद्भगवद्गीताया भावसम्पत्तिं समसीकृत्य प्रेक्षापटञ्च सम्यक्तयावबुध्य क्वचिद्भावानुवादः क्वचिच्चाक्षरशोऽनुवादः कृतः। ये वङ्गीयाः संस्कृतं न जानन्ति, गीतार्थविबोधनाय गीताञ्च मातृभाषयानूद्य सौकर्यमनेन साधितम्। इह अनुवादे परिस्फुरन्ति काञ्चन मौलिकसौन्दर्यच्छटा, शब्दविन्यासचारुत्वं भङ्गिभणितिवक्रिमा चेति।

1415-वङ्गाब्दे श्रीमद्भगवद्गीतेति शीर्षके पुस्तकाकारेण संस्कृतपुस्तकभाण्डारात्प्रचरद्रूपतां गतमनुवादकर्मेदम्। अमित्राक्षरच्छन्दसानूदितं पुस्तकमिदं नित्य-नैमित्तिक-सर्वजनपाठयोग्यरूपेण प्रकाशितं यथा सर्वेषां वङ्गीयानां गीतायास्तत्त्वावबोधः अनायासयोग्यो भवेदिति धिया। ग्रन्थस्यास्य वैशिष्ट्यमेतद्यद्गीताया मूल-पद्यानुवाद-गूढ़शब्दार्थ-अध्ययनसारादिभिः समं महामहोपाध्यायस्य पवित्रजीवनकथा पाठाकानां कृते संयोजिता वर्तते। नित्य-नैमित्तिकपाठार्थमादावेव गीताध्यनं गीतामाहात्म्यञ्च संयोजिते वर्तेते ग्रन्थेऽस्मिन्। संस्कृतानभिज्ञो यथा कालीपदकृतानुवादं पठित्वा गीताया भावगाम्भीर्यमुपलब्धुं शक्नुयात्तदर्थम् अनुवादकस्यायं प्रयास इति मन्ये।

3. श्रीश्रीचण्डीप्रतिच्छाया

यद्यपि तर्कशास्त्रस्याद्वितीयो वेत्तासीत्कविरयं तथापि भक्त्याः प्रदीपं प्रज्वाल्य न्यायशास्त्रस्य गभीरारण्यमतिक्रामति कृत्स्नं जीवनं परिव्याप्य। श्रीचण्डीं प्रति जन्मान्तरसंस्कारस्येव परमविश्वासो बभूव तस्य। जन्मसूत्रेण लब्धे चण्डीमाहात्म्ये तस्यागाधास्था विद्यमानासीत्। विश्वासस्यास्य मूलं तन्मनसि एतावद्दृढं प्रोथितमासीद्यत् 1954-ईशवीयाब्दे संस्कृतमहाविद्यालयस्याध्यापनकर्मणः अवसरग्रहणात्परमेव सप्तशत्याः श्रीश्रीचण्ड्या अमित्राक्षरच्छन्दसानुवादकर्मणि कृतवान् आत्मनियोगम्। कालीपदविरचिता श्रीश्रीचण्डीप्रतिच्छाया हि मार्कण्डेयचण्डीग्रन्थानुवादः, यश्च Blank Verse इति छन्दसा लिखितो वङ्गभाषामयः।

तेनानुवादः अयं सरलवङ्गभाषया भावसम्पत्त्याः पूर्णप्राधान्यं विधाय कृतः। 1999-ईशवीयाब्दे आद्यापीठमुद्रणालयात् ग्रन्थाकारेण ब्रह्मचारिण्याः वेलादेव्या भूमिकया सह सोमेशचक्रवर्तिनः सपितृतर्पणं श्रश्रीचण्डीति नाम्ना प्रकाशितोऽनुवादोऽयम्। चरितत्रितयेन विभक्तोऽयं ग्रन्थः। प्रथमचरिते प्रथमाध्यायः, द्वितीये अध्यायत्रयं, चान्तिमे पञ्चमाध्यायात् त्रयोदशं यावत् अध्यायनवतयं सन्निवेशितानि वर्तन्ते। वैष्णवालंकारिकाणां नये, भक्तिरेव केवलो रसः। मन्ये कालीपदश्चण्डीं देवीं प्रति हृदोऽन्तस्थलाद्भक्तिभावयोरुद्रेकं विधायानुवादरूपं दुरूहं कर्म विहितवान्। अनुवादस्यास्य प्रतिपदं ध्वन्येते देवीं प्रति श्रद्धा विश्वासश्चेति।

उपसंहृतिः

परिशेषे वक्तव्यं यद् आङ्गलभाषायामेक आभाणकः श्रूयते – 'The perfume of a pristine thought can't in translation be caught' . अर्थादनुवादकेन कथमपि न प्रकाशार्हं प्राचीनभावसौन्दर्यम्। ननु संस्कृभाषाया मुपनिबद्धानामनूदितपद्यानां पाठाद्रसं निपीयापि पेपीयन्ते पाठकाः वङ्गभाषात्मकरवीन्द्रगीताञ्जलिवदिति चेदुच्यते सहृदयहृदया एव प्रमाणं तत्र। मन्ये आङ्गलाभाणकोऽयं न हि समेतः कालीपदस्यानुवादपरिप्रेक्षे। यतो गीर्वाणवाणीं न ज्ञात्वापि कोऽपि भाषान्तरीय जनोऽनुवादं पठित्वैवास्यार्थनिष्ठतात्पर्यमवगन्तुं शक्नुयादिति शम्।

अन्त्यटीकाः

1. श्रीरवीन्द्रनाथठाकुरः, गीताञ्जलिः, 1968, पृ.-62
2. कालीपदतर्काचार्यः, गीताच्छाया, 1969, पृ.-10
3. कामिनीकुमाराधिकारी, गीताञ्जलिसंस्कृतम्, 1961, पृ.-16
4. श्रीरवीन्द्रनाथठाकुरः, गीताञ्जलिः, 1968, पृ.-45
5. कालीपदतर्काचार्यः, गीताच्छाया, 1969, पृ.-44
6. करुणासिन्धुदासः (सम्पा.) संस्कृतसाहित्यपरिषत्पत्रिका (Vol.-LXXXXIV, NOS-1-2), 2011, पृ.-10
7. तत्रैव, पृ.-1
8. तत्रैव, पृ.-15

परिशीलिता ग्रन्थानुक्रमणी


- अधिकारी,कामिनीकुमारः(अनुवादकः).1961,गीताञ्जलिसंस्कृतम्,शिलचरः,रवीन्द्रशतवार्षिकीसमितिः.
- तर्काचार्यः, कालीपदः (अनुवादकः). 2008, गीताप्रतिच्छाया, कलिकाता, संस्कृतपुस्तकभाण्डारम्.
- ठाकुरः, रवीन्द्रनाथः. 1968, गीताञ्जलिः, कालीपदतर्काचार्यः (अनुवादकः), कलिकाता, विश्वभारतीग्रन्थनविभागः.
- दासः, करुणासिन्धुः (सम्पा.), 2011, संस्कृतसाहित्यपरिषत्पत्रिका ((Vol.-LXXXXIV, NOS-1-2), कलिकाता, संस्कृतसाहित्यपरिषत्.


Received on 18. 05. 2017 Accepted on 24. 07. 2017

# वक्रोक्तेर्विवर्तनसमीक्षणम्

**प्रदीपकरः***

**प्रबन्धसार**: -

*संस्कृतसाहित्यसमीक्षाशास्त्रेतिहासे विभिन्न प्रस्थानोत्पत्तिमूलभूतकारणं काव्यात्मानु-सन्धानमेव। कोऽस्ति काव्यस्यात्मा ? इति जिज्ञासाप्रशमनार्थमेव रीतिप्रस्थानं ध्वनिप्रस्थानं रसप्रस्थानं औचित्यप्रस्थानमित्यादीनि नैकविधानि प्रस्थानानि बहूनि च तत्त्वानि परिप्राप्यन्ते।*

*वक्रा उक्तिः। साधारणजनेतरा लोकोत्तरचमत्कारशालिनी उक्तिः भणितिः कथनं वेति वक्रोक्तिः। भामहेनालंकाराणां मूलीभूतेन स्वीकृता वक्रोक्तिः। तस्य नये, वक्रार्थप्रतिपादकशब्दप्रयोगेनैव सिध्यति अलङ्कारत्वं वाक्येषु इति मन्यते भामहः। दण्डिमते साधारणकथनभिन्ना चमत्कारपूर्णा उक्तिः वक्रोक्तिः। वामनः वक्रोक्तिमर्थालंकारं मनुते। रुद्रटः शब्दालंकाररुपेण वक्रोक्तिं स्वीकरोति। वक्रोक्तेरलंकारविशेषरुपेण समुल्लेखः प्राप्यते ध्वन्यालोके। भोजेन अलंकाराणां मूलाधाररुपेण वक्रोक्तिः प्रत्यपादि। मम्मटाचार्यादुत्तरवर्तिन आलंकारिकाः शब्दालंकाररुपेण वक्रोक्तिं स्वीकुर्वन्ति, रुय्यकेन तु अर्थालंकारत्वेन।*

*यद्यपि बहुभिरालङ्कारिकैः वक्रोक्ति उल्लिखिता तथापि वक्रोक्तिसम्प्रदायस्य प्रवर्तकोऽस्ति कुन्तकाचार्यः। काव्यशास्त्रे काव्यात्मभूतवस्तुरूपेण अलंकाररुपेण च वक्रोक्तिः स्वीकृता कुन्तकेन। शब्दार्थौ अलंकार्यौ, वक्रोक्तिस्तत्रालंकार इति कुन्तकस्याभिप्रायः। उत्तरकालिकैरालंकारिकैः वक्रोक्तिः सादरं न स्वीकृता। तथापि आधुनिककाले तत्त्वमिदं सगौरवं काव्यमीमांसाकैरभ्युपगम्यते। तुलनात्मकसाहित्यपरिशीलनेन वक्रोक्तितत्त्वस्य महती भूमिका उल्लेखनीया। वक्रोक्तिमभिलक्ष्य कुन्तकेन भणितम्- "शास्त्रादिप्रसिद्धशब्दार्थोपनिवन्धव्यतिरेकी... कविव्यापारः"। वक्रोक्तिः काव्यसृष्टेः मूलभूतमुपादानमित्यभिहितं कुन्तकाचार्येण । वक्रोक्तेः प्रधानं कारणं तु कविप्रतिभेति कुन्तकाचार्यस्य विचारणा । इति शम् ।*

**कुटशब्दाः**- वक्रोक्तिः, काव्यम्, अलंकारः, शब्दः, अर्थः ।

**वक्रोक्तिः-**

अलंकारग्रन्थपरिशीलनेनायमवगतो भवति यत्तत्रानेके आलंकारिकसम्प्रदाया आसन्। 'काव्यस्य क आत्मा'इत्यधिकृत्य प्रचलति आलङ्कारिकाणां विचारः। किमिदं तादृशं वस्तु विद्यते येन काव्ये काव्यत्वं आयाति पुनः यस्यापगमे तदपसरतीति जिज्ञासामाश्रित्य नानाविधसम्प्रदायानामुत्पत्तिरभूत् । उक्तजिज्ञासानिवृत्तये एव केचिदलंकारं केचिद्रीतिं केचिच्च ध्वनिं काव्यात्मत्वेन प्रमाणयन्ति। भरतमुनित आरभ्य कालक्रमेण समीक्षाभेदे विभिन्नशताब्दीषु बहूनां सम्प्रदायानामुत्पत्तिर्जाता। तथा चेदानीं यावत्प्रसिद्धिमुपगता केवलं प्रथमाः षट्सम्प्रदायाः –

1. भरतमुनेः रससम्प्रदायः
2. भामहोदभटरूद्रटानाम् अलंकारसम्प्रदायः

---

*शोधच्छात्रः रामकृष्ण-मिशन्-विद्यामन्दिरस्य

3. दण्डिवामनयोः गुणरीतिः सम्प्रदायः

4. आनन्दवर्धनाभिनवगुप्तयोः ध्वनिसम्प्रदायः

5. कुन्तकस्य वक्रोक्तिसम्प्रदायः

6. क्षेमेन्द्रस्य औचित्यसम्प्रदायः च।

यद्यपि काव्ये रस आत्मा, गुणाः रसधर्माः शौर्यादिवत् अलंकारा कटककुण्डलादिवदिति सामान्यतः सर्वेरप्यङ्गीक्रियते तथापि अलङ्कारेषु वक्रोक्त्यादिषु च काव्यसौन्दर्यहेतुत्वं पश्यद्भिः कैश्चित् त एव प्रधानतया प्रतिपादिताः, तेषु वक्रोक्तिप्रस्थानस्य प्रवर्तकः आचार्यकुन्तकः। अतोऽस्माभिरस्मिन् शोधप्रबन्धे आदौ कुन्तकपूर्ववर्तिनां भामहादीनामालंकारिकाणां वक्रोक्तितत्त्वं समीक्ष्य ततः आचार्यकुन्तकस्य वक्रोक्तिभावना आलोच्यते।

साहित्यरचना शास्त्रकाव्यभेदाभ्यां द्विधा भवति –शास्त्रे तु सामान्यव्यवहारार्थानवलम्ब्य लोके प्रचलिता शब्दाः प्रयुज्यन्ते । शब्दार्थयोः प्रयोगे वैलक्षण्यं नावलोक्यते। परन्तु काव्ये तादृशमार्गं न अनुसरन्ति कवयः। काव्ये कविभिः भिन्नमार्गमवलम्ब्यते। तत्र शब्दप्रयोगे काचित् चमत्कारिता परिदृश्यते। उदाहरणं यथा – कस्यापि जनस्य प्रथममेलनेन नामादिविषयकान् प्रश्नान् पृच्छन्ति जनाः । भवतां नाम किम् ? कुतः आगतः? इति तु लोके प्रचलिताः प्रश्नाः। परन्तु कविः पृच्छति “**कतम आर्येण राजर्षिवंशोऽलंक्रियते? कतमो विरहपर्युत्सुकजनः कृतो देशः? किं निमित्तं वा सुकुमारेण शरीरेण तपोवनगमनपरिश्रमस्यात्मा पात्रतामुपनीत ?**”[1]

अनयोर्वाक्ययोर्मध्ये कविविरचिते वाक्ये वैचित्र्यमुपलभ्यते इति सर्वेरपि आलंकारिकैः स्वीक्रियते। वाक्ये एतादृशं वैचित्र्यमेव वक्रोक्तिनाम्ना अभिधीयते। आचार्यकुन्तकेन वक्रोक्तिजीवितग्रन्थे उक्तम् - “**वैचित्र्याभिधा वक्रोक्तिरित्युच्यते।**”[2] काव्यस्यात्मा तु वक्रोक्तिरेव। वक्रोक्तिं विना काव्यत्वं न सम्भवति।

**<u>वक्रोक्तेः स्वरूपम्-</u>**

प्राचीनकालादेव वक्रोक्तिशब्दस्य प्रयोगः अवलोक्यते। वक्रा उक्तिः वक्रोक्तिः। वक्रा सर्वसाधारणजनकथ-नभिन्नलौकिकचमत्कारयुक्ता, उक्तिः कथनम्। साधारणजनो हि भावाभिव्यक्तये साधारणरूपेणैव शब्दप्रयोगं करोति, कविभिस्तु न तादृशो वाग्व्यवहारः क्रियते, तैस्तु लोकप्रसिद्धवाग्व्यवहारादितरः कोऽपि चमत्कारार्थप्रतिपादकवाग्व्य वहारः समाश्रीयते यः कुन्तकनये वक्रोक्तिरिति अपूर्वकविकर्मकौशलरूपेण परिचीयते। तथा चोक्तम् - “**वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते, वक्रोक्तिः प्रसिद्धाभिधानव्यतिरेकिणी वैचित्रैवाभिधो वैदग्ध्यं कविकौशलं तस्य भङ्गी विच्छित्तिः**” इति।[3]अतः वक्रोक्तिशब्दः कुटिलार्थप्रतिपादक इति सिध्यति।

अथर्ववेदे वक्रोक्तिशब्दः कुटिलार्थे प्रयुक्तः- “**अयं यो वक्रोक्तिपरूपव्यङ्गे मुखानि वक्रा वृजना कृणोषि।**”

कालिदासेनापि वक्रः इति शब्दस्य ऋजुभिन्नार्थे प्रयोगः कृतः-“**वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशाम्।**” (मेघदूत पूर्व.मे.29)

---

1 अभिज्ञानशकुन्तलम्, प्रथमाङ्कः

2 वक्रोक्तिजीवितम्, 10/1 वृत्तिभागः

3 वक्रोक्तिजीवितम् 11/1

**भामहः-**

वक्रोक्तेर्महनीयभावनायाः स्थापकरूपेण सर्वेऽप्यालंकारिकाः यस्य नाम अङ्गीकुर्वन्ति स भामहः। तेन विरचिते काव्यालंकारग्रन्थे अलंकाराणां प्राधान्यं दृश्यते। तेन भणितं वक्रोक्तिः काव्यस्य प्राणभूतात्मा इति। वक्रोक्तिं व्यतिरिच्य कदापि अलंकारो न सिद्ध्यति। अतः वक्रोक्तिविषये कविभिः यत्नः विधेयः। वक्रोक्तिरतिशयोक्तेः नामान्तरमिति भामहेन प्रतिपादितम्। तथा च-

**सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते।**
**यत्नोऽस्यां कविना कार्यः कोऽलंकारोऽनया विना।।**[4]

यद्यपि भामहेन वक्रोक्तेः पृथक् लक्षणं न कृतं तथापि वक्रोक्तेरतिशयोक्तेर्वालोचनावसरे वक्रोक्तितत्वं पूर्णरूपेण अङ्गीकृतम्। वक्रोक्तेरेवोपादेयत्वं स्वीकृत्य हेतुसूक्ष्मलेशाख्यान् अलंकारान् नाङ्गीकरोति आचार्यभामहः।

**हेतुश्च सूक्ष्मो लेशोऽथ नालङ्कारतया मतः।**
**समुदायाभिधानस्य वक्रोक्त्यनभिधानतः।।**[5]

वक्रार्थशब्दानां प्रयोगे काव्ये अलङ्कारत्वं सम्पद्यते। भामहेन कथ्यते-

**'वाचां वक्रार्थशब्दोक्तिरलंकाराय कल्पते।'**[6]

वक्रोक्तिशून्यत्वाद् हेतुसूक्ष्मादीनामलङ्कारत्वं न सिध्यतीति मन्यते भामहः। भामहमतमुल्लिख्य लोचनकारेणोक्तम्

**- 'शब्दस्य हि वक्त्रा अभिधेयस्य च वक्त्रा लोकोत्तीर्णेन रूपेणावस्थानम्।'**

**दण्डी –**

दण्डिना भामहसम्मता वक्रोक्तिरित्थमालोचिता काव्यादर्शग्रन्थे। सम्पूर्णवाङ्मयं द्विधा विभज्यते – स्वभावोक्तिः वक्रोक्तिः च। सर्वासु वक्रतासु श्लेषः प्रायः वर्तते इति तस्य अभिप्रायः। वाक्यस्य तात्पर्यमिदं भवति यत् काव्ये द्विप्रकारिकायाः शैल्याः प्रयोगः परिलक्ष्यते वक्रोक्तिपूर्णा स्वभावोक्तिपूर्णा चेति। श्लेषप्रयोगे वक्रोक्तिः समृद्धा भवतीति दण्डिनः मतम्। तथाहि –

**'श्लेषः सर्वासु पुष्णाति प्रायो वक्रोक्तिषु श्रियम्।**
**भिन्नं द्विधा स्वभावोक्तिर्वक्रोक्तिश्चेति वाङ्मयम्।।'**[7]

दण्डिना भामहनिरूपितस्य वक्रोक्त्यतिशयोक्त्योरभेदं स्वीक्रियते। अतिशयोक्तिस्तु लोकसीमातिवर्तिनी। सर्वेषु अलङ्कारेषु श्रेष्ठरूपेण परिगण्यते अतिशयोक्तिरेव। तथाहि –

**'विवक्षा या विशेषस्य लोकसीमातिवत्तिनी।**
**असावतिशयोक्तिः स्यादलङ्कारोत्तमा यथा।।'**[8]

आचार्येण दण्डिना स्वभावोक्त्यतिशयक्त्योरभिन्नता प्रतिपादिता। अलङ्कारेषु प्रधानालंकारः अतिशयोक्तिः इति तु सर्वेऽप्यालंकारिकाः स्वीकुर्वन्ति। यथा –

---

4 काव्यालंकार(89/2)
5 काव्यालंकार(86/2)
6 तत्रैव (66/5)
7 काव्यादर्शः (363/2)
8 तत्रैव (214/2)

**'अलंकारान्तराणामप्येकमाहुः परायणम्।**
**वागीशमहतामुक्तिमिमातिशयाह्वयाम्।।'**[9]

श्लोकस्याशयः- लोकसीमातिवर्त्तिनीस्वरूपातिशयोक्ति तथा स्वभावोक्त्या भिन्ना चमत्कृतोक्तिरूपवक्रोक्ति इत्यत्र कश्चित् भेदो नोपलभ्यते।

वक्रोक्तिस्तु व्यापकार्थे स्वीकृता दण्डिना। सर्वेषामलंकाराणाम् आधारभूता एव वक्रोक्तिः। वक्रोक्तिरतिशयक्त्योर्भेदः कोऽपि अस्त्येव। परन्तु दण्डिना उभयोर्मध्ये पृथक् स्थितिः निर्देशिता । भामहेन तस्या अलंकारता निराकृता। हृदयङ्गमटीकाकृताप्युक्तम् - "**वक्रोक्तिशब्देन उपमादयःसङ्कीर्णान्ता अलंकारा उच्यन्ते।**" इति।

**वामनः-**

वामनस्य काव्यालंकारसूत्रवृत्तिग्रन्थे वर्णिता वक्रोक्तिः भामहप्रतिपादिताया वक्रोक्तेः पृथग्रूपा एव। वामनेनोक्तं यत् वक्रोक्तिस्तु वाच्यालंकारविशेषः एव। सामीप्य-सादृश्य-समवाय-वैपरीत्यक्रियायोगरूपनिमित्त-प्रभेदभिन्नासु पञ्चविधासु लक्षणासु सादृश्यमूललक्षणा एव वक्रोक्तिरिति वामनेन स्वीकृतम् - "**सादृश्याल्लक्षणा वक्रोक्तिः।**"[10]
तेन प्रदत्तमुदाहरणं - '**उन्मीलकमलं सरसीनां कैरवञ्च निमीलितं पुरस्तात्।**'[11]

यथा उदिते सूर्ये सरोवरे कमलं प्रकाशते तथैव कैरवं निमीलितं भवति। अत्र कमलस्य विकासः कुमुदस्य सङ्कोचं सूचयति। नेत्रस्य उन्मीलनं निमीलनञ्च। वामनेनेयं सादृश्यमूलकलक्षणवक्रोक्तिरिति कथिता। परवर्तिकाले वक्रोक्तेरलंकारविशेषरूपप्रतिपादने या परम्परा परिलक्ष्यते, तस्याः प्रथमप्रवर्तकः आचार्यवामनः।

**रुद्रटः-**

भामहेनोद्भावितं वक्रोक्तिस्वरूपं दण्डिभावनायां सङ्कुचितं जातं, वामनस्य चिन्तने ततोप्यधिकं सङ्कुचितं, अन्तिमपर्याये रुद्रटस्य विचारे सा वक्रोक्तितत्त्वरूपरहिता सती केवलं शब्दालङ्कारतया पर्यवसिता। वक्रोक्तेः लक्षणनिरूपणे पूर्ववर्तिनामालंकारिकाणां पदाङ्कं नानुसृतं रुद्रटेन। भिन्नार्थबोधकशब्दश्रवणद्वारेण अनीप्सितमचिन्तितपूर्वमुत्तरं दीयते इति चेत्तदा भवति वक्रोक्तिरिति मन्यते रुद्रटः। रुद्रटेन श्लेषकाकुभेदेन वक्रोक्तिः द्विविधा कथिता। तथाहि –

**'वक्त्रा तदन्यथोक्तं व्याचष्टे चान्यथा तदुत्तरतः।**
**वचनं यत्पदभङ्गैः ज्ञेया सा श्लेषवक्रोक्तिः।।'**[12]

वक्रान्योक्तं वाक्यं श्रुत्वा उत्तरदात्रा यद्यन्यथा व्याख्यायते तदा श्लेषवक्रोक्तिर्भवति। उदाहरणम्-

**किं गौरि मां प्रति रूपा ननुगौरहं किं**
**कुप्यामि कां प्रति मयीत्यनुमानतोऽहम्।**
**जानाम्यतस्त्वमनुमानत एव रत्य-**
**मित्थं गिरो गिरिभुवः कुटिला जयन्ति।।** इति।

---

9 तत्रैव (220/2)
10 काव्यालंकारसूत्रवृत्तिः (8/3/4)
11 तत्रैव
12 काव्यालंकार (14/2)

रुद्रटानुसारेण काकुवक्रोक्तेः स्वरूपम् –

**विस्पष्टं क्रियमाणादक्लिष्टा स्वरविशषतो भवति।**

**अर्थान्तरप्रतीतिर्यत्रासौ काकुवक्रोक्तिः।।** इति।

विस्पष्टमभिधीयमानादर्थात् काकुवशाद् अर्थान्तरप्रतीतिर्भवति तदा काकुवक्रोक्तिः। उदाहरणं यथा–

**शल्यमपि स्खलदन्तः सोढुं शक्यते हालाहलदिग्धम्।**

**धीरैर्न पुनरकारणकुपितखलालीकदुर्वचनम्।।** इति।

श्लोकस्यास्य प्रथमपादे खल इति शब्दः दुःसहत्वद्योतनार्थं प्रयुक्तः, द्वितीयपादे तद्विपरीतत्वमिति। तत्र आनन्दवर्धनाभिनवगुप्तयोः चिन्तनम् – वक्रोक्तितत्वस्य स्वरूपविमर्शने आनन्दवर्धनाभिनवगुप्तयोर्वर्तते महदवदानम्। वक्रोक्तेरलंकारविशेषता एताभ्यामालंकारिकाभ्यां स्वीकृता। ध्वनिसंस्थापकाचार्यानन्दवर्धनेन यद्यपिवक्रोक्तिरिति शब्दस्य उल्लेखः न कृतः तथापि अनेकेषु स्थलेषु वक्रोक्तितत्त्वस्य समीक्षणं कृतमिति दृश्यते।**'तत्र वक्रोक्त्यादि वाच्यालङ्कारव्यवहारः।'**[13] सर्वेष्वलङ्कारेषु अतिशयोक्तिः अलङ्कारोत्तमा इति तु मन्यते आनन्दवर्धनः। अतिशयोक्तिः काव्ये शोभां नितरां वर्द्धयति। प्रसङ्गेऽस्मिन् भामहेन प्रोक्तम् - 'सैषा सर्वत्र वक्रोक्तिः' ।

अतिशयोक्तिं व्यतिरिच्य कोऽप्यालंकार न सम्भाव्यते। यदि कुत्रापि तद्भवेत् तर्हि तद् अलंकाररूपेणैव न गण्यते। अतिशयोक्तौ सन्ति सर्वेऽलङ्काराः सूत्रे मणिगणाविव इत्यतः सर्वालङ्कारस्वरूपा।**"यतः प्रथमं तावदतिशयोक्तिगर्भता सर्वालंकारेषु शक्यक्रिया कृतैर्वचसा महाकविभिः कामपि काव्यच्छविं पुष्यतीति कथं हि अतिशययोगिता स्वविषयौचित्येन क्रियमाणा सती काव्येनोत्कर्षमावहेत्। तत्रातिशयोक्तिः यमलंकारमधितिष्ठति काव्यप्रतिभावशात् तस्य चारुत्वातिशययोगोऽन्यस्यत्वलंकारमात्रतैवेति सर्वालंकार-शरीर-स्वीकरणयोग्यत्वेनाभेदोपचारात् सैव सर्वालंकाररूपा इत्ययमेवार्थोऽवगन्तव्यः।"**[14]

वक्रोक्त्यतिशयोक्तोरभेदः स्वीकृतः भामहेन। एवमानन्दवर्धनोऽपि भामहमार्गावलम्बी जातः। ध्वन्यालोकस्य प्रथमोद्योते तृतीयाभाववादिनां मतप्रतिष्ठावसरे मनोरथनाम्ना कविना कृतः श्लोक एकः उपस्थापितः –

**यस्मिन्नास्ति न वस्तु किञ्चन मनः प्रह्लादि सालंकृतिः**

**व्युत्पन्नै रचतञ्च नैव वचनैर्वक्रोक्तिशून्यञ्च यत्।**

**काव्यं तद् ध्वनिना समन्वितमिति प्रीत्या प्रशंसनोजडो**

**नो विद्मोऽभिदधाति किं सुमतिना पृष्टः स्वरूपं ध्वनेः।।** इति।

तन्मते वक्रोक्तिः अलंकारसामान्यरूपा। श्लोके वक्रोक्तिशून्यं च यत् - इत्यत्र वक्रोक्तिपदेन तु उत्कृष्टसङ्घटना एव अवगम्यते। एवम्प्रकारेण वक्रोक्तिशून्यस्य इत्यस्यार्थो भवति शब्दार्थगुणानां सङ्घटनाशून्य एव। समालोचकाः वक्रोक्तिशून्यशब्दस्यार्थं निरूपयन्ति - **'अलंकारसामान्यस्याभावः।'** इति। तथा -

**"वक्रोक्तिरुत्कृष्टसङ्घटना। तच्छून्यमिति शब्दार्थगुणानाम्। वक्रोक्तिशून्यशब्देन सामान्यलक्षणाभावेन सर्वालंकाराभाव उक्त इति केचित्।।"**[15]

वक्रोक्तिः व्यापकार्थे प्रयुक्ता अभिनवगुप्तेन । भामहनिरूपिताया अतिशयोक्त्येः सर्वालंकारत्वं स्वीकृत्य

---

13 ध्वन्यलोक (22/2 वृत्तिभागः)

14 तत्रैव (37/3 वृत्तिभागः)

15 तत्रैव (लोचनटीका)

वक्रोक्तेःस्वरूपं तेन प्रतिपादितम् - **“यातिशयोक्तिर्लक्षिता सैव सर्वा वक्रोक्तिरलंकारप्रकारः सर्वः। वक्राभिधेयशब्दोक्तिरष्टा वाचामलंकृति**रि’’ति वाक्येन। शब्दस्य हि वक्रता अभिधेयस्य च वक्रता लोकोत्तीर्णेन रूपेणावस्थानमित्ययमेवासावलंकारभावः, लोकोत्तरतैव चातिशयः, तेनातिशयोक्तिः सर्वालंकारसामान्यम्। तथाहि अनयातिशयोक्त्यार्थः सकलजनोपभोगपुराणीकृतोऽपि विचित्रतया भाव्यते। तथा प्रमोदोद्यानादिः विभावतां नीयते।[16]

**भोजः**

भामह-दण्डी-वामन-रुद्रटैः प्रतिपादितं वक्रोक्तेः स्वरूपमुल्लिखितं भोजराजेन तदीये सरस्वतीकण्ठाभरणशृङ्गारप्रकाशे च। शृङ्गारप्रकाशे भोजेन कथितम् - **‘कः पुनरनयोः कविवचसोः ध्वनितातत्पर्योः विशेषः?’**उच्यते -

**यदवक्रं वचः शास्त्रे लोके च वच एव तत्।**
**वक्रं यदर्थवादादौ तस्य काव्यमिति स्मृतिः।।**[17]

काव्यवचने अतिशयवक्रतायुक्तं यत् तात्तपर्यं वर्तते तदेव ध्वनिः कथ्यते -

**तात्पर्यं यस्य काव्येषु ध्वनिरिरिति प्रसिद्धिः।**

तदुक्तम् - **‘तात्पर्यमेव वचसि ध्वनिरेव काव्ये।’**[18]

आचार्यभोजेन समर्थितं भामहनिरूपितवक्रोक्तेः स्वरूपम्। शृङ्गारप्रकाशस्य द्वितीयखण्डे तेनोक्तम् –

**“इत्यतदपि सर्वालंकारसाधारणं लक्षणमनुसर्तव्यम्। अस्मिन् सति सर्वालंकारजतयो वक्रोक्त्यभिधानवाच्या भवन्ति। तदुक्तम् – वक्रत्वमेव काव्यानां परं भूषणेति भामहः।** ’’[19] वक्रोक्तिः स्वभावोक्तिभेदेन समस्तवाङ्मयं द्विधा विभक्तमिति इति दण्डिना प्रतिपादितम्। आचार्यभोजेन कविवाङ्मयं वक्रोक्ति-रसोक्ति-स्वभावोक्तिभेदेन त्रिधा विभक्तम् -

**वक्रोक्तिश्च रसोक्तिश्च स्वभावोक्तिश्चेति वाङ्मयम्।**
**सर्वासु ग्रहीणी तासु रसोक्ति प्रतिजानते।।** [20]

शृङ्गारप्रकाशे च –

**‘त्रिविधः खलु अलंकारवर्गो वक्रोक्तिः स्वभावोक्तिः रसोक्तिरिति। ’**

भामहेन प्रोक्तं यत् अलंकारस्य अर्थात् काव्यसौन्दर्यस्य रूपत्रयं विद्यते सत्यपि उपमाप्राधान्येन वक्रोक्तिर्भवति, गुणानां प्रधानतया स्वभावोक्तिः तथा विभावादिसंयोगैः यत्र रसनिष्पत्तिर्जायते तत्र रसोक्तिर्भवति।[21]

आचार्यभोजः शृङ्गारप्रकाशस्य शब्दशक्तिवर्णनप्रसङ्गे वामनस्य वक्रोक्तेर्लक्षणं स्वीकृतवान्। वामनेनोक्तम् - **‘सादृश्यलक्षणा वक्रोक्तिः’** इति।

---

16 तत्रैव (लोचनटीका)
17 शृङ्गारप्रकाशः 6/1
18 तत्रैव 372-371
19 तत्रैव
20 सरस्वतीकण्ठाभरणम् (5/28)
21 काव्यात्ममीमांसा (1/3)

वामनस्य वक्रोक्तिस्वरूपं भोजे किञ्चिदन्यथात्वं भजते इति दृश्यते -

**अभिधेयाविनाभूत-प्रतीतिर्लक्षणोच्यते।**

**सैषा विदग्धवक्रोक्तिजीवितं वृत्तिरिष्यते।।**[22]

कारिकाविषये भोजराजेन अधिकव्याख्यानं न प्रदत्तम्। विषयेऽस्मिन् आधुनिकसमीक्षकेन ड.राघवानन्दमहाभागेनोक्तम्

**'Bhoja does not mean a re-statement of Vãmana's Vakrokti based on sãdrsya-laksanã, but seems to mean that laksanã of all kinds are found to lie at the root of all kinds of vakrokti as a fecund principle '**[23]

शब्दालंकाररूपेण वक्रोक्तिं स्वीकृतवान् आचार्यमम्मटः। तेन वक्रोक्तिः द्विधा विभक्ता – श्लेषवक्रोक्तिः काकुवक्रोक्तिश्चेति।

**यदुक्तमन्यरथावाक्यमन्यथाऽन्येन योज्यते।**

**श्लेषेण काक्वा वा ज्ञेया स वक्रोक्तिस्तथा द्विधा।।**[24]

मम्मटाचार्य इव उत्तरकालभूतालङ्कारिकाः हेमचन्द्र-जयदेव-विद्याधर-विश्वनाथ-वाग्भट्ट-विद्यानाथादयोऽपि शब्दालङ्कारविशेषतया वक्रोक्तिमङ्गीकृतवन्तः। अर्थालंकाररूपेण स्वीकृता रुय्यकेन। तथा चोक्तम् - **'अन्यथोक्तस्य वाक्यस्य काकुश्लेषाभ्यामन्यथा योजनं वक्रोक्तिः।'**[25]

<u>कुन्तकाचार्यः-</u>

वक्रोक्तिसम्प्रदायस्य प्रवर्तकरूपेण यस्य नाम सर्वे अपि स्वीकुर्वन्ति स तु आचार्यकुन्तकः। व्यवस्थितरूपेण वक्रोक्तितत्त्वं तेन प्रतिष्ठापितम्। तेन पूर्ववर्तिनामालंकारिकाणां वक्रोक्तिलक्षणं समुद्धृत्य स्वकीये वक्रोक्तिजीविते स्व सिद्धान्तमुपस्थापितम्।कुन्तकनये शब्दार्थौ अलङ्कार्यौ, वक्रोक्तिः तस्य अलंकारस्वरूपः एव। तेनोक्तम् – **वैदग्ध्यभणितिर्वक्रोक्तिरिति। तच्च व्याख्यातमेवं वृत्तौ – वैदग्ध्यं विदग्धभावः कविकर्मकौशलं तस्य भङ्गी विच्छित्तिः तया भणितिः।**[26] भामह-वामन-दण्डी-रुद्रटादिभिः यद्यपि वक्रोक्तिः सामान्यस्वरूपेण केवलं शब्दार्थनिष्ठालङ्काररूपेण परिगणिता, कुन्तकेन तु तस्याः वक्रोक्तेः अलङ्कारस्वरूपमतिरिच्य व्यापकार्थत्वं सर्वथा उररीकृतम्। वक्रोक्तितत्त्वविवेचने वैज्ञानिकी औचित्यपूर्णा च भावना समागता कुन्तकस्य। कुन्तकपरवर्तिनः आचार्याः यद्यपि कुन्तकस्य मतं नाङ्गीकुर्वन्ति तथापि अलंकारशास्त्रे महत्वपूर्णं स्थानमस्ति कुन्तकस्य।

वक्रोक्तिसम्प्रदायः काव्ये प्रसिद्धसम्प्रदायः इति कुन्तकस्याभिप्रायः। कुन्तकः वक्रोक्तिमलंकारत्वेन न स्वीकृतवान्। वक्रोक्तिविषये कुन्तकेन प्रतिपादितम् –

**उभावेतालङ्कार्यौ तयोः पुनरलङ्कृतिः।**

**वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते।।**[27] इति

---

22 शृङ्गारप्रकाशः (अध्याय 7)

23 भोजस्य शृङ्गारप्रकाशः

24 काव्यप्रकाशः (नवमोल्लासः 78-)

25 अलंकारसर्वस्वम्

26 वक्रोक्तिजीवितम् (10/1, वृत्तिः)

27 तत्रैव – 10/1

अलंकार्यौ शब्दार्थौ तथा वैचित्र्यपूर्णशैल्या कथनरूपवक्रोक्तिः तयोरलंकारः। अलंकारशब्दस्य कोऽर्थः इति जिज्ञासायामुच्यते अनुप्रासोपमादिवत् कोऽपि विशिष्टालंकारो नास्ति। काव्ये प्रयुक्तः अलंकारशब्दः काव्यतत्त्वस्य सूचकस्वरूपेण ज्ञायते। वक्रोक्ति अपूर्वालंकाररूपा इति तु कुन्तकस्य चिन्ता। तथा चोक्तं –

**लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये।**

**काव्यस्यायमलंकारः कोऽप्यपूर्वो विधीयते।।** [28] इति

तन्मते लोकसामान्यवचनाद् भिन्नं विशिष्टं किमपि कथनं वक्रोक्तिः। स स्पष्टरूपेण वदति - **'वक्रोक्तिःप्रसिद्धाभिधानव्यतिरेकिणी विचित्रैवाभिधा।'**

लोकप्रचलितवाक्यभिन्नंचमत्कारपूर्णवाक्यंसाहित्यस्रष्टायदाकाव्येप्रयुङ्क्तेतदावक्रोक्तिर्भवति।कविप्रतिभैव कविकर्मणा उत्सभूताइत्यस्मिन् विषये कुन्तकस्य मतं –

**शब्दार्थौसहितौवक्रकविव्यापारशालिनी।**

**बन्धेव्यवस्थितौकाव्यंतद्विदाह्लादकारिणी।।** इति

अस्ति तावन्मतवैविध्यं वक्रोक्तिविषयमधिकृत्य आलङ्कारिकेषु । काव्यस्य आत्मतां रूपेण वक्रोक्तिं स्वीकुर्वन्ति केचन।सौन्दर्यस्यविधायकरूपा भवति वक्रोक्तिरिति केचन वदन्ति । भामहाचार्येण प्रतिपादितां केवलमलङ्कारस्वरूपभूतां वक्रोक्तिमाश्रित्य कुन्तकाचार्येण कविकर्मकौशलविच्छित्तिविचित्राभिधाभूतायाः वक्रोक्तेः काव्यात्मभूतत्वं स्वकीये वक्रोक्तिजीवितग्रन्थे सयुक्तिकं सोदाहरणं समुपस्थापितमिति दृश्यते। सत्यमिदं यदानन्दवर्धनेन प्रतिपादितं काव्यात्मभूतं ध्वनितत्त्वं कुन्तकेन विशेषतया नाङ्गीकृतं तथापि तत्कृतायाः वैदग्धभङ्गीभणितिभूतायाः वक्रोक्तेः व्याख्यानात् प्रकारान्तरेण तेन ध्वनेः व्यङ्ग्यार्थस्य वा प्राधान्यं काव्ये नाङ्गीकृतमित्यनुमीयतेऽस्माभिः।

इदानीमिदं निश्चप्रचं वक्तुं शक्यते यत्काव्ये वक्रोक्तिः रसत्वेन पोषकत्वेन वा अङ्गीक्रियते -

संक्षेपेण कृता ह्येषा समीक्षाल्पधिया मया।

गूढां वक्रोक्तिमाश्रित्य विवुधान् सा प्रसीदतु।।इतिशम्।

**सहायकग्रन्थसूची**


१. आनन्दवर्धनः, २००५,ध्वन्यालोक: (अभिनवगुप्तप्रणीतलोचनटीकया सहित:), सम्पादकौ – सुवोधचन्द्रगुप्तः कालिपदभट्टाचार्यः च, कलिकाता, संस्कृत बुक् डिपो ।

२. कलिदास:, २०१२, अभिज्ञानशकुन्तलम्, सम्पादक:- सत्यनारायणचक्रवर्ती, कलिकाता, संस्कृतपुस्तकभाण्डार: ।

३. दण्डी आचार्य:, २००५,काव्यादर्श:, शशिप्रभासंस्कृतहिन्दीव्याखासहित:, सम्पादको व्याख्याकार: च- जमुना पाठक:, वाराणसी, चौखाम्बा कृष्णदास अकादेमी ।

४. वामनः, काव्यालंकारसूत्रवृत्तिः, सम्पादक:-ड.अनिलचन्द्र-वसु, कलिकाता, संस्कृतपुस्तकभाण्डारः ।


28 तत्रैव – 2/1

५.	विश्वनाथः, २०१५, साहित्यदर्पण:,( लक्ष्मीटीकोपेत:), सम्पादक:- आचार्य-कृष्णमोहन-शास्त्री, वाराणसी, चौखम्भा-संस्कृत-संस्थानम्।

६.	भामहः, २००२, काव्यालंकार:,सम्पादक:- रामानन्दशर्मा,वाराणसी, चौखम्बा संस्कृत-सीरीज –अफिस।

७.	मिश्रः,जगदीशचन्द्रः,२०१५, संस्कृतकाव्यशास्त्रेतिहास:, वाराणसी, चौखम्बा सुरभारती प्रकाशनम्।

८.	मम्मट:, २००७, काव्यप्रकाश:, (हरिशंकरशर्मामहोदयस्य नागेश्वरीटीकया सहित:), वाराणसी,चौखम्बा प्रकाशनम्।

९.	रुय्यक:,१९८२, अलंकारसर्वस्वम्, निर्णयसागरसंस्करणम्,पुना, भारतीयविद्याप्रकाशनम्।

१०.	रुद्रट:, २०१०, काव्यालंकार:,सम्पादक:- आर.के.शर्मा, जयपुरम्, राष्ट्रियसंस्कृतसंस्थानम् ।

११.	Kane, P.V., 1961, History of Sanskrit poetics, Delhi,Motilal Bansrasi Das.

१२.	Mukherjee, Ramaranjan, 1966, Literary Criticism in Ancient India, Calcutta, Sanskrit Pustak Bhandar.

Received on 23. 05. 2017 Accepted on 24. 07. 2017

# भारवेरलंकारप्रयोगवैविध्यम्

भास्करगङ्गोपाध्यायः*

**प्रबन्धसारः**

संस्कृतसाहित्याकाशे कविकुलचूड़ामणिः कालिदासः श्रेष्ठोऽपि एककाव्यरचनया यः साहित्यजगतीतले सहृदयहृदयं समाकृष्टवान्, स हि किरातार्जुनीयमिति महाकाव्यकृद्भारविः। रसप्रवाहोज्ज्वले ध्वनिचमत्कारद्योतिते भारविकाव्ये अलंकारा: सावलीलतया स्वत:स्फुर्तया च सम्मृक्ता: प्रतिभान्ति। विचित्रा अलंकारपरम्परा अहंपूर्विकया परापतति भारवे: वाङ्निर्मितौ।

व्यवहारजीवने या भाषा व्यवहृयते, तस्याः काव्ये व्यवहृतभाषायाः कुत्र पार्थक्यम् इति जिज्ञासायां स्वत एव उत्तरं भवेत् - अलंकारप्रयोगे वक्रोक्तिसमायोजने वेति। अतः किरातार्जुनीयमिति महाकाव्यस्यास्य प्रथमे सर्गे अलंकारवैविध्यमस्माभिः प्राप्यते। तत्र सादृश्यमूलकेष्वलंकारेषु उपमा, उत्प्रेक्षा, अतिशयोक्तिः इति अलंकाराः, विशेषणविच्छित्तिमूलकेष्वलंकारेषु समासोक्तिः, श्लेषः, अर्थान्तरन्यासः चेति, गम्यत्वविच्छित्तिमूलकेष्वलंकारेष्वतिशयोक्तिः, विषमञ्चेत्यलंकारद्वयम्, न्यायविच्छित्तिमूलकेषु केवलं काव्यलिङ्गमलंकारः, मिश्रभेदान्तर्गतौ संसृष्टिः संकरश्चेति द्वावलंकारावत्रापि परिप्राप्यन्ते। किरातार्ज्जुनीयमित्यस्य प्रथमे सर्गे शब्दालंकारत्वेन अनुप्रासयमकयोः प्रयोगः दृश्यते।

भारवेः काव्ये अलंकारप्रयोगवैशिष्ट्यं दृष्ट्यैतद्वक्तुं शक्यं यदेते अलंकाराः रसाक्षिप्ताः अपृथग्-यत्ननिर्भराश्चेति।

**मूलशब्दावली**

भारविः, किरातार्जुनीयम्, अलंकारः, सौन्दर्यम्, उपमा, समासोक्तिः, अर्थान्तरन्यासः, काव्यलिङ्गम्, उत्प्रेक्षादिः, रसाक्षिप्तत्वम्, अपृथग्-यत्ननिर्भरता चेति।

**उपोद्घातः**

संस्कृतसाहित्यगगने रवीयते तत्र भवान् कालिदास:। स प्राचीनकालात् आरभ्य चिरमस्ति उज्ज्वल:। तथाहि संस्कृतसाहित्यस्य युगनिर्धारणे युगद्वयं निर्णीयते- (१) प्राक्कालिदासीययुग: (२) कालिदासोत्तरयुगश्चेति। प्राक्कालिदासीययुगे महाकविद्वयं स्वकारयितृप्रतिभया रवीयते संस्कृतसाहित्ये। परन्तु कालिदासोत्तरयुगे भट्टि-कुमारदास-माघ-भारवि-श्रीहर्षाद्वय: ये खलु कवय: स्वस्वकवित्वगरिम्ना संस्कृतकाव्यालोके विचरन्त: यशया च सहृदयहृदयं समाकृष्टवन्त: तेषु भारवि: श्रेष्ठ: इत्यत्र नास्ति सन्देह:। कवित्वमहिम्नि कालिदासेन सह भारवि: समभावेन जनमनसि सुप्रतिष्ठित आसीत् तस्य प्रमाणं प्राप्यते आइहोलशिलालेखे--------

"येनोयोजि नवेऽश्मस्थिरमर्थविधो विवेकिना किनवेश्म।
स विजयतां रविकीर्ति: कविताश्रितकालिदासभारविकीर्ति:"(१)॥इति

---

* गवेषकः, रामकृष्णमिशन्-विद्यामन्दिरस्य

संस्कृतमहाकाव्यपरम्परायां भारवे: स्थानं तृतीयं कालक्रमदृष्ट्या। स हि संस्कृतकाव्यजगति अलंकारशैल्या: प्रथम: उन्नायक: पण्ठितयुगस्य प्रवर्तक: च। तस्य किरातार्जुनीयं महाकाव्यं प्रसिद्धं यद्धि काव्यसर्वस्वभूतयो: भावकालपक्षयो: समन्वयापेक्षया अपि कवे: पाण्ठित्यप्रदर्शनमेव प्राधान्येन अवलम्वते।

रसप्रवाहोज्ज्वले ध्वनिचमत्कारद्योतिते भारविकाव्ये अलंकारा: सावलीलतया स्वत:स्फुर्तया च सम्मृक्ता: प्रतिभान्ति। विचित्रा अलंकारपरम्परा अहंपूर्विकया परापतति भारवे: वाङ्निर्मितौ। तत्र उपमालंकारमधिकृत्य विविधा समीक्षा विहिता विद्वद्धि:। तत्र उपमापदेन सर्वेषां सादृश्यमूलकानाम् अलंकारानां ग्रहणम्। यत: सादृश्यमूलकेषु अलंकारेषु उपमा उपजीव्यभूता। न केवलम् उपमालंकारप्रयोगे अपि च समासोक्ति- श्लेषार्थान्तरन्यास- विरोध- विभावना- विशेषोक्ति- काव्यलिङ्गपरिसंख्या- स्वभावोक्ति- यमकानुप्रसादीनाम् अलंकाराणां प्रयोगे भारवि: सिद्धहस्त इत्यत्र नास्ति संशय:।

**भारविस्तदीयकृतित्वम्**

विविधरूपा किंवदन्तीः आश्रित्य भारवेः व्यक्तिजीवनं स्फुटं काशते। तस्य स्वरचनायां तु व्यक्तिजीवनस्य किमपि तथ्यं न उपलभ्यते। सामान्यं किञ्चित्तथ्यजातं प्राप्यते अवन्तिसुन्दरीकथायाम् अवन्तीसुन्दरीकथासारे च। अस्मात् ग्रन्थद्वयाज्ज्ञायते यद्भारवेः अपरं नाम दामोदर इति। स उत्तरपश्चिमभारतस्य गुजराटराज्यान्तर्गतस्य आनन्दपुरे कौशिकगोत्रीयब्राह्मणपरिवारे उवास। परवर्तिनि काले दाक्षिणात्ये नासिकान्तरर्गतस्य अचलपुरग्रामस्य वास्तव्यः स खलु। तस्य पितुः नाम नारायणस्वामीति।

महाभारतयुद्धकालतः ३०३० वर्षानन्तरं , कलेः ३५३०+३०५=३७३५ मितवर्षे शककालात् ५५६-व्यतितेषु युधिष्ठिरः जनिं लेभे। महाभारतयुद्धे सः अशीतिवर्षवयस्क आसीत्। तथा एव नृपविक्रमाङ्कात् २३५-वर्षेषु यातेषु शकयुगः प्रवर्तितः मन्यते। तेन शकारुख्रीष्टाब्दाभ्याम् अपि ३८-वर्षेभ्यः अनन्तरं विद्यते। अतः अस्य कालः ६७१ मितवैक्रमाब्दम् अभितः दृश्यते। अस्मिन् विषये राजशेखरेण निगदितम्------

"इह कालिदासभर्तमेण्टावत्रामवरपसूरभारवय:
हरिचन्द्रचन्द्रगुप्तौ परीक्षिताविह विशालायाम्"२॥इति

भारविना जीवद्दशायां केवलम् एकमेव 'किरताज्र्जुनीयम्' इति महाकाव्यं विरचितम्। अनेन एकेनैव महाकाव्येन यशसः शीर्षम् आरोहितवान्। महाकाव्यमिदं अष्टादशस्वर्गसम्पूर्णम्। महाभारतस्य वनपर्वणि समुल्लिखितम् अर्जुनस्य पाशुपतास्त्रप्राप्तिवृत्तान्तमादाय निबद्धमिदं महाकाव्यं भावपक्षापेक्षया कालपेक्षमेव समधिकं पुष्णाति। यद्यपि भारवेः कथाविस्तारेण सह महाकाव्यस्य वृत्तविन्यासस्य पार्थक्यम् अस्ति, तथापि आलंकारिकानां विचारानुसारं कविः स्वमनसः माधुरीं मेलयित्वा कल्पनाया मिश्रणेन महाकाव्यमिदं रचितवान्। यतो हि "निरंकुशा वै कवयः" इति।

**कविकृतावलंकाराणामुपयोगः**

व्यवहारजीवने या भाषा व्यवह्यते तस्याः काव्ये व्व्हतभाषायाः कुत्र पार्थक्यम् इति जिज्ञासायां स्वतः एव उत्तरं भवेत् - अलंकारप्रयोगे वक्रोक्तिसमायोजने वेति। अस्माकं व्यवहारिकजीवनस्य भाषा निराभरणा। तत्र नास्ति शब्दानां परिमार्जने विशेषविन्यासे च कापि प्रचेष्टा।

प्राचाम् आलंकारिकानां काव्यलक्षणपर्यालोचनात् काव्ये अलंकाराणां प्राधान्यम् स्पष्टमेव अभिलक्षितम् भवेत्। तथा हि भामहेन काव्यालंकारे अलंकृतयोः शब्दार्थयोः साहित्यमेव काव्यम् इति निगदितम्। काव्ये अलंकाराणाम्

उपयोगविषये भामहस्य अभिमतम् एव --"न कान्तमपि निर्भूषं विभाति वणितानमम्"(३)। वामनस्य मते सौन्दर्यमेव अलंकारः। तथा हि तेन उक्तम् ---'सौन्दर्यमेव अलंकारः'(४)। साधारणलौकिकबुद्ध्या काव्येन सह अलंकारस्य अविच्छेद्यसम्बन्धत्वम् उद्घोषयता केनचित् आलंकारिकेनोक्तम्----"यः अलंकाररहितं शब्दार्थयुगलं काव्यत्वेन मन्यते तेन उष्णताविरहितः पदार्थविशेषः अनलत्वेन कथं न मन्यते?" इति। वस्तुतः सौन्दर्यसम्पादने अलंकाराणाम् अस्ति गौरववती भूमिका।

**अलंकाराणां वर्गीकरणम्**

अलंकाराणां स्वरूपविवेचने यथालंकाराणां यत्नः लक्षते न तथा तेषां वर्गीकरणे। अलंकाराणां वर्गीकरणमाश्रित्य यैः आलंकारिकैः समीक्षणं विहितं तेषु रुद्रट-रुय्यक-विद्याधरादीनां नामानि उल्लेख्यनीयानि। अलंकाराणां प्रकृत्यनुसारेण एव तेषां वर्गीकरणं रुय्यकेन विहितम्। प्रथमं तेन शुद्धमिश्रभेदेन अलंकाराणां द्वैविध्यं स्वीकृतम्। रुय्यकेन सर्वे अर्थालंकाराः सप्तसु वर्गेषु विभाजिताः। तथा हि----

(१) सादृश्यविच्छित्तिमूलकः

(२) विशेषणमूलकः

(३) गम्यत्वविच्छित्तिमूलकः

(४) विरोधविच्छित्तिमूलकः

(५) न्यायविच्छित्तिमूलकः

(६) गूढार्थविच्छित्तिमूलकः

(७) शृङ्खलाविच्छित्तिमूलकः चेति।

भारविविरचितस्य 'किराताज्र्जुनीयम्' इति महाकाव्यस्य प्रथमे सर्गे अलंकारवैचित्र्यम् अस्माभिः प्राप्यते। तत्र सादृश्यमूलकेष्वलंकारेषु उपमा, उत्प्रेक्षा, अतिशयोक्तिः इति एते अलंकाराः किराताज्र्जुनीयस्य प्रथमे सर्गे परिलक्ष्यन्ते। विशेषणविच्छित्तिमूलकेष्वलंकारेषु समासोक्तिः, श्लेषः, अर्थान्तरन्यासः चेति एते अलंकाराः परिदृश्यन्ते। गम्य त्वविच्छित्तिमूलकेष्वलंकातेषु अतिशयोक्तिः, विषमं चेति अलंकारद्वयं परिप्राप्यते। न्यायविच्छित्तिमूलकेषु केवलं काव्यलिङ्गम् अलंकारः लक्ष्यते। गूढार्थपरताविच्छित्तिमूलकेषु न कोऽपि अलंकारा अत्र प्राप्यते। मिश्रभेदान्तर्गतौ संसृष्टिः संकरश्चेति द्वौ अलंकारौ अत्रापि परिप्राप्येते। किराताज्र्जुनीयमित्यस्य प्रथमे सर्गे शब्दालंकारत्वेन अनुप्रासयमकयोः प्रयोगः दृश्यते।

**अलंकारपर्यालोचनम्**

**क) सादृश्यविच्छित्तिमूलकानामलंकाराणां विमर्शः**

**१ . उपमा**

काव्यसोन्दर्यस्य सारभूतेषु सर्वेष्वलंकारेषु श्रेष्ठानां कवीनां मातृस्वरूपा उपमा। कवयस्येषामनिर्वाच्यां स्चानुभुतिमुपमाद्वारेण प्रायेण समानयन्ति। तेनैव च काव्यसौन्दर्यं विवर्धते। इयमेवालंकृतिः कालिदासस्य सर्वासु कृतिषु देदीप्यते। अतश्च प्रथते साधूक्तिः-- "उपमा कालिदासस्य"। प्रसङ्गेऽस्मिन् भारवेः कतिचनोपमाप्रयोगाः

समीक्ष्यन्ते। यथा--

"महीभृता सच्चरितैश्चरैः क्रिया
स वेद निःशेषमेषितक्रियः।
महोदयैस्तस्य हितानुवन्धिभिः
प्रतीयते धातुरिवेहितं फलै"(५)॥इति

अस्मिन् श्लोके उपमानोपमेयसाधारणधर्मेवादिप्रतिपादकशब्दयोगात् उपमालंकारः। इयं च उपमा श्रौती पूर्णोपमा। किञ्च, अर्जुनस्य पराक्रमेण दुर्योधनस्य त्रासविषये वनचरेण उक्तम्--

"कथाप्रसङ्गेन जनैरुदाहृत
दनुस्मृताखण्डलसनुविक्रमः।
तवाभिधानाद् त्यभ्यते नतानन:
सुदुःसहान्मन्त्रपदादिवोरगः"(६)॥इति

गोष्ठीवनचरेण तत्रस्थैः जनैः नामोच्चारितात् इन्दुपुत्रस्य अर्जुनस्य पराक्रमं स्मृत्वा दुर्योधनः विषवैद्येन दुःसहमनपदेषु उच्चारितेषु सत्सु गरुडस्य पादविक्षेपं स्मृत्वा सर्पवत् नतमस्तके दुःखायते इति श्लोकसारार्थः। अस्मिन् श्लोके श्लेषानुप्राणितः उपमालंकारः भवति। अपि च--

"सखीनिव प्रीतियुजोऽनुजीविनः
समानमानान् सुहृदश्च बन्धुभिः।
स सन्ततं दर्शयते गतस्मयः
कृताधिपत्यामिव साधु बन्धुताम्"(७)॥इति

अस्मिन् श्लोके सखीनिव इति श्लोकांशे इवपदयोगात् तथा च अनुजीविमित्रयोः च उपमानोपमयोः साम्यात् अभिधया वाच्यात् श्रौती पूर्णोपमा। किञ्च,

"अखण्डमाखण्डलतुल्यधामभि
श्चिरं धृता भूपतिभिः स्ववंशजैः।
त्वयात्महस्तेन मही मदच्युता
मतंगजेन स्त्रगिवाऽपवर्जिता"(८)॥इति

इन्दुतुल्यपराक्रमैः स्ववंशजै भरतादिभिः दीर्घकालम् अविच्छिन्नं शासिता धरणी युधिष्ठिरेण मदस्ताविना गजेन माल्यम् इव स्वहस्तेन स्वचापलेन त्यक्त्वा इति श्लोकार्थः। अस्मिन् श्लोके उपमानामकः अर्थालंकारः भवति उपमानोपमेयसाधारणधर्मेवादिप्रतिपादकशब्दयोगात्। अपि च--

"गुणानुरक्तामनुरक्तसाधनः
कुलाभिमानी कुलजां नराधिपः।
परैस्त्वदन्यः क इवापहारये
न्मनोरमामात्मवधूमिव श्रियम्"९॥इति

अस्मिन् श्लोके उपमालंकारो भवति। अत्रेदम् उल्लेख्यं यदत्र मालोपमा इति। उदाहरणान्तरम्--

"न तेन राज्यं क्वचिदुद्यतं धनुः
कृतं न वा कोपविजिह्ममाननम्।
गुणानुरागेण शिरोभिरुह्यते
नराधिपैर्माल्यमिवास्य शासनम्"(१०)॥इति

गुणानुरागेण दयादाक्षिण्यादिषु अनुरागेण प्रेम्ना, मालापक्षे सूत्रानुषंगेन यद्वा सौरभ्यगुणलाभेन तस्य आदेशः शिरोभि उह्यते इत्यत्र उपमानामालंकारः।

**२. उत्प्रेक्षा**

उत् ऊर्ध्वदिग्गामिनी प्रेक्षा दृष्टिर्यस्यां सा उत्प्रेक्षेति व्युत्पत्तिः। उत्प्रेक्षा सादृश्यमूलकोऽलंकारः।'अलंकारशेखरे' उत्प्रेक्षा अलंकारप्रेष्ठा इति वर्णिता। सा खलु नववधुस्मितहास्योपमेति--

"सर्वालंकारसर्वस्वं कविकीर्तिविवर्धिनी
उत्प्रेक्षा हसति स्वान्तमचिरोटा स्मितादिव"॥ इति

तत्रेवादिशब्दप्रयोगे वाच्योत्प्रेक्षा इवादिशब्दप्रयोगाभावे तु प्रतीयमाना भवति तस्याः भेदा। उत्प्रेक्षा उर्द्धगामिनी प्रेक्षा इति। यथोक्तं विश्वनाथपादैः--

" भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना।
वाच्या प्रतीयमाना सा प्रथमं द्विविधा मता।
वाच्येवादिप्रयोगे स्यादप्रयोगे परा पुनः॥
जातिर्गुणः क्रिया द्रव्यं यदुत्प्रेक्षं द्वयोरपि।
तदष्टधापि प्रत्येकं भावाभावाभिमानतः॥
गुणक्रियास्वरुपत्वान्निमित्तस्य पुनश्च ताः।
द्वात्रिंशद्विधतां यान्ति..." (११)॥इति

भारवेः किरातार्ज्जुनीयमिति महाकाव्यस्य प्रथमे सर्गे उत्प्रेक्षालंकारस्य प्रयोगः दृश्यते। तद्यथा--

"असक्तमाराधयतो यथायथं
विभज्य भक्त्या समपक्षपातया।
गुणानुरागादिव सख्यमीयिवान्
न बाधतेऽस्य त्रिगणः परस्परम्"(१२)॥इति

यथायथं धर्मादिस्वरूपेणतिक्रमेण असंकीर्णरूपं विविच्य पक्षपातशून्येन अनुरागविशेषेण अनासक्तं सेवमानस्य दुर्योधनस्य त्रिवर्गःगुणवदाश्रयलाभात् मैत्रीम् उपगतवान् इव परस्परानुपमर्देन वर्धन्ते इत्यर्थः। अस्मिन् श्लोके उपमेयस्य त्रिवर्गस्य उपमानत्वेन सम्भावनम् इति कृत्वा उत्प्रेक्षालंकारः। अपि च, 'गुणानुरागादिव सख्यमीयिवान्'इति। अस्मिन् श्लोकांशे इव पदयोगात् वाच्योत्प्रेक्षालंकारः। अपि च द्विपन्निमित्ता यदियं दशा ततः--

“समूलमुन्मूल्यतीव मे मनः
परैपर्यासितवीर्यसम्पदां
पराभवोऽप्युत्सव एव मानिनाम्”(१३)॥इति

यतः कारणात् इयः अवस्था शत्रुकाराणा तस्मात् कारणात् द्रौपद्याः संकल्पं विकल्पात्मकं मनः निःशेषम् उत्पाटयति इव शत्रुभिः अनुस्मविक्रमसम्पदां मानवतां पराभवः उत्सव एव इति श्लोकस्य अर्थः। अस्मिन् श्लोके प्रकृतस्य उपमेयस्य उपमानस्य उत्कटैककोटिकसम्भावनात् उत्प्रेक्षालंकारः।‘समूलमुन्मूलयतीव’ इति अंशे इवपदयोगात् वाच्योत्प्रेक्षालंकारः।

**३. अतिशयोक्तिः**

अतिशयेन सम्भवातिरेकेण योग्यतातिक्रमेण वा उक्तिरतिशयोक्तिरिति व्युत्पत्तिः। अथावसायस्य यथार्थे वस्तुनि अयथार्थवस्तुरूपेण निरुक्तसम्भावनाया एव सिद्धत्वे निश्चयरूपतया निष्पन्नत्वे कविप्रौढोक्तिवशात् संशयभागे विलीन एव केवलनिश्चयरूपतया परिणतत्वे सतीत्यर्थः अतिशयोक्तिर्नाम अलंकारो निगद्यते। तथा च कार्यकारणयोः पौर्वापर्यविपर्ययरूपा चेति पञ्चधा भवति। तथा चोक्तं विश्वनाथपादैः--

“सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते॥
भेदेऽप्यभेदः सम्बद्धेऽसम्बन्धस्तद्वपर्ययौ।
पौर्वापर्यात्ययः कार्यहेत्वोः सा पञ्चधा ततः”(१४)॥इति

भारवेः किरातार्ज्जुनीयमिति महाकाव्यस्य प्रथमे सर्गे अतिशयोक्तिरलंकारस्य प्रयोगः दृश्यते। यथा--

“उदाकीर्तेरुदयं दयावतः
प्रशान्तवाधं दिशतोऽभिरक्षया।
स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता
वसुपमानस्य वसूनि मेदिनी”(१५)॥इति

महायशसः परदुःखप्रहणेच्छा पशमितोद्रवं सर्वतस्त्राणेन वृद्धिं सम्पादयतः कुवेरोपमस्य दुर्योधनस्य दयादाक्षिण्यादिभिः द्रविता धरणी धनानि अक्लेशेन दुह्यते इति श्लोकस्य अर्थः। उक्ते श्लोके ‘उपस्नुता’ इति विशेषणस्य तथा च प्रदुग्धे इति क्रियापदस्य साम्यवशात् प्रस्तुताया मेदिन्या उपरि अप्रस्तुतस्य ‘गौ’ इत्यस्य व्यवहारारोपात् अतिशयोक्तिनामालंकारः। अयम् अलंकारः पञ्चविधः। तेषु अयं श्लोकः अतिशयोक्त्याः भेदाभेदरूपस्य प्रथमप्रकारस्य दृष्टान्तः।

**विशेषणविच्छित्तिमूलकानामलंकाराणां समीक्षा**

**१.समासोक्तिः**

किरातार्ज्जुनीयमिति महाकाव्ये प्राप्तेषु विशेषणविच्छित्तिमूलकेष्वलंकारेषु समासोक्तिः प्रथमा। समासेन एकोच्चारणरूपेणसंक्षेपेणोक्तिःप्रस्तुताप्रस्तुतयोरभिधानंसूचनंसमासोक्तिरितिव्युत्पत्तिः।विविधविभागविभक्तेषुकविप्रतिभासमुद्भिन्नेष्वर्थालंकारेष्वस्या गौरववती भूमिका न विस्मर्तव्या। यद्यपि समासोक्तेः क्रमविवर्तनेतिहासो विचित्र रूपस्तथाप्यलंकारस्यास्यान्तिमे पर्याये प्रस्तुतेऽप्रस्तुतव्यवहारारोप एव प्राधान्यमलभत्। रुय्यकस्यालंकाररसर्वस्वग्रन्थे

एव समासोक्तिः साम्प्रतिकीं तु रूपपरिवृत्तिं प्राप्यवती। तथा चोक्तं तेन समासोक्तिलक्षणम्--"विशेषणसम्यादप्रस्तुतस्य गम्यते समासोक्तिः" (१६) इति।

वृत्तावप्युक्तम्---"विशेषणसम्याद्धि प्रतीयमानप्रस्तुतं प्रस्तुतावच्छेदकत्वञ्च व्यवहारसमारोपो न तु रूपसमारोपः"इति। रुय्यककृतं लक्षणमुपजीव्यैव विश्वनाथस्य समासोक्तिलक्षणं प्रदत्तम्। तथा चोक्तं तेन--

"समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः।
व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः"(१७)॥इति

तथाहि- समासोक्तिः समानकार्य-लिंग-विशेषणान्यतमद्वारा प्रस्तुतेऽप्रस्तुतस्य व्यवहारोपे भवति। अस्याः समासोक्त्या माहात्मेन कविभिः प्रायेण अचेतने प्राकृतिकवस्तुनि चेतनव्यवहारं समारोप्य सुकरमेव तेषां विभावादिसम्पादनं कृत्वा रसपरिपोषो विधीयते। भारवेः किराताऱ्ज्जुनीयमिति महाकाव्यस्य प्रथमे सर्गे समासोक्तेरलंकारस्य प्रयोगो दृश्यते----

"उदारकीर्तेरुदयं दयावतः
प्रशान्तवाधं दिशतोऽभिरक्षया।
स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता
वसूपमानस्य वसूनि मेदिनी"(१८)॥इति

उक्ते श्लोके 'उदारकीर्तेः' 'दयावतः' चेति विशेषणेभ्यः कस्मिन्नपि प्रस्तुते पदार्थे अप्रस्तुतस्य उपमानस्य कुवेरस्य आरोपात् समासोक्तिनामालंकारः। तथा हि घण्टापथटीकायाम् उक्तम् -- अलंकारस्तु 'विशेषणमात्रसाम्याद् अप्रस्तुतस्य गम्यत्वे समासोक्तिः'इति। अत्र प्रतीयमानया गवा सह प्रकृताया मेदिन्याः भेदोऽभेदलक्षणातिशयोक्तिवशात् दोह्यरिति संक्षेपः।

**२. अर्थान्तरन्यासः**

महाकाव्ये अस्मिन् प्राप्तेषु विशेषविच्छित्तिमूलकेष्वर्थान्तरन्यासोऽयं चतुर्थः। अर्थान्तरस्य प्रस्तुतेतरार्थस्य न्यासः स्थापनमिति व्युत्पत्तिः। उपमाद्यलंकारा यथा कविवर्णितस्य पदार्थस्य भावस्य वा सम्यग्विद्योतने सहृदयतां व्रजन्ति तथैवार्थान्तरन्यासाद्यलंकाराः कवेः कविवर्णितस्य जनस्य वा वक्तव्यं वाचोयुक्ता दृढतरायां भूमौ प्रतिष्ठापयन्ति। कस्यचनार्थस्य समर्थनायार्थान्तरं यत्रोपादीयते तत्रैवालंकारिकदृष्ट्या जायते अर्थान्तरन्यासो नामालंकारः। तथा चोक्तं दण्ड्याचार्यैः--

"ज्ञेयः सोऽर्थान्तरन्यासो वस्तु प्रस्तुत्य किञ्चन।
तत्समथनसमर्थस्य न्यासो योऽन्यस्य वसुनः" (१९)॥इति

सामान्यं विशेषेण समर्थते तथैव तेन विशेषं सामान्येन समर्थते। तथैव कार्यं च कारणेन समर्थते, तथैव कारणं कार्येण। तच्च साधर्म्येण वैधर्म्येण भवति। तथा चोक्तं विश्वनाथपादैः--

"सामान्यं वा विशेषेण विशेषस्तेन वा यदि
कार्यञ्च कारणेनेदं कार्येण च समर्थ्यते।
साधम्र्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः"(२०)॥इति

भारवेः किराताज्र्जुनीयमिति महाकाव्यस्य प्रथमे सर्गे अर्थान्तरन्यासालंकारस्य प्रयोगः दृश्यते। यथा--

“कृतप्रणामस्य महीं महीभुजे
जितां सपत्नेन निवेदयिष्यतः।
न विव्यथे तस्य मनो न हि प्रियं
प्रवक्तुमिच्छन्ति मृषा हितैषिणः”(२१)॥इति

अस्मिन् श्लोके अन्तिमचरणगतसामान्येन पूर्वचरणगतविशेषस्य समर्थनरूपः अर्थान्तरन्यासः अलंकारः। दुर्योधनवृत्तं युधिष्ठिराय निवेदयितुं वनेचरस्य चित्तं न चचाल इति विशेषवचनं समर्थयति भारविः‘न हि प्रियं प्रवुक्तमिच्छन्ति मृषा हितैषिणः’ इति सामान्यवाक्येन। अपि च --

“क्रियासु युक्तैर्नृपचारचक्षुषो
न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वचः”(२२)॥इति

अस्मिन् श्लोके अन्तिमचरणगतेन “अतोऽर्हसि क्षन्तमसाधु वा साधु हितं मनोहारि च दुर्लभं वचः” इति सामान्यवाक्येन प्रथमार्द्धगतविशेषवाक्यस्यमर्थनरूपः अर्थान्तरन्यासः। किञ्च--

“स किंसखा साधु न शास्ति योऽधिपं
हितान्न यः संशृणुते स किंप्रभुः।
सदानुकूलेषु हि कुर्वते रतिं
नृपेष्वमात्येषु च सर्वसम्पदः”(२३)॥इति

यः प्रभुं स्वामिनं वा हितं उपदिशति दुर्मन्त्री कुत्सितः सखा हितोपदेषु सकाशात् शृणोति कुत्सितस्वामी। राजसु सचिवेषु एकमतेषु सततम् अनुरागं कुर्वन्ति इति श्लोकस्य अर्थः। अस्मिन् श्लोके राजमन्त्रिणो हितानुपदेशतदश्रवनिन्दासामर्थ्य सिद्धेः ऐक्यमत्यलक्षणस्य निर्दिष्टस्य सर्वसम्पत्सिद्धिरूपकार्येण कारणसमर्थनरूपः अर्थान्तरन्यासोऽलंकारः। अपि च--

“तथाहि जिह्मः स भवज्जिगीषया
तनोति शुभ्रं गुणसम्पदा यशः।
समुन्नयन् भूतिमनार्यसङ्गमाद्
वरं विरोधोऽपि समं महात्मभिः”(२४)॥ इति

अत्र स्वभावकपटस्य दुर्योधनस्य सत्प्रचेष्टायाः कारणं दर्शयता कविना अर्थान्तन्यासेन समर्थते।

**३. श्लेषः**

महाकाव्ये लब्धेषु विशेषणविच्छित्तिमूलकेष्वलंकारेष्वयं श्लेषः द्वितीयः। श्लेषं लक्षयति श्लिष्टैरिति। अनेकार्थाभिधाने अभिधया वृत्त्या युगपदेव स्वाभाविकैकार्थकशब्देन अनेकार्थबोधेने श्लेषो नामालंकार इष्यते। तथा चोक्तं विश्वनाथपादैः--“शब्दैः स्वभावादेकार्थैः श्लेषोऽनेकार्थवाचनम्”(२५)।इति

संस्कृतभाषामवलम्ब्य काव्यं विरचितॄणां कवीनां नैकोऽपि आदर्शः कश्चन नयवपदवीमागच्छति यस्य कविकर्मणि न मानादपि श्लेषस्पर्शो विद्यते। अत्र दिङ्मात्रमुदाहरणं यथा--

"न तेन राज्यं क्वचिदुद्यतं धनुः
कृतं न वा कोपविजिह्ममाननम्।
गुणानुरागेण शिरोभिरुह्यते
नरधिपैर्माल्यमिवास्य शासनम्" (२६)॥इति

इत्यस्मिन् श्लोके गुणपदे श्लेषालंकारः विद्यते।

**मिश्राणामलंकाराणां विमर्शः**

**(क) संसृष्टिः**

विद्यमानेकैकमलंकरणं यथा काव्यसौन्दर्यं वर्धयति तथैव कस्मिन्नपि कविवचसि बहूनामलंकाराणां समावेशः परिलक्ष्यते। एतादृश्याः समावेशधारायाः द्वैविध्यमालंकारिकैनिरूपितं संसृष्टिः संकरश्चेति। बहुनामलंकाराणां परस्परनिरपेक्षतया तिलतण्डुलन्यायेनावस्थितौ जायते संसृष्टिः। तथा चोक्तं रुय्यकाचार्यैः --"एषा तिलतण्डुलन्यायेन मिश्रत्वे संसृष्टिः" इति। तथाहि यथा तण्डुलैः सह तिलानां मिश्रणे तेषां तिलानां तण्डुलानाञ्च पृथक् करणं सम्भवति तथैव संसृष्टावलंकाराणां पृथगस्तित्वमनुभवितुं शक्यते। भारवेः किरातार्ज्जुनीयमिति महाकाव्यस्य प्रथमे सर्गे संसृष्टेरलंकारस्य प्रयोगः दृश्यते --

"महौजसो मानधनाः धनार्चिताः
धनुर्भृतः संयति लब्धकीर्तयः।
नसंहतास्तस्य न भिन्नवृत्तयः
प्रियाणि वाञ्छन्त्यसुभिः समीहितुम्"(२७)॥इति

अस्मिन् श्लोके हेतुत्वाभिधानात् काव्यलिङ्गम् अलंकारः तथा च स्वाभिप्रायविशेषणत्वात् परिकारालंकारः इति द्वयोः तिलतण्डुलवत् विभक्तया स्फुरणात् संसृष्टिः। किञ्च--

"भवादृशेषु प्रमादाजनोदितं
भवत्यधिक्षेप इवानुशासनम्
तथापि वक्तुं व्यवसाययन्ति मां
निरस्तनारीसमया दुराधयः"(२८)॥इति

अस्मिन् श्लोके सामान्येन विशेषसमर्थनरूपः अर्थान्तरन्यासः तथा च हेतोः वाक्यपदार्थत्वे काव्यलिंगञ्चेति उभयोः अलंकारयोः तिलतण्डुलन्यायेन मिश्रत्वे संसृष्टिनामालंकारः।अपि च--

"द्विषन्निमित्ता यदियं दशा ततः
समूलमुन्मूलयतीव मे मनः।
परैरपर्य्यासितवीर्य्यसम्पदां
परोभवोऽर्प्युत्सव एव मानिनाम्"(२९)॥इति

अपि च,

तथापि जिह्मः स भवज्जिगीषया
तनोति शुभ्रं गुणसम्पदा यशः।
समुन्नयन् भूतिमनार्यसंगमाद्
वरं विरोधेऽपि समं महात्मभिः"(३०)॥इति

अत्र स्वभावकपटस्य दुर्योधनस्य सत्प्रचेष्टायाः कारणं दर्शयता कविना अर्थान्तरन्यासेन समर्थते।

**ख) संकरः**

यत्र तावत् कविकृतावनेका अलंकारा नीरक्षीरन्यायेन सम्मिलिता भवन्ति तत्रैव जायते संकरः।तथा चोक्तं रुय्यकाचार्यैः----"नीरक्षीरन्यायेन संकरः" इति। तथाहि यथा क्षीरैः सह नीराणां मिश्रणे तयोर्द्वयोः पदार्थयोर्भिन्नीकरणं न सम्भवति तत्रैव यत्र विविधा अलंकाराः परस्परसम्बन्धाः परिदृश्यन्ते तत्रैव जायते संकराख्योऽलंकारविशेषः। भारवेः किरतार्ज्जुनीयमिति महाकाव्यस्य प्रथमे सर्गे संकरालंकारस्य प्रयोगः दृश्यते।

"उदारकीर्तेरुदयं दयावतः
प्रशान्तवाधं दिशतोऽभिरक्षया।
स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता
वसूपमानस्य वसूनि मेदिनी"(७१)॥इति

अस्मिन् श्लोके समासोक्त्यतिशयोक्त्योर्नीरक्षीरन्यायेन सम्मिलितात्तथा च निर्भरशीलात् संकरालंकारः। किञ्च --

"न समयपरिरक्षणं क्षमं ते
निकृतिपरेषु परेषु भूरिधाम्नः।
अरिषु हि विजयार्थिनः क्षितीशा
विदधति सोपधि सन्धिदूषणानि"(३२)॥इति

अस्मिन् श्लोके अर्थान्तरन्यासकाव्यलिङ्गयोर्नीरक्षीरन्यायात् सम्मिलितात् सकंरालंकारः।

**न्यायविच्छित्तिमूलकालंकारस्य विमर्शः**

**क). काव्यलिंगम्**

केषाञ्चिदलंकाराणां स्वरूपरिवर्तनेऽपि परोक्षविधया दार्शनिककार्यकारणभावचिन्तया मीमांसाशास्त्रोक्तवाक्यविवेचनायाः लौकिकराद्धान्तानाञ्च प्रभावः लक्ष्यते। अतश्च तर्कन्यायमूलकाः वाक्यन्यायमूलकाः लोकन्यायमूलकाः अलंकाराः कविप्रतिभोद्भिन्नाः काव्यशोभाकारतां व्रजन्ति। काव्यलिङ्गनामालंकारं लक्षयता मम्मटेनोक्तम्---"काव्यलिङ्गं हेतोर्वाक्यपदार्थता"(३३) ॥ इति

हेत्वभिधानञ्च काव्यलिङ्गम् इत्यर्थः। अभिधानञ्च वाक्यार्थत्वेन पदार्थत्वेन चेति विभागः। व्याखातमिदं प्रदीपोद्योतयोः -- "अत्र विवक्षितविवेकेन हेतुवचनं काव्यलिंगमिति लक्षणं स्वतोऽनुपपद्यमानार्थोपपादकहेतोर्वचनं काव्यलिंगमित्यर्थः। वाक्यपदार्थेति विभागः, वाक्यार्थता पदर्थता चेत्यर्थः। पदमपि एकमनेकञ्चेति बोध्यम्।

एवञ्च हेतोर्वाक्यार्थता चति त्रिविधं काव्यलिङ्गमिति फलितम्। वाक्यार्थरूपस्यानेकपदार्थरूपनैकपदार्थानां च हेतोरभिधानम् काव्यलिंगमिति तु निष्कर्षः। काव्याभिमतं लिंगं काव्यलिंगम्। तर्कशास्त्राभिमतलिंगव्यवर्तनाय काव्यपदम्।"इति। विश्वनाथेनापि साहित्यदर्पणे अलंकारमिमं लक्षयतोक्तम्-"हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते।" अनुरूपम् एव त्रिविधो विभागोऽस्य विश्वनाथेनाभ्युपगतः। अत्रेदमवधेयं काव्यलिंगालंकारे हेतोर्गम्यता एवाभिमता, न तु वाच्यता।

भारवेः किरातार्ज्जुनीयमिति काव्यस्य प्रथमे सर्गे काव्यलिंगालंकारस्य प्रयोगः दृश्यते --

"द्विषां विघाताय विधातुमिच्छतो
रहस्यनुज्ञामधिगम्य भूभृतः।
स सौष्ठवौदार्यविशेषशालिनीं
विनिश्चितार्थामिति वाचमाददे"(३४)॥इति

शत्रूणां विहन्तुं व्यापारं कर्तुमिच्छतः नृपस्य युधिष्ठिरस्य अनुमतिम् अधिगम्य वनेचरः निभृतेः शब्दसामर्थेन अर्थसम्पदा च अन्वितं विनिश्चितार्थां वाचं स्वीकृतवान्। अस्मिन् श्लोके दुर्योधनादिशत्रूणां विनाशरूपस्य हेतोः वनेचरस्य अभिधानात् काव्यलिङ्गम्। अपि च--

"क्रियासु युक्तैर्नृपचारचक्षुषो
न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वचः"(३५)॥इति

हे राजन् कृत्यवस्तुषु नियुक्तैः भृत्यैः चरा एव चक्षुः येषां ते चारचक्षुषः निग्रहानुग्रहसम्पर्थाः स्वामिनः प्रतारनीयाः। अप्रतार्यत्वात् हेतोः अप्रियं प्रियं वा मदुक्तं क्षन्तुमर्हसि। पथ्यं प्रियं च वाक्यं दुष्प्राप्यम् इति श्लोकस्य अर्थः। अस्मिन् श्लोके कृत्यवस्तुषु युक्तैः चारचक्षुषैः स्चामिनः न वञ्चनीया इति वाक्यार्थस्य कारणरूपेण अतोऽर्हसि क्षान्तमसाधु मनोहारि च दुर्लभं वच इति सामान्यवाक्यं वर्णितम् इति कृत्वा हेतोः वाक्यपदार्थत्वे काव्यलिङगम्। किञ्च--

"विशंकमानो भवतः परभवं
नृपासनस्थोऽस्य वनाधिवासिनः।
दुरोदरच्छद्मजितां समीहते
नयेन जेतुं जगतीं सुयोधनः"(३६)॥इति

सिंहासनोपविष्टोऽपि अरण्यवासिनः युधिष्ठिरात् पराजयम् उत्प्रेक्षामाणः दुर्योधनः कपटद्यूतक्रीडालब्धां महीं नीत्या वशीकर्तुं व्याप्रियते इति श्लोकस्य अर्थः। अस्मिन् श्लोके 'दुरोदरच्छद्मजिताम्' इति विशेषणद्वारेण पदार्थस्य चतुर्थपादार्थं प्रति हेतुत्वेनोपन्यासात् काव्यलिंगालंकारः। अपि च--

"तथापि जिह्मः स भवज्जिगीषया
तनोति शुभ्रं गुणसम्पदा यशः।
समुन्नयन् भूतिमनार्यसंगमाद्
वरं विरोधोऽपि समं महात्मभिः" (३७)॥इति

अस्मिन् श्लोके स च भूतिसमुन्नयस्य पदार्थस्य विशेषणद्वारा विरोधवरत्वं प्रति हेतुत्वाभिधानरूपः काव्यलिंगानुप्राणितः।

**विरोधविच्छित्तिमूलकस्यालंकारस्य विवेचनम्**

**विषमम्**

विषममपि विरोधविच्छित्तिमूलकालंकारः। प्राकरणिकं विरोधमादायैव विषमालंकारं लक्षयति गुणाविति। हेतुकार्थयोर्गुणौ यत् विरुद्धौ स्यातां क्रिये वा यद्विरुद्धे स्यातामित्यन्वयः। तथा चोक्तं विश्वनाथपादैः--

"गुणैः क्रिये वा चेत् स्यातां विरुद्धे हेतुकार्थ्ययोः॥

यद्वारब्धस्य वैफल्यम् अनर्थस्य च सम्भवः।

विरूपयोः संघटना या च तद्विषमं मतम्"(३८)॥इति

भारवेः किरातार्ज्जुनीयमिति महाकाव्यस्य प्रथमे सर्गे विषमालंकारस्य प्रयोगः दृश्यते। अपि च--

"निसर्गदुर्बोधमबोधविक्लवाः

क्व भूपतीनां चरितं क्व जन्तवः

तवानुभावोऽयमवेदि यन्मया

निगूढतत्तवं नयवर्त्म विद्विषाम्"(३९)॥इति

अस्य श्लोकार्धे विषमालंकारः भवति। यतो वनेचर इव ज्ञानहीनस्य नगण्यस्य जनस्य कृते स्वभावतः दुर्योधनस्य नृपचरित्रस्य ज्ञानम् असम्भवपरम् इति कार्यकारणैः वैषम्ये विषमालंकारः।विश्वनाथेन उक्तं विषमालंकारलक्षणम्-- "विरुपयोः संघटना या च तद्विषमं मतम्"(४०)इति।

**शृंखलाविच्छित्तिमूलकस्यालंकारस्य पर्यालोचनम्**

**एकावली**

शृंखलाविच्छित्तिमूलकेष्वलंकारषु एकावली एकातमा। भारवेः किरातार्ज्जुनीयमिति महाकाव्यस्य प्रथमे सर्गे एकावलीति अलंकारस्य प्रयोगः दृश्यते। तथा च -----

"निरत्ययं साम न दानवर्जितं

न भूरिदानं विरहस्य सत्क्रियाम्।

प्रवर्तते तस्य विशेषशालिनी

गुणानुरोधेन विना न सत्क्रिया"(४१)॥इति

अस्मिन् श्लोके एकावली इति अर्थालंकारः भवति। विश्वनाथेन एकावलीलक्षणम् उक्तम्----

"पूर्वं पूर्वं प्रति विशेषणत्वेन परं परम्।

स्थाप्यतेऽपोह्यते वा चेत स्यात्तदैकावली द्विधा" (४२)॥इति

यत आलोच्यमाने इह श्लोके दानवर्जितं 'साम' इत्यस्य विशेषणं "सत्क्रियां विरहस्य" इति दानम् इत्यस्य विशेषणं चेति क्रमेण वर्जितम् इति हेतोः एकावलीनामालंकारः। अत्र उत्तरोत्तरस्य पूर्वपूर्वविशेषणतया स्थापनात् एकावल्यलंकारः। तदुक्तम् काव्यप्रकाशे ---

"स्थाप्यतेऽपोह्यते वापि यथापूर्वम् परं परम्

विशेषणतया यत्र वस्तु सैकावली द्विधा"(४३)॥इति

**उपसंहृतिः**

विविधानां रसानां परिपुर्णरूपेण अभिव्यञ्जनविधौ अपि विद्यते अलंकाराणाम् उपोयोगित्वम्। कस्यचिद् अवस्थाविशेषस्य द्योतनविधौ अपि कतिपयानाम् अलंकाराणां प्राप्यते आनुकुल्यं यथैव सादृश्यमूलकालंकाराः नाट्यकारस्य अस्य प्रतिभायाः प्रयत्नसम्पाद्यतया अहंपूर्विकया परापतन्ति तथैव विशेषणविच्छित्तिमूलकाः गम्यत्वविच्छित्तिमूलकाः विरोधमुलकाः च। शब्दालंकारान् आश्रित्य भारविना शब्दानां यत् चित्रं चित्रितं तदपि श्रुतिसुभगम्। परन्तु किराताज्र्जुनीयमिति महाकाव्यस्य प्रथमे सर्गे चिराचरितानां सन्देह-रुपक-दीपक-व्यतिरेक-विभावना-विशेषोक्ति-अप्रस्तुतप्रशंसानामलंकाराणां प्रयोगः नो नयनपथे पन्थायते। एतेन एतन्न प्रतीयते यत् एषाम् अलंकाराणां प्रयोगे भारविः न हि दक्षः। तथाहि द्वित्रा पञ्चधा वा विद्यन्ते तथाविधा अलंकाराः येषां प्रयोगे भारवेः प्रतिभागतम् अभिनवत्त्वं संलक्ष्यते इति शम्॥

**पादटिप्पनी**

१. रविकीर्तेः आइहोलशिलालेखे।
२. राजशेखस्य काव्यमीमांसायाम्।
३ .काव्यालंकारः-१.१३
४. काव्यालंकारसूत्रवृत्तिः -१.१.२
५. किराताज्र्जुनीयम्-१.५
६. तदेव-१.२४
७. तदेव-१.१०
८. तदेव-१.२९
९. तदेव-१.३१
१०.तदेव-१.२१
११.साहित्यदर्पणम्-१०.४०,४१,४२
१२.किराताज्र्जुनीयम्-१.११
१३.अलंकारशेखरे...।
१४.साहित्यदर्पणे-१०.४६
१५.किराताज्र्जुनीयम्-१.१८
१६.अलंकारसर्वस्वग्रन्थे।
१७.साहित्यदर्पणम्-१०.५६
१८.किरताज्जुनीयम्-१.१८
१९.काव्यादर्शः...।
२०.साहित्यदर्पणम्-१०.६१
२१.किराताज्र्जुनीयम्-१.२
२२.तदेव-१.४
२३.तदेव-१.५
२४.तदेव-१.८
२५.साहित्यदर्पणम्-१०-५७
२६.किराताज्र्जुनीयम्-१.२१
२७.तदेव-१.१९
२८.तदेव-१.४२

२९.तदेव-१.२७

३०.तदेव-१.८

३१.तदेव-१.१८

३२.तदेव-१.४५

३३.काव्यप्रकाशः-१०.११४

३४.किराताज्र्जुनीयम्-१.३

३५.तदेव-१.४

३६.तदेव-१.७

३७.तदेव-१.८

३८.साहित्यदर्पणम्-१०.७०

३९.किराताज्र्जुनीयम्-१.६

४०.सहित्यदर्पणम्- पृष्ठा- २१६

४१.किराताज्र्जुनीयम्-१.१२

४२.साहित्यदर्पणम्-१०.७७

४३.काव्यप्रकाशः-१०.१६१

**सहायकग्रन्थसूची**

१.वसुः , अनिलचन्दः (सम्पा.) -- २००७, किरातज्र्जुनीयम्, कोलकाता : संस्कृतवुकडिपो.

२.वन्द्योपाद्यायः,अशोककुमारः (सम्पा.) -- १४१६(वङ्गाब्दः),किराताज्र्जुनीम्, कोलकाता : वलरामप्रकाशनी.

३.गोस्वामी , विजया (सम्पा.) -- २००७ काव्यप्रकाशः,कोलकाताः सदेशः .

४.मुखोपाध्यायः,श्रीविमलाकान्तः(सम्पा.)-१३८६(वङ्गाब्दः),साहित्यदर्पणम्,कोलकाता:संस्कृतपुस्तकभाण्डारम्.

५.वन्द्योपाध्यायः, उदयचन्दः (सम्पा.) - २०११, साहित्यदर्पणम्, कोलकाता : संस्कृतवुकडिपो.

६.पालः, विपदभञ्जनः – १४१९ (वङ्गाब्दः) आदर्श अलंकारविचिन्ता,कोलकाता : सदेश.

७.चट्टयोपाध्यायः, जयश्री -- १४२० (वङ्गाब्दः) अलंकार साहित्यर समृद्ध इतिहास, कोलकाता : संस्कृतपुस्तकभाण्डारम् .

८.वसुः , अनिलचन्दः (सम्पा.) --२०१५, काव्यालंकारसूत्रवृत्तिः , कोलकाता : संस्कृतवुकडिपो.

९.शास्त्री , एण्ड लाहिडी --२००९, पाणिनीयम्, कोलकाता : दि ढाका स्टुडेण्टस् लाइब्रेरी .

१०.मुखोपाध्यायः,गोविन्दगोपालः,-२००८,ATRILINGUALDICTIONARY,कोलकाताःसंस्कृतवुकडिपो.

Received on 29. 05. 2017 Accepted on 24. 07. 2017

# अद्वैतमते प्रमा

राजकुमार-मिद्या*

सर्वेष्वेव दर्शनेषु यथा पदार्थाः स्वीकृतास्तथा तेषां सिद्धये प्रमाणान्यपि स्वीकृतानि। प्रमायाः करणं प्रमाणम्। करणञ्चासाधारणं कारणम्। तत्र प्रमायाः करणत्वे प्रमाणत्वे सर्वेषामैकमत्ये सत्यपि प्रमाणसापेक्षभूतायां प्रमायां बहुत्रैव वैमत्यदर्शनात् तत्रैव च स्वारस्याद् विशेषतः अद्वैतमते का तावत् प्रमा, अन्यत्र दर्शनेषु च प्रमापदेन कस्यपरामर्शित्वं तथा प्रमालक्षणघटकीभूतानां पदानां व्यावृत्तिप्रदर्शनपूर्वकम् अव्याप्त्यतिव्याप्त्यादि-दोषपरिहारेण च प्रमात्वनिश्चयः सप्रसङ्गं सविस्तरं यथायथमालोचयिष्यन्ते।

अस्माकं भारतीयदर्शने धर्मार्थकाममोक्षरूपं पुरुषार्थचतुष्टयमस्ति प्रसिद्धम्। तेषु चतुर्षु पुरुषार्थेषु मोक्षःपरमपुरुषार्थस्तस्य नित्यत्वात्। तथाहि श्रुतिः- 'न स पुनरावर्तते'इति। उच्यते च –
"अविद्यास्तमयो मोक्षो नित्यानन्दप्रतीतितः।
निःशेषदुःखोच्छेदाच्च पुरुषार्थः परो मतः।।" इति।

स च मोक्षो ब्रह्मज्ञानादुपजायते। ननु ब्रह्मनामधेयं किमपि वस्तु स्याच्चेत् ततो मोक्षलाभप्रसङ्गः सार्थकतामियात्, अन्यथा न। तत्र 'लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिः' इति नियमात् प्रसङ्गप्राप्तस्य प्रमाणस्य प्रमाकरणत्वेन प्रमासापेक्षत्वात् तस्या एव च प्राथम्यात् प्रमाणलक्षणनिरूपणात् प्रागेव प्रमालक्षणं व्यधायि धर्मराजाध्वरीन्द्रेण वेदान्तपरिभाषाग्रन्थे।

प्रमा नाम यथार्थज्ञानम्। तच्चानुभवस्यैव भवति न तु स्मृतेरिति भाट्टाः। अद्वैतिनो व्यावहारिकविषये भाट्टानेवानुसरन्ति। तस्मात् 'व्यवहारे भाट्टनयः' इत्यस्ति प्रसिद्धिः। एवञ्च भाट्टाभिमतं स्मृत्यवृत्तिप्रमात्वस्य स्वरूपं प्रदर्शयितुं धर्मराजाध्वरीन्द्रः स्मृतिव्यावृत्तं प्रमात्वमित्युपक्रम्य तल्लक्षणं कथयितुमाह- 'अनधिगताबाधितार्थविषयकज्ञानत्वम्'[1]इति। अनधिगतत्वम् अबाधितत्वञ्च इह अर्थविशेषणम्। अत्र न अधिगतः अनधिगत इति नञ्तत्पुरुषसमासः। यः पूर्वतो ज्ञातो नास्तीति तदर्थः। एवञ्च न बाधितः अबाधितः इत्यत्रापि नञ्समासः। अर्थात् यस्यार्थस्य उत्तरवर्तिना केनापि ज्ञानेन बाधो न भवति, तादृशः अर्थो (विषयो) यत्र तद् अर्थविषयकमिति बहुव्रीहिः। एवञ्च अनधिगतः अबाधितश्च योऽर्थः पदार्थः, तद्विषयकं यत् निश्चयात्मकं ज्ञानं सा हि प्रमा।

यथा – 'अयं घटः' इति ज्ञानम्। अत्र घटज्ञाने विषयीभूतस्य घटस्य पूर्वतोऽविज्ञातत्वेन अनधिगतत्वम्, उत्तरवर्तिना ज्ञानेनानिरोधात् च अबाधितत्वं समस्ति। अस्य च घटज्ञानस्य घटरूपविषयविशिष्टत्वात् अर्थविषयकत्वमपि वर्तते। एवञ्च 'अयं घटः' इति घटज्ञाने अनधिगताबाधितार्थविषयकज्ञानत्वनिश्चयात् प्रमात्वं सङ्गच्छते। अथ प्रदत्तं प्रमालक्षणं निर्दुष्टं न वेति व्यावृत्तिपूर्वकं विचार्यते।

**व्यावृत्तिः**

अत्रेदमवधेयं यल्लक्षणं हि सदा दोषरहितं स्यात्। त्रिविधश्च दोषः प्रसिद्धः अव्याप्त्यतिव्याप्त्यसम्भव

1 धर्मराजाध्वरीन्द्रः, वेदान्तपरिभाषा, सम्पा.शरच्चन्द्रघोषालः, पृष्ठा-3

*शोधच्छात्रः, कलिकाताविश्वविद्यालयस्य

भेदेन। तत्र लक्ष्यैकदेशावृत्तित्वमव्याप्तिः[2]। लक्ष्यस्यैकदेशे लक्षणस्यावृत्तित्वमव्याप्तिरिति। यथा – गोः कपिलत्वम्। कपिलत्वमात्रं गोर्लक्षणं स्याच्चेत् गोरेकदेशे शुक्लत्वादौ लक्षणस्य कपिलत्वस्याभावादव्याप्तिरिति। तत्र अलक्ष्यवृत्तित्वम् अतिव्याप्तिः[3]। यदा लक्षणं लक्ष्यं परित्याज्यालक्ष्यमपि व्याप्नोति तदा अतिव्याप्तिदोषो जायते। यथा – गोः शृङ्गित्वम्। शृङ्गं न हि गोषु एवावतिष्ठते छागादिष्वपि दर्शनात्। अतः शृङ्गित्वमात्रं गोर्लक्षणं स्याच्चेत् तस्य गवेतरव्यक्तिष्वपि वृत्तित्वादतिव्याप्तिदोषः। लक्ष्यमात्रावर्तनमसम्भवः[4]। लक्षणस्य लक्ष्यमात्रे अवृत्तित्वे सति असम्भवदोषः। यथा – गोरेकशफत्वम्। गोमात्रमेवैकशफत्वं नोपपद्यते। एवमेकशफत्वस्य गोमात्रावर्तनत्वाद् असम्भवदोष इति। एतद्दूषणरहितः असाधारणो धर्मो हि लक्षणम्। यथा - गोत्वं गोर्लक्षणम्। एवं प्रमालक्षणस्यापि सर्वविधदोषराहित्याय लक्षणोक्तप्रतिपदानां सार्थक्यमधस्तात् प्रस्तूयते-

ननु प्रमालक्षणे ज्ञानपदं किमर्थम्? उच्यते, संशयेऽतिव्याप्तिवारणाय तत्र ज्ञानपदं निवेशितम्। तत्र ज्ञानत्वं निश्चयत्वमिति तदर्थः।

किन्तु ज्ञानत्वमात्रं प्रमालक्षणं स्याच्चेत् विकल्पज्ञानेऽपि ज्ञानत्वसत्त्वात् तत्रापि अतिव्याप्तिप्रसङ्गः। अवस्तुविषयावभासात्मकं ज्ञानं विकल्पज्ञानमित्युच्यते। यथा 'राहोः मस्तकमि'ति। वस्तुतस्तु मस्तकसर्वस्वमेव राहुः। किन्तु राहोः मस्तकमिति वाक्यात् राहोः मस्तकभेदो द्योत्यते भेदेऽर्थे षष्ठ्या व्यवहारात्। तथापि लोके राहोः मस्तकमिति व्यवहाराद् व्यवहारस्य च ज्ञाननिष्ठत्वादस्यापि ज्ञानत्वाङ्गीकारादत्रातिव्याप्तिः। किन्तु अवस्तुविषयीभूते विकल्पज्ञाने भासमानस्य वस्तुनोऽलीकत्वान्न ह्यस्य प्रमात्वमङ्गीकर्तुं शक्यते। तस्माद् विकल्पज्ञानेऽतिव्याप्तिनिरासाय लक्षणे अर्थविषयक इति पदमुपात्तम्। अर्थविषयक इति पदयोजनाद् विकल्पज्ञानादावतिव्याप्तिदोषे निरस्तेऽपि भ्रमज्ञाने प्रमात्वापत्तिः भ्रमज्ञानेऽपि अर्थविषयकज्ञानत्वसत्त्वात्। यथा 'शुक्तौ रजतमि'ति ज्ञानम्। यद्यप्यत्रार्थविषयकज्ञानत्वमस्ति किन्तु याथार्थ्यं नास्ति, नेदं रजतमिति उत्तरप्रतीतिबाध्यत्वात्। भ्रमज्ञानस्य बाधितत्वात् बाधितज्ञानस्य च प्रमात्वानङ्गीकारात् तत्रातिव्याप्तिवारणाय प्रमालक्षणे अबाधित इति पदं योजितम्।

किञ्च अबाधितार्थविषयकज्ञानत्वमिति प्रमालक्षणे कृतेऽपि यथार्थविषयकस्मृतेरपि अबाधितार्थविषयकज्ञानत्वेन तत्रातिव्याप्तिः, नैयायिकैः यथार्थज्ञानस्य स्मृत्यनुभवभेदेन द्वैविध्यकल्पनात्। किन्तु लक्षणे अनधिगतत्वस्य अर्थविशेषणत्वेन उपादानात्, स्मृतेः विषयस्य चाधिगतत्वात् स्मृतावतिव्याप्तिर्वारिता।

एवञ्चाद्वैतदिशा प्रमात्वं स्मृतिव्यावृत्तमनधिगताबाधितार्थविषयकज्ञानत्वमिति निष्कर्ष इति धर्मराजाध्वरीन्द्रेण स्वीयवेदान्तपरिभाषाग्रन्थे साधु प्रतिपादितम्।

**स्मृतेः प्रमात्वविचारस्तथा दर्शनान्तरमते प्रमात्वम्**

अनधिगत इति पदं स्मृतावतिव्याप्तिवारणार्थम्। स्मृतिस्तु पूर्वज्ञातं विषयमवलम्ब्योदेति इति स्मृतेः विषयस्याधिगतत्वेनानधिगतत्वाभावात् स्मृतेर्न प्रमात्वम्। न च स्मृतेः प्रामाण्यमस्तीति वाच्यम्। न हि यादृशार्थो यदा स्मर्यते तादृश एवासौ तदा पूर्वावस्थाया निवृत्तत्वात् अनिवृत्तौ हि पूर्वतैव न स्यात्। तस्मात् स्मृतिर्न प्रमा। भामतीकारेण वाचस्पतिमिश्रेणापि स्मृतेः प्रमात्वमस्वीकुर्वतोक्तं 'गृहीतग्रहणस्वभावा स्मृतिः' इति। स्मृतिमात्रस्य ज्ञानत्वविशिष्टविषयकत्वात् ज्ञानस्य च भ्रमप्रमान्यतरविषयरूपस्य स्मृत्या ग्रहणेन स्मृतेः प्रमात्वं नाङ्गीक्रियते।

2 अन्नंभट्टः, तर्कसंग्रहः, सम्पा. श्रीकृष्णवल्लभाचार्यः, पृष्ठा-12.

3 अन्नंभट्टः,तर्कसंग्रहः, सम्पा. श्रीकृष्णवल्लभाचार्यः, पृष्ठा-12.

4 तदेव

किञ्च न्यायदर्शनेऽपि स्मृतेः प्रमात्वं न स्वीक्रियते। न्यायमते यथार्थानुभव एव प्रमा। यथार्थानुभवश्च तद्वति तत्प्रकारकोऽनुभवः[5]। अत्र तत्पदेन विशेषणं परामृश्यते। एवञ्च तद्वत् नाम तद्विशिष्टं विशेषणविशिष्टं नाम विशेष्यं, विशेष्यस्य विशेषणवत्त्वात्। तत्र विशेष्ये तत्प्रकारको विशेषणप्रकारकः अनुभवो यथार्थानुभवः। यथा- घट इत्यत्र घटो विशेष्यं, घटत्वञ्च विशेषणम्। एवञ्च तद्वति घटत्ववति घटे तत्प्रकारको घटत्वप्रकारकोऽनुभवो यथार्थानुभव इति। प्रकारान्तरेण घटनिष्ठविशेष्यतानिरूपितसमवायसम्बन्धावच्छिन्न-घटत्वनिष्ठप्रकारताविशिष्टोऽनुभवो यथार्थानुभव इति निष्कर्षः। अयं यथार्थानुभव एव न्यायनये प्रमेत्युच्यते।

अत्रेदमुल्लेख्यं यद् यथार्थानुभवस्यैव प्रमात्वेन ग्रहणात् न हि स्मृतेः याथार्थ्येऽपि तस्याः प्रमात्वम्। ननु कुत इति चेदुच्यते- अनु पश्चात् प्रमाणव्यापारात् परं भवति यः सोऽनुभवः। अर्थात् प्रमाणव्यापाराज्जायमानं ज्ञानमनुभवपदवाच्यम्। किन्तु स्मृतौ न हि कोऽपि प्रमाणव्यापारोऽपेक्षितः संस्कारमात्रजन्यज्ञानस्य स्मृतिपरत्वात्। एवञ्च स्मृतेरनुभवाद् भिन्नत्वाद् अनुभवस्यैव च प्रमात्वेन ग्रहणात् स्मृतेः प्रमात्वं वारितम्।

यद्यपिनैयायिकैःस्मृतेःप्रमात्वंनाङ्गीकृतंतथापिवैशेषिकाः,माध्वानुगामिनो,जैनाश्चस्मृतेःप्रमात्वंस्वीकुर्वन्ति। अतः स्मृतेः प्रमात्वं स्वीकुर्वतां नये प्रमालक्षणं प्रदर्शयितुमाह – ‘स्मृतिसाधारणं तु अबाधितार्थविषयकज्ञानत्वम्’[6]इति। तेन स्मृतेः प्रमात्वं न स्वतः अपि तु परत इत्यवगन्तव्यम्। अथवा यथार्थानुभवविषयिण्याः स्मृतेः गौणत्वेन प्रमात्वमिति वक्तुं शक्यते। किन्तु अद्वैतिभिः स्मृतेः प्रमात्वस्यैवानङ्गीकारात् नेदं लक्षणमत्र युक्तम्।

मानमेयोदयकारेण तदीयग्रन्थस्य प्रमाणपरिच्छेदे प्रमालक्षणं निरूपयतोक्तं – ‘प्रमा चाज्ञाततत्त्वार्थज्ञानमेवात्र भिद्यते’[7]इति। तेन प्रमा चात्राज्ञाततत्त्वार्थज्ञानम्। न ज्ञातः अज्ञातः इति नञ्तत्पुरुषसमासः, अज्ञातो यस्तत्त्वार्थः सः अज्ञाततत्त्वार्थ इति कर्मधारयसमासः, तस्य अज्ञाततत्त्वार्थस्य ज्ञानम् अज्ञाततत्त्वार्थज्ञानमिति षष्ठीसमासः। अत्राज्ञातपदेन स्मृत्यनुवादयोर्निरासः। तत्त्वं नाम याथार्थ्यम्। एवञ्च अज्ञातयथाभूतार्थज्ञानं हि प्रमेत्युच्यते। यथा- ‘अयं घटः’ इति ज्ञानम्। अत्र यो घटः पूर्वम् अज्ञातः, तत्राज्ञाते घटे ‘अयं घटः’ इत्याद्याकारकं जायमानं ज्ञानं हि प्रमा। न्यायनये तु यथार्थानुभव एव प्रमा। तत्र विषयो ज्ञातोऽस्तु अज्ञातो वा तन्न विचार्यम्। किन्तु मीमांसामते विषयोऽवश्यमज्ञातः स्यात्। अयमेव तयोर्भेदः।

कुमारिलभट्टेन प्रमात्वं निरूपयता तदीयश्लोकवार्त्तिके उक्तं –

“तस्माद् दृढं यदुत्पन्नं नापि संवादमृच्छति।
ज्ञानान्तरेण विज्ञानं तत्प्रमाणं प्रतीयताम्॥” इति।

तेन यद् दृढम् उत्पन्नम् असंवादि यच्च न ज्ञानान्तरेण विज्ञातं तदेव प्रमा। अत्र दृढं नाम निश्चयात्मकं, संवादो नाम तद्विषयकं ज्ञानान्तरम्। एवञ्च यज्ज्ञानम् असन्दिग्धं ज्ञानान्तरस्य चाविषयः तदेव प्रमा कुमारिलभट्टनये। अथ प्रमालक्षणे पूर्वपक्षिभिः सम्भावितानां समुद्भूतानां दोषाणां निवारणेन लक्षणसङ्गतिप्रदाने प्रयासो विधीयते। तथाहि -

**व्यावहारिकज्ञाने प्रमालक्षणसङ्गतिः**

तत्र प्रमात्वं तावद् अनधिगताबाधितार्थविषयकज्ञानत्वम् इति प्रतिपादितम्। किन्तु प्रमालक्षणे दोषमाविष्कुर्वद्भिः नैयायिकैः पूर्वपक्षित्वेनात्रायमाक्षेपः समुपस्थाप्यते यद् अद्वैतसिद्धान्ते ब्रह्मैव केवलं सद् वस्तु। तस्मिन्

5 अन्नंभट्टः, तर्कसंग्रहः, सम्पा. नारायणगोस्वामी, पृ.-282.
6 धर्मराजाध्वरीन्द्रः, वेदान्तपरिभाषा, सम्पा. पञ्चाननशास्त्री, पृ.- 9.
7 नारायणभट्टः, मानमेयोदयः, पृष्ठा- 2.

च ब्रह्मणि परिदृश्यमानोऽयं जगत्प्रपञ्चोऽध्यस्तः। अध्यस्तमात्रस्य च विषयस्य मिथ्यात्वात् सर्वस्य जगतो मिथ्यात्वेन ज्ञाननाश्यत्वेन च बाधिततत्वम्। तथाहि यथा शुक्तिरूपाधिष्ठानज्ञानेन रजतादिभ्रमज्ञानं बाध्यते तथा ब्रह्मरूपाधिष्ठानज्ञानेन ब्रह्मातिरिक्तानां सर्वेषामपि व्यावहारिकज्ञानानां बाधितार्थविषयकत्वाद् व्यावहारिकघटादिज्ञानानां कथं प्रमात्वं, तत्तज्ज्ञानानामबाधितार्थ-विषयकज्ञानत्वाभावात्। ब्रह्मातिरिक्तानां सर्वेषामपि विषयाणामद्वैतमते मिथ्यात्वेन बाधितत्वात् तत्तद्विषयाणां सर्वेषामपि ज्ञानानां बाधितविषयकत्वात् तत्र तत्र प्रमालक्षणं अव्याप्तमिति।

तथात्वेऽद्वैतिभिरुच्यते – ब्रह्मसाक्षात्कारानन्तरं हि घटादीनां बाधः। ब्रह्म हि सर्वस्याधिष्ठानमिति तदधिष्ठानसाक्षात्कारानन्तरं हि सोपादानकार्यनिवृत्तिः। अधिष्ठान-साक्षात्कारस्यैवाध्यस्तनिवर्तकत्वाद् ब्रह्मणश्च घटाद्यधिष्ठानत्वाद् ब्रह्मसाक्षात्कारे सत्येव घटादीनां बाधः। तथा चेयं श्रुतिः – 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्'[8] इति। किञ्च, 'ब्रह्मविद् ब्रह्मैव भवति' इति श्रुतेश्च ब्रह्मसाक्षात्कारवतः पुरुषस्य क्रियाकारकफलरूपस्य प्रपञ्चजातस्य ब्रह्मरूपत्वात् न हि केनापि इन्द्रियेण कोऽपि विषयो ज्ञातुं शक्यते। तदानीं सर्वस्यापि जगत्प्रपञ्चस्य ब्रह्मात्मनावस्थानेन क्रियाकारकफल-व्यवहाराभावात् तस्याविद्यमानत्वेन घटादिज्ञानमेव नास्तीति घटादिज्ञानानां प्रमात्वविचार-प्रसङ्ग एव नापद्यते।

ब्रह्मज्ञानात्पूर्वं संसारदशायां तु सर्वेषां घटादिवस्तूनां व्यावहारिकसत्ताभ्युपगमात् तेषां बाधो नैव भवति। घटादीनां नाशेऽपि तदुपादानस्याज्ञानस्य सत्त्वात् न बाधः। तथाहि श्रुतिः – 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति'[9] इति। यदाज्ञानवशात् ब्रह्मणि नानात्वं दृश्यते तदा जीवः 'अहं कर्ता', 'अहं भोक्ता', 'इदं कर्म' इति भिन्नमिव पश्यति। तेन प्रमालक्षणे अबाधितपदेन संसारदशायामबाधितत्वं विवक्षितम्। अबाधितत्वञ्च ब्रह्मज्ञानेतर-ज्ञानाबाध्यत्वम्। ब्रह्मज्ञानातिरिक्तेन केनचिज्ज्ञानेन घटादेः विषयस्य बाधो न भवतीति सिद्धं घटादिज्ञानस्याबाधितार्थविषयकत्वम्, तेन च घटादिप्रमायां नाव्याप्तिः। उक्तञ्च-

"देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः।
लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयात्॥"[10]इति।

यथा- 'गौरोऽहम्', 'श्यामोऽहम्', 'ब्राह्मणोऽहमि'त्येवं देहात्मप्रत्ययो ब्रह्मसाक्षात्कारात् प्रागेव प्रमात्वेन व्यवह्रियते तथैव लौकिकं क्रियाकारकफलादिविषयकं ज्ञानमपि प्रमात्वेन व्यवह्रियते। तस्माद् व्यावहारिकदृष्ट्या घटादिज्ञानानां प्रमात्वमक्षतमेव।

**धारावाहिकज्ञाने प्रमात्वानुपपत्तिः लक्षणसङ्गतिश्च**

अनधिगताबाधितार्थविषयकज्ञानत्वं प्रमात्वं स्याच्चेत् पुनः धारावाहिकज्ञाने प्रमालक्षणमव्याप्तिदोषदुष्टं स्यादिति नैयायिकाः। ननु किं तावद् धारावाहिकज्ञानम्? उच्यते एकस्यैव विषयस्य प्रतिक्षणं जायमानं ज्ञानं हि धारावाहिकमिति। यथा- अयं घटः, अयं घट इत्येवंरूपः। तत्रायं घट इति द्वितीयादिज्ञाने प्रमात्वं नोपपद्यते। ननु कुत इति चेदुच्यते अयं घट इति ज्ञानस्य यो विषयो घटः स प्रथमज्ञानेनैवाधिगतः। एवञ्चात्रायं घट इति द्वितीयादिज्ञानानाम् विषयभूतघटस्य ज्ञातत्वात् तेषु च अनधिगतार्थविषयकज्ञानत्वाभावात् प्रमात्वाप्रसक्त्या अव्याप्तिशङ्का।

धर्मराजाध्वरीन्द्रेण अत्र प्रौढिवादेन एवं समाधीयते यद् अयं घट इति ज्ञानस्य विषयो न केवलं घटः, किन्तु

8 बृहदारण्यकोपनिषत्, सम्पा. करुणासिन्धुदासः, पृ.-188.
9 बृहदारण्यकोपनिषत्, सम्पा. करुणासिन्धुदासः, पृ.-188.
10 धर्मराजाध्वरीन्द्रः, वेदान्तपरिभाषा, पञ्चाननशास्त्री, पृ.-14.

क्षणमपि तत्र विषयत्वं भजते। तथाह्युच्यते- 'न सोऽस्ति प्रत्ययो लोके यत्र कालो न भासते' इति। तेनायं घट इति द्वितीयादिज्ञाने घटादिविषयस्य प्रथमज्ञानेनाधिगतत्वेऽपि द्वितीयादिकालविशिष्टानां घटादिविषयाणामधिगतत्वं नास्ति परमनधिगतत्वमेवास्ति। प्रथमज्ञानस्य प्रथमक्षणविशिष्टो घटादिः विषयः, द्वितीयज्ञानस्य च द्वितीयक्षणविशिष्टो घटादिः विषयः। एवञ्च द्वितीयज्ञानस्य प्रथमज्ञानाविषय-द्वितीयक्षणविशिष्टघटादिविषयकत्वेनाधिगतार्थविषयकत्वान्नाव्याप्तिरिति।

पुनश्च नैयायिका आक्षिपन्ति यत् महत्त्वं तथा उद्भूतरूपं द्रव्यप्रत्यक्षे प्रयोजकम्। किन्तु उद्भूतरूपत्वाभावात् कालस्य प्रत्यक्षत्वं नास्ति। तेन घटप्रत्यक्षे कालस्याविषयतया केवलं घटस्यैव विषयत्वेन तस्य च प्रथमज्ञानेनाधिगतत्वाद् धारावाहिकद्वितीयादिज्ञानस्य अनधिगताबाधितार्थविषयकज्ञानत्वाभावादव्याप्तिरिति।

अत्रेदमुत्तरं सिद्धान्तिनां यत् – नीरूपस्यापि कालस्य इन्द्रियवेद्यत्वाभ्युपगमेन धारावाहिकबुद्धेरपि पूर्व पूर्वज्ञानाविषयतत्तत्क्षणविशिष्टविषयकत्वेन न तत्राव्याप्तिः। अर्थात् द्रव्यप्रत्यक्षे कालोऽपि विषयतां याति। अन्यथा इदानीं पश्यामि, इदानीं स्पृशामि, इदानीं शृणोमीत्यादिव्यवहारो न सम्भवेत्। एकैकेन्द्रियग्राह्यद्रव्यप्रत्यक्षे रूपस्य प्रयोजकत्वेऽपि सर्वेन्द्रियग्राह्यद्रव्यप्रत्यक्षे न हि तस्य प्रयोजकत्वम्। उक्तञ्चाद्वैतसिद्धावपि- 'प्रतिनियतेन्द्रियग्राह्येषु एव रूपाद्यपेक्षानियमात्' इति। एवञ्च घटप्रत्यक्षे सर्वेन्द्रियग्राह्यस्य नीरूपस्यापि कालस्य विषयत्वात् धारावाहिकद्वितीयादिज्ञानविषयस्य घटस्य प्रथमज्ञानेन अधिगतत्वेऽपि द्वितीयादिक्षणस्य पूर्वपूर्वज्ञानाविषयतया अनधिगतत्वेन तत्तत्क्षणविशिष्टानां घटानामप्यनधिगतत्वात् नाव्याप्तिः। मानमेयोदयग्रन्थेऽप्यनुरूपमुक्तं- 'ननु अज्ञातावगमस्यैव प्रमात्वे घटोऽयं घटोऽयमिति धारावाहिकज्ञानेषु द्वितीयादीनामप्रमात्वं स्यात्। मैवम्। तत्राप्ययमयम् इत्युत्तरोत्तरेषां कालांशानामज्ञातानामवगमात् उत्तरे क्षणे घटादिसद्भावस्य च पूर्वज्ञानेनानधिगतत्वात्'[11] इति।

किञ्च धारावाहिकद्वितीयादिज्ञानस्यानुवादत्वेनाङ्गीकारात् तस्याप्रमात्वमिति केषाञ्चिन्मतम्। वस्तुतस्तु अज्ञातार्थज्ञापकत्वस्यैव प्रमात्वप्रयोजकत्वाद् द्वितीयादिज्ञानस्य च तदभावात् न हि तस्य प्रमात्वमिति भावः। तथाह्युक्तमद्वैतरत्नरक्षणे - 'न च धारावाहिकबुद्ध्यव्याप्तिर्ज्ञातज्ञापकत्वादिति वाच्यम्, अनुवादकत्व-लक्षणस्याप्रामाण्यस्येष्टत्वात्' इति।

एवं धारावाहिकस्थले ज्ञानभेदस्वीकारेण कालभेदाङ्गीकारेण तथा अनुवादप्रामाण्यास्वीकारेण नैयायिकाक्षिप्तान् दोषान् दूरीकृत्यान्तिमे स्वमतमुपस्थापयद्भिः सिद्धान्तिभिरद्वैतिभिरुच्यते- 'किञ्च सिद्धान्ते धारावाहिकस्थले न ज्ञानभेदः'[12] इति। तत्र विवरणपन्थिभिः न हि प्रतिक्षणं ज्ञानभेदः स्वीक्रियते। तेषां नये यावन्न स्वविरोधिवृत्तेरुदयस्तावत् तदाकारान्तःकरणवृत्तिरेकैव। तेन यावद् घटस्फुरणं तावद् घटाकारान्तःकरणवृत्तिरपि एकैव न तु नाना। तत्र च प्रतिफलितं चैतन्यरूपं घटादिज्ञानमपि तावत्कालीनमेकमेव। एवञ्च धारावाहिकज्ञाने एकमेव ज्ञानं स्वीकरणीयमिति तेषां भावः। तदुक्तं भावप्रकाशिकायाम् – 'अस्मन्मते तु धारावाहिकबुद्धिरेव नास्ति, एकस्यैव ज्ञानस्य तावत्समयस्थित्युपपत्तेः' इति। एवञ्च धारावाहिकस्थलेऽपि घटादिज्ञानस्यैकत्वात् अनधिगताबाधितार्थविषयकनिश्चयात् नाव्याप्तिरिति। तेनानधिगताबाधितार्थविषयकज्ञानत्वम् एव प्रमात्वमिति निर्दुष्टं प्रमालक्षणं विहितं धर्मराजाध्वरीन्द्रेण।

---

11 नारायणभट्टः,मानमेयोदयः, पृष्ठा-7

12 धर्मराजाध्वरीन्द्रः, वेदान्तपरिभाषा, सम्पा. पञ्चाननशास्त्री, पृ.- 11.

**उपसंहारः**

एवं नानायुक्तिजालं रचयिद्धिः पूर्वपक्षिभिः प्रमालक्षणे अव्याप्त्यादिदोषे दर्शितेऽपि प्रतियुक्तिभिः खण्डितः सर्वविधदोषः, विहितञ्च निर्दुष्टं प्रमालक्षणं वेदान्तपरिभाषाकारेण धर्मराजाध्वरीन्द्रेण। किन्तु तथापि केचनाचार्याः सिद्धान्तमते नेदं प्रमालक्षणं समीचीनमिति मन्यन्ते, लक्षणे अबाधितानधिगतपदयोरानर्थक्यात्। वस्तुतस्तु सिद्धान्तमते अज्ञातनिवर्तकत्वमात्रस्यैव प्रमात्वं स्वीक्रियते। किन्तु स्मृतेस्तथा भ्रमस्याज्ञान-निवृत्त्यजनकत्वेन प्रमात्वमेव नास्ति, तयोरविद्यावृत्तित्वात्, प्रमाणवृत्तित्वाभावाद्वा। अतो नेदम् अद्वैतवेदान्तसम्मतं लक्षणम्। वस्तुतस्तु'व्यवहारे भाट्टनयः' इति नीतिमनुस्मरता धर्मराजाध्वरीन्द्रेण तदीयवेदान्तपरिभाषायां भाट्टसम्मतं प्रमालक्षणं विहितम्। सिद्धान्तमते प्रमात्वं तावत् अज्ञातार्थविषयकनिश्चयत्वम्। अद्वैततत्त्वरहस्यविदा मधुसूदनसरस्वतीपादेनापि अनुरूपं मतं प्रकटीकृतं स्वीयेऽद्वैततत्त्वरक्षणे – 'अज्ञातार्थनिश्चयात्मत्वमेव प्रामाण्यमस्मत्पक्षे तच्च सर्वत्रानुगतं ब्रह्मज्ञानस्यापि तथारूपत्वात्' इति शम्।

**सहायकग्रन्थसूची**


1. आप्टे, वामन शिवराम. *संस्कृतहिन्दीकोशः*. दिल्ली: मोतीलाल बनारसी दास, २००७. (प्रथमसंस्करणम्).
2. अन्नंभट्टः, *तर्कसंग्रहः*. सम्पा. श्रीकृष्णबल्लभाचार्यः, वाराणसी: चौखम्बासुरभारतीप्रकाशनी, २००७.
3. धर्मराजाध्वरीन्द्रः. *वेदान्तपरिभाषा*. सम्पा. श्रीमत्पञ्चाननभट्टाचार्य-तर्कसांख्यवेदान्ततीर्थः, कलिकाता : संस्कृतपुस्तकभाण्डार, १३७७ बङ्गाब्दः (१९७१ आङ्गलाब्दः)।
4. धर्मराजाध्वरीन्द्रः, *वेदान्तपरिभाषा*. सम्पा. शरच्चन्द्रघोषालः. कलिकाता : संस्कृतपुस्तकभाण्डार, १९९५.
5. धर्मराजाध्वरीन्द्रः. *वेदान्तपरिभाषा*. सम्पा. श्रीमत्पञ्चाननभट्टाचार्य-तर्कसांख्यवेदान्ततीर्थः, कलिकाता :१३७७ (बङ्गाब्दः)।
6. नाराणभट्टः. *मानोमेयोदयः*. सम्पा. श्रीमद्दीननाथत्रिपाठी. कलिकाता : संस्कृतमहाविद्यालयः,
7. *बृहदारण्यकोपनिषत्*. सम्पा. करुणासिन्धुदासः. कलिकाता :संस्कृत बुक् डिपो, २०१६ (पुनर्मुद्रणम्)।


Received on 02. 06. 2017 Accepted on 24. 07. 2017

# शब्दब्रह्मोपलब्धिरेव आनन्दानुभूतिः

*Abhijit Mandal**

**प्रबन्धसारांशः**

ब्रह्मलाभरूपानन्दं प्रति सर्वशास्त्रस्य मतिः परिलक्ष्यते एव। वस्तुतः आनन्दानुभूतौ मानवानामिच्छा स्वाभाविकी एव। तत्र लौकिकानन्दः, पारलौकिकानन्दः चेति द्विविधानन्दः। पारलौकिकानन्द एव ब्रह्मलाभेन जायते। तस्यानन्दस्योपलब्धिः व्याकरणेनापि जायते। शाब्दिकानां सकाशे शब्द एव ब्रह्मस्वरूपः । शब्दस्य सम्यज्ज्ञानेनैव ब्रह्मप्राप्तिरिति। तेनैव आनन्दानुभूतिः।

**प्राबन्धिककुञ्चीपदानि** – शब्दः, आनन्दः, पारलौकिकानन्दः, आत्यन्तिकदुःखनिवृत्तिः, शब्दब्रह्म, व्याकरणम्, वाक्यपदीयब्रह्मकाण्डम्, भर्तृहरिः।

"तृप्तिं यत्परमां तनोति विषयास्वादं विना शाश्वतीम्"।

कस्तावद् आनन्दः इति आदावेव ज्ञातव्यम्। शास्त्रकाराः विषयेऽस्मिन् भिन्नं भिन्नं स्वमतं प्रतिपादयामासुः। केचन वदन्ति दुःखस्य आत्यन्तिकनिवृत्तिरेव आनन्दः। केषाञ्चित् मते तु मनोधर्मः, अनित्यमेव सुखमिति, सर्वेषाम् अनुकूलवेदनीयं सुखमिति नैयायिकाः। आनन्दः खलु द्विविधः भवितुमर्हति। यथा सम्प्रति कस्यचित् मोदकभोजने इच्छा वर्तते, तस्याः इच्छायाः निवृत्तौ तु यः आनन्दः जायते स तु लौकिकानन्दः, कारणम् अनेन पुरुषस्य दुःखस्य आत्यन्तिकनिवृत्तिर्न जायते। कुमारिलभट्टमते तु "विषयजनितं सुखं न परमसुखम्" इति। कस्तर्हि आनन्दः येन दुःखस्यात्यन्तिकनिवृत्तिर्जायते? तद्धि पारलौकिकानन्दः, ब्रह्मोपलब्धिरेव आनन्दः, येन सांसारिकमोहबन्धनरूपदुःखस्यात्यन्तिकनिवृत्तिर्जायते, अज्ञानञ्च भवति तिरोहितम्। तदा "ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः"[1] इति ज्ञानं भवति। ब्रह्मण आनन्दस्वरूपम् उपनिषदादौ बहुशः प्रपञ्चितमेव। विशेषतया तैत्तिरीयोपनिषदि आम्नातम् –»आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति"।[2] वस्तुतो आनन्द एव ब्रह्म, ब्रह्मण आनन्दस्वरूपं वा न मनसा ज्ञायते न वा वचसा प्रकाश्यते, आनन्दास्वादे सति न तिष्ठति भयं नाम किञ्चित्। आम्नातञ्च तैत्तिरीयोपनिषदि- "यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्। न बिभेति कश्चन" इति।। अतो ब्रह्मोपलब्धौ तु आनन्दो जायते इति वेदोपनिषद्वचनेषु ज्ञायते एव। अस्यैव चरमपुरुषार्थस्य प्राप्तिविषये रुचीनां वैचित्र्यात् दार्शनिकाः भिन्नं भिन्नं स्वकीयं मतं प्रदर्शयन्ति। लक्ष्यस्तु एक एव मोक्षलाभो ब्रह्मोपलब्धिर्वा। विषयेऽस्मिन् व्याकरणदर्शनस्य मतमुल्लेखयोग्यम्।

शब्दसाधुत्वव्यवस्थापकं शास्त्रं खलु व्याकरणम्। व्याकरणस्य अंशद्वयं दृश्यते, एकः प्रक्रियांशः अपरश्च दर्शनांशः। ब्रह्मोपलब्धिरेव मोक्षलाभ इति व्याकरणदर्शनस्यापि भवति चरमलक्ष्यः। शब्दस्य साधुत्वनिर्णये यथा व्याकरणं भवति अग्रगण्यं तथैव शब्दब्रह्मत्व-प्रतिपादनेऽपि सर्वातिशायि व्याकरणम्। शाब्दिकनये शब्दतत्त्वमेव सच्चिदानन्दस्वरूपब्रह्म। अस्य शब्दब्रह्मवादस्य प्रतिष्ठाता खलु भर्तृहरिः, न तु प्रथमप्रवर्तकः। यथोक्तं शङ्करेण ब्रह्मणः विवर्तभूतं भवति जगत्प्रपञ्चम्,

1 शङ्कररचितब्रह्मज्ञानावलीमाला 21 संख्यकः श्लोकः।
2 तैत्तिरीयोपनिषदः भृगुवल्ल्याः षष्ठेऽनुवाके।

**Assistant Professor, Department of Sanskrit, Cooch Behar Panchanan Barma University & Research Scholar Of Ramakrishna Mission Vidyamandira.*

तथैव भर्तृहरिमते तु जगत्प्रपञ्चं भवति शब्दब्रह्मणः विवर्तभूतम्। सुष्टूक्तं वाक्यपदीये भर्तृहरिणा ब्रह्मणः स्वरूपं तस्य सर्वजगद्विवर्तोपादानरूपताञ्च प्रथमकारिकया–

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः"।।इति।।[3]

तस्य ब्रह्मणः चिद्रूपस्फोटरूपस्य अनादिनिधनं शब्दतत्त्वमिति स्वरूपलक्षणं, विवर्ततेऽर्थभावेनेत्यादि तु तटस्थलक्षणं **"सत्यं ज्ञानमनन्तं ब्रह्मेति, यतो वा इमानि भूतानि जायन्ते"**[4] इत्यादिश्रुतिप्रतिपादितस्वरूपतटस्थलक्षणानुगतमेव वाक्यपदीयकारैः प्रतिपादितम्। ब्रह्मणो दशाद्वयी शास्त्रे प्रसिद्धा। एका विद्यया अप्रविभागदशा अपरा च अविद्यया प्रविभागदशा। यद्यपि प्रविभागदशायां ब्रह्म विविधविकल्पगोचरम्, तथा हि तस्यां दशायामेकस्यैव ब्रह्मणो धर्मधर्म्यादिरूपेण विकल्पः। घटोऽभूत् भवति भविष्यति इत्यादिकालभेदेन भिन्नजातिपुरस्कारेण च गोघटादिप्रत्ययः, तथापि प्रविभागाभावदशायां तादृशसर्वविकल्पातीतं ब्रह्मतत्त्वम्। अनादिनिधनमेव तद्ब्रह्म। एकमेव तद्ब्रह्म कार्यञ्च कारणञ्च। तस्य कार्यं प्रति प्रवृत्तिकोटिर्निवृत्तिकोटिर्वा यथाक्रमं पूर्वापरकालकल्पनाशून्यं न परिसंख्यातुं शक्यते। न हि ब्रह्मणः सर्गप्रवृत्तेः प्राक् किञ्चिन्नासीत् न वा सर्गनिवृत्तेः पश्चान्नास्ति किमपि इति कल्पयितुं शक्यते, अनादित्वात् प्रवृत्तिनिवृत्त्योः कालपरिच्छेदासम्भवात्। तच्च ब्रह्म शब्दतत्त्वं, शब्दात्मकमित्यर्थः। ननु प्रागुक्तं ब्रह्म सर्वविकल्पातीततत्त्वमिति। अधुना तु कथं तद्विपरीतमुच्यते शब्दतत्त्वमिति? इति चेत् न, विकाराणां प्रकृत्यन्वयात् शब्दत्वोपपत्तेः। तथा हि घटकुण्डलादयो विकारा मृत्सुवर्णादिप्रकृत्यन्विता हि दृश्यन्ते। तथैवैते रूपादयो विषयाः शब्दरूपानुगता एव दृश्यन्ते। तदुक्तम्-

"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते"।।इति।।[5]

तच्च शब्दतत्त्वं ब्रह्म अक्षराणां वर्णानां निमित्तत्वाद् अक्षरमिति। स्थूलवर्णाकारेण ब्रह्मैव रूपाद्यर्थबोधार्थं विवर्तते। विवर्तते इति पदस्य व्याख्यायां सोपज्ञवृत्तौ उच्यते –»एकस्य तत्त्वादप्रच्युतस्य भेदानुकारेण असत्यविभक्तान्यरूपोपग्राहिता विवर्तः" इति। स्वर्णादेः कुण्डलादि तु विवर्त एव, न तु पयसो दधि। बौद्धाचार्यास्तु शब्दस्य ब्रह्मत्वं निराकुर्वन्ति। ते तु दौयाकरणस्य विरुद्धमतं प्रदर्शयन्ति यत् किं शब्दाः स्वीयरूपपरित्यागपूर्वकम् अर्थरूपतामेति उतो वा स्वीयरूपापरित्यागपूर्वकम् अर्थरूपतामेति? स्वीयरूपपरित्यागे तु अक्षरात्मकशब्दस्य नित्यत्वं भवति व्याहतम्।परन्तु नित्यस्य रूपान्तरप्राप्तिः असम्भवमेव। तत्त्वसंग्रहे उच्यते

"नित्यशब्दमयत्वे च भावानामपि नित्यता।
तद्यौगपद्यतः सिद्धेः परिणामो न सङ्गतः"।।इति।।

अर्थस्तु शब्दस्य विवर्तितरूपः। तर्हि कथं शब्दः ब्रह्मपदवाच्यः? समाधाने तावत् शाब्दिकाः वदन्ति यत् तेषां नये न शब्दो ब्रह्म, अपि तु शब्दतत्त्वमेव ब्रह्म। शब्दतत्त्वस्यैव अर्थरूपेण विवर्तो जायते। रज्जौ सर्पभ्रमे तु रज्जुः निजरूपं न परित्यजति, तत्रावस्तव सर्पस्यैव भानं जायते। शाब्दिकनयेऽपि शब्दः निजरूपमपरित्यज्य अर्थकारेण विवर्तितो भवति। अतो ब्रह्मणः एकत्वं न व्याहतम्। शाब्दिकनये तु शब्दब्रह्मणः सायुज्यलाभ एव मुक्तिः। महाभारतस्य शान्तिपर्वणि दृश्यते

"द्वे ब्रह्मणि वेदितव्ये शब्दब्रह्मपरं च यत्।

---

3 वाक्यपदीयब्रह्मकाण्डस्य प्रथमकारिका।
4 तैतिरीयोपनिषदि ब्रह्मानन्दवल्ली 2.1।
5 वाक्यपदीय-ब्रह्मकाण्डस्य 123 संख्यका कारिका।

शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।।''इति।।[6]

कोऽयमधिकारः आनन्दस्य? भगवता पतञ्जलिना ''णेरणौ यत्कर्णौ चेत्स कर्ताऽनध्याने''(१/३/६७) इति पाणिनीयसूत्रभाष्ये आत्मद्वयं स्वीकृतं, तद्धि एवं –»द्वावात्मानौ अन्तरात्मा शरीरात्मा च। अन्तरात्मा तत्कर्म करोति येन शरीरात्मा सुखदुःखे अनुभवति। शरीरात्मा तत्कर्म करोति येनान्तरात्मा सुखदुःखे अनुभवतीति''।इति। अत्र सांख्यमतमाधारीकृत्य कैयटेन एवं व्याख्यातं यत् ''सांख्यमतेऽन्तःकरणमन्तरात्मा तस्यैव कर्तृत्वसम्भवात् पुरुषस्याकर्तृत्वात्। नैयायिकदीनां तु पुरुषस्य कर्तृत्वात् स एवान्तरात्मा विवक्षतः। शरीरात्मा सुखदुःखेति। शरीरस्याचेतनत्वात् सुखदुःखहेतुभ्यां शरीरं सम्बद्ध्यत इति व्याख्येयम्''। इति। वस्तुतः आत्मा एव सुखदुःखस्य भवति अधिकरणम्।

साधुशब्दस्य व्युत्पत्तिद्वारा मोक्षलाभस्य मार्गमुन्मोचयति व्याकरणम्। व्याकरणप्रदर्शितोऽयं मार्गः मुमुक्षूणां सकाशे सरलमार्गः। वाक्यपदीये उच्यते

''इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः''इति।।[7]

''एकः शब्दः सम्यज्ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति'' इत्युक्तिमाधारीकृत्य अन्तिमे एतदेव वक्तुं शक्यते यत्,स्फोटात्मकशब्दतत्त्वस्य ब्रह्मपदवाच्यत्वे सिद्धे शुद्धशब्दज्ञानेन नाम शब्दब्रह्मोपलब्धिद्वारा आनन्दानुभूतिर्जायते। तद्धि उच्यते सोपज्ञवृत्तौ

''ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम्।
विवृत्तं शब्दमात्राभ्यस्तास्वेव प्रविलीयते।।'' इति शम्।।

**ग्रन्थस्रोतांसि**


- *उपनिषद् ग्रन्थावली*. २००६. सम्पा. स्वामिगम्भीरानन्दः. कोलिकाताः उद्बोधनकार्यालयः.
- भर्तृहरिः. २००६(चतुर्थसंस्करणम्). *वाक्यपदीयम् (हरिवृषभकृतया स्वोपज्ञवृत्त्या, पद्मश्रीपण्डितरघुनाथशर्मणा विरचितया अम्बाकर्त्रीव्याख्यया च सहितम्)*. प्रकाशकः डः हरिश्चन्द्रमणित्रिपाठी. वाराणसी: सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः.
- भर्तृहरिः. २००७ (पुनर्मुद्रणम्). *वाक्यपदीयम्(ब्रह्मकाण्डम्)*. सम्पा. विष्णुपदभट्टाचार्यः. कलिकाता: पश्चिमवङ्गराज्यपुस्तकपर्षत्.
- भर्तृहरिः. २००८. *वाक्यपदीयम्(ब्रह्मकाण्डम्)*. सम्पा. शिवनाथ-अवस्थी. वाराणसीः चौखम्बा-विद्याभवन.
- हालदारः, गुरुपदः. २००६. *व्याकरणदर्शनेर इतिहास (वङ्गभाषायाम्)*. कोलकाता: संस्कृतवुक्-डिपो.


Received on 06. 06. 2017 Accepted on 24. 07. 2017

6 महाभारतस्य शान्तिपर्वणि – 30/232
7 वाक्यपदीय-ब्रह्मकाण्डस्य 16 संख्यका कारिका।

# "येन विधिस्तदन्तस्य" इति सूत्रस्य न्यासान्तरसमीक्षणम्

**Malay Porey***

**प्रबन्धसारः**

अस्मिन् प्रबन्धे **"येन विधिस्तदन्तस्य" (१।१।७२)** इति सूत्रस्य महाभाष्यदिशा न्यासान्तरसमीक्षणं मया प्रत्यपादि। तत्रादौ व्याकरणशास्त्रं नाम किम्, तस्य किं प्रयोजनमिति प्रतिपाद्य सर्वेषु व्याकरणेषु लोकवेदोभयोपकारकत्वात् पाणिनीयव्याकरणं सर्वातिशायीति प्रतिपादितम्। ततः पाणिनीयव्याकरणस्य मूलभूते सूत्रग्रन्थे अष्टाध्यायीत्याख्ये प्रथमाध्यायस्य प्रथमपादस्य द्विसप्ततितमस्य सूत्रस्यास्य सूत्रार्थः वर्णितः। ततः सूत्रार्थं प्रतिपाद्य सूत्रस्यास्य दोषयुक्तत्वात्तस्य स्थाने महाभाष्ये **"प्रकृते तदन्तविधिः"** इति न्यासान्तरं परिकल्पितम्। न्यासान्तरार्थप्रकाशनेन दोषनिरासं विधाय ततः सूत्रपक्षस्य यथायोग्यविवेचनेन तत्र दोषराहित्यविधानेन बहुलप्रयोजनव्याख्यानेन च सूत्रस्यैव स्वीकारो जातः। यद्यपि सूत्रभेददोषः अत्र नोपात्तः। अतः न्यासान्तरमपि लक्ष्यप्रतिपादकमेव प्रतीयते। तथापि सूत्रस्यादृष्टप्रयोजनकत्वात् सूत्रमेव वरमिति आशयः। एवं समासेन "येन विधिस्तदन्तस्य" इति सूत्रस्य न्यासान्तरसमीक्षणं प्रस्तुतम् इति शिवम्।

**मूलशब्दाः**

व्याकरणम्, सूत्रार्थः, न्यासान्तरम्, न्यासान्तरस्वीकारहेतुः, सूत्रपक्षविचारः, सूत्रप्रयोजनम्, न्यासान्तरसमीक्षणम्।

**१) उपोद्घातः**

संस्कृताख्यां दैवीं वाचं समाश्रित्य बहूनि ऐहिकामुष्मिकफलसाधनानि शास्त्राणि विरचितानि। तेषु आप्तप्रोक्तेषु बहुषु शास्त्रेषु **"पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते"** इति हर्युक्तेः व्याकरणशास्त्रं महद् गुरुत्वं बिभर्ति। संस्कृतं नाम शुद्धम् अर्थाद् असाधुत्वरहितम्। संस्कृतस्य शुद्धत्वस्य नियामकं भवति व्याकरणशास्त्रम्।

व्याक्रियन्ते विविच्यन्ते प्रकृतिप्रत्यया अनेनेति विग्रहे विपूर्वकाद् आङ्-पूर्वकात् कृधातोः **"करणाधिकरणयोश्च" (३।३।११७)** इति सूत्रेण करणे ल्युटि व्याकरणशब्दो निष्पन्नः। अथवा व्याक्रियन्ते पृथक्क्रियन्ते असाधुशब्देभ्यः साधुशब्दा अनेनेति विग्रहो व्याकरणशब्दस्य। अर्थाद् असाधुशब्दावधिकसाधुशब्दकर्मकपृथक्कृतिनियमविशेषो भवति व्याकरणम्। व्याकरणेनान्वाख्यातानामेव शब्दानां लौकिकप्रयोगे साधुत्वं स्वीक्रियते। वेदाङ्गेषु शब्दसाधुत्वनिष्पादकत्वेन भाषालम्बनत्वेन मुख्यं व्याकरणं मुखत्वेन परिकल्पितम्। तथाह्याह फणिमणिः – **"प्रधानं च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति।"**[1] इति।

बहुषु व्याकरणशास्त्रेषु पाणिनीयव्याकरणं लोकवेदोभयोपकारकत्वेन सर्वाणि व्याकरणशास्त्राणि अतिशय्य विराजते।

1 व्याकरणमहाभाष्यम्, ख० १, पृ० २३

*Assistant Professor of Sanskrit, Govt. General Degree College at Ranibandh

तथाह्यगादि नागेशेन लघुशब्देन्दुशेखरे संज्ञाप्रकरणे – **"श्रुतिमूलकत्वादस्यैव वेदाङ्गत्वम्।"**[2] इति।
संस्कृतव्याकरणस्यानुपमरत्नस्वरूपमिदं व्याकरणमित्यत्र नास्ति कस्यचिद् विप्रतिपत्तिः। पाणिनिना प्रोक्तमिति विग्रहे **"तेन प्रोक्तम्" (४।३।१०१)** इति सूत्रेण छप्रत्यये पाणिनीयम् इति निष्पद्यते। पाणिनीयव्याकरणम् इति नामश्रवणेनैव ज्ञायते यद् अस्य व्याकरणस्य परमाचार्यो महर्षिः पाणिनिः। पाणिनीयव्याकरणस्य मूलभूतः सूत्रस्वरूपः ग्रन्थो भवति अष्टाध्यायी इति।

### २) सूत्रविचारः

तत्र अष्टाध्याय्याः प्रथमाध्यायस्य प्रथमपादस्य द्विसप्ततितममिदं सूत्रं **"येन विधिस्तदन्तस्य"** इति। षड्विधेषु सूत्रेषु इदं सूत्रं विधायकम्। अनेन सूत्रेण तदन्तविधिः विधीयते।

### २.१) सूत्रार्थः

सूत्रमिदं पदत्रयात्मकम्। तत्र येनेति करणे तृतीया। विधिः इति प्रथमान्तं तदन्तस्येति च षष्ठ्यन्तं पदम्। विधीयते इति विग्रहे विपूर्वकाद् धाधातोः **"उपसर्गे घोः किः" (३।३।९२)** इति सूत्रेण कर्मणि किप्रत्यये विधिशब्दो निष्पन्नः। विधाने कर्ता भवति सूत्रकर्ता पाणिनिः। येनेत्यत्र करणं हि परतन्त्रं विशेषणरूपम्। **"स्वं रूपं शब्दस्याशब्दसंज्ञा" (१।१।६८)** इत्यस्मात् सूत्रात् स्वमित्यनुवर्तते षष्ठ्यन्ततया च विपरिणमते। एवञ्च विधानक्रियायां यत्करणं विशेषणं तत् तदन्तस्य स्वस्य च प्रत्यायकमिति फलति। अत एवाह दीक्षितसूत्रवृत्तौ – **"विशेषणं तदन्तस्य संज्ञा स्यात् स्वस्य च रूपस्य।"**[3] इति।

**"एरच्" (३।३।५६)** इति सूत्रमिहोदाहरणम्। धातोरित्यधिकृतस्य विशेषणं भवति एः इति इशब्दस्य पञ्चम्यन्तम्। तदन्तसूत्रेण विशेषणे तदन्तविधिना सूत्रार्थः समायाति इवर्णान्ताद् धातोः अच् स्यादिति। चयः इत्युदाहरणं भवति। तथा चिधातोः इवर्णान्ताद् **"एरच्" (३।३।५६)** इति सूत्रेण अचि प्रक्रियाकार्ये चयः इति रूपम्। एवमेव तदन्तविधिसूत्रे स्वस्येति स्वीकाराद् इण् गतौ इति इमात्रशेषाद् धातोः **"एरच्" (३।३।५६)** इति सूत्रेण अचि प्रक्रियाकार्ये अयः इति रूपं निष्पद्यते।

### २.२) न्यासान्तरपक्षविचारः

सूत्रस्यास्य स्वीकारे आक्षेप्तृभिः केषाञ्चिद् दोषाणां परिकल्पनाद् महाभाष्ये न्यासान्तरं परिकल्पितम्। न्यासो नाम सूत्रस्य विन्यासः। अन्यो न्यासः न्यासान्तरमिति मयूरव्यंसकादिवत्समासः। सूत्रस्यान्यथा विन्यासो भवति न्यासान्तरम्। तच्च न्यासान्तरं भवति **"येन विधिस्तदन्तस्य" (१।१।७२)** इति सूत्रस्य स्थाने **"प्रकृते तदन्तविधिः"**[4] इति।

२.२.१) न्यासान्तरस्वीकारहेतुः

अस्य सूत्रस्य स्वीकारे बहुषु स्थलेषु दोषाणां समुद्भव एव न्यासान्तरस्वीकारे कारणमस्ति। सूत्रपक्षे ये दोषाः सम्भवन्ति ते तावत् –

**क) प्रथमदोषः – "इको यणचि" (६।१।७७)** इति सूत्रे अनेन सूत्रेण तदन्तविधिः स्यात्। शब्दानुशासनप्रस्तावात्

---

2 लघुशब्देन्दुशेखरः, भा० १, पृ० १८
3 वैयाकरणसिद्धान्तकौमुदी, ख० १, पृ० ३६
4 तत्रैव, पृ० ५६८

्दरूपं विशेष्यम् इक् च विशेषणम्।[5] [6] इकः तदन्तविधित्वात्सूत्रार्थो भवति **"इगन्तस्य शब्दरूपस्य स्थाने यण् स्यादचि परे"** इति।

तेन दधि अत्र मधु अत्र इत्यादौ इकारान्तस्य उकारान्तस्य च इगन्तस्य स्थाने यथाक्रमं यणः यकारस्य वकारस्य च आदेशे य् अत्र इति व् अत्र इति सर्वसंयोगे यत्र वत्र इति अनिष्टरूपापत्तिदोषः स्यात्।[7]

**"अलोऽन्त्यस्य" (१।१।५२)** इति परिभाषाबलाद् इगन्तस्य अन्त्यस्य इकः स्थाने यणो निर्देशाद् दध्यत्र मध्वत्र इत्यादिकं रूपं सिध्यतीति दोषनिवारणं सिध्यति।[8]

परन्तु सर्वत्र दोषनिवारणं न शक्यम्। **"एचोऽयवायावः" (६।१।७८)** इति सूत्रविहितानामादेशानाम् अनेकाल्त्वात् तत्र अलोऽन्त्यपरिभाषाया अप्रसक्तेः तदन्तापत्तिदोषः समायाति। तथाहि नै अक इति जाते तदन्तविधौ **"एचोऽयवायावः" (६।१।७८)** इति सूत्रेण ऐकारान्तस्य नै इत्यस्य स्थाने आयादेशापत्तिः। तेन आयक इत्याद्यनिष्टसिद्धिरिति दोषः।[9]

यथा प्रकृतितः तथैव आदेशतः अपि तदन्तविधिर्भवति। तेन एजाद्यन्तानां स्थाने अयाद्यन्तानाम् आदेशानां सत्त्वाद् नायक इत्यादिक् इष्टं रूपं सिध्यति।[10]

एवं समाधानं स्वीक्रियते चेदपि सूत्रपक्षे दोषाः सन्त्येव। यतो हि प्रकृतित इव क्वचित् आदेशतः तदन्तविधौ शब्दस्वरूपे वैरूप्यं भवति। यथा – **"आद् गुणः" (६।१।८७)** इत्यत्र तदन्तविधिस्वीकारे **"अवर्णान्ताद् अजादौ परे पूर्वपरयोः स्थाने गुणः स्यादि"**ति सूत्रार्थस्वीकाराद् ब्रह्म इन्द्र इत्यत्र अवर्णान्ताद् ब्रह्मशब्दाद् अजादौ इन्द्रशब्दे परे शब्दद्वयस्य स्थाने एकारस्यापत्तिरिति दोषः।[11]

**ख) द्वितीयदोषः** – अन्तरङ्गबहिरङ्गव्यवस्थाभङ्गापत्तिरिति दोषः सूत्रपक्षे विद्यते।

**"इको यणचि" (६।१।७७)** इत्यत्र तदन्तविधिस्वीकारे सूत्रस्यार्थो भवति **"इगन्तस्य शब्दस्वरूपस्य स्थाने यण् स्याद् अजादौ परे।"** इति। तथाहि सिव्धातोः **"सिवेष्टेर्यूच"** इति औणादिकेन सूत्रेण बाहुलकात् नप्रत्यये सिव् न इति स्थिते **"पुगन्तलघूपधस्य च" (७।३।८६)** इति लघूपधगुणं प्रबाध्य अन्तरङ्गत्वात् **"च्छ्वोः शूडनुनासिके च" (६।४।१९)** इत्यनेन वकारस्य ऊठि सि ऊ न इति स्थिते अजादौ ऊन इति समुदाये परे **"इको यणचि" (६।१।७७)** इति सूत्रेण इगन्तस्य सि इत्यस्य स्थाने यणादेशः, नेत्यस्य आर्धधातुकत्वमाश्रित्य सि ऊ इत्यत्र इकारस्य लघूपधगुणश्च प्राप्तः। एवम् ऊनशब्दाश्रिताद् यणादेशात् स्वल्पापेक्षत्वाद् नमात्राश्रितस्य लघूपधगुणस्यान्तरङ्गत्वाद् आदौ लघूपधगुणे से ऊ न इति जाते, इकः असत्त्वाद् यणादेशाभावाद् स्योन इतीष्टं रूपं न सिध्यतीति दोषः। तथाह्युक्तं महाभाष्ये –

"अपि चान्तरङ्गबहिरङ्गे न प्रकल्पेयाताम्। तत्र को दोषः? स्योनः, स्योना। अन्तरङ्गलक्षणस्य यणादेशस्य बहिरङ्गलक्षणो गुणो बाधकः प्रसज्येत। नशब्दमाश्रित्य गुणः।"[12] **इति।**

**ग) तृतीयदोषः** – सर्वत्र तदन्तविधिस्वीकारे द्यौः पन्थाः सः इत्यादौ अल्विधिर्न सिध्यति। अल्विधिर्नाम अलः स्थाने जायमानो विधिः।[13]

5 व्याकरणमहाभाष्यम्, ख० १, पृ० ५६६ (प्रदीपः)

6 महाभाष्यप्रदीपव्याख्यानानि, ख० ३, पृ० २४८ (विवरणम्)

7 इह कस्मान्न भवति - "इको यणचि" दध्यत्र मध्वत्र? - व्याकरणमहाभाष्यम्, ख० १, पृ० ५६६

8 अस्तु। अलोऽन्त्यस्य विधयो भवन्तीत्यन्त्यस्य भविष्यति - तत्रैव, पृ० ५६६

9 नैवं शक्यम्। ये अनेकाल आदेशास्तेषु दोषः स्याद् - "एचोऽयवायावः" इति। - तत्रैव, पृ० ५६७

10 नैष दोषः। यथैव प्रकृतितस्तदन्तविधिर्भवति एवमादेशतोऽपि भविष्यति। तत्रैजन्तस्यायाद्यन्ता आदेशा भविष्यन्ति। - तत्रैव, पृ० ५६७

11 यदि चैवं क्वचिद्वैरूप्यं तत्र दोषः स्याद् - ब्रह्मेन्द्रः ब्रह्मोदकम्। - तत्रैव, पृ० ५६७

12 तत्रैव, पृ० ५६७

13 स्थानिवदित्यत्र अलो जायमानो विधिरल्विधिरित्यर्थः - तत्रैव, पृ० ५६७ (उद्योतः)

**“अलोऽन्त्यस्य” (१।१।५२)** इति परिभाषायां तदन्तविधिस्वीकारे परिभाषायामस्यामपि तदन्तविध्यापत्तिः। तेन परिभाषायाः अर्थः समुदेति – **“यः षष्ठीनिर्दिष्टस्तस्य अन्त्यः अल् अन्ते अस्ति यस्य तस्यालन्तस्य समुदायस्यादेशो भवति।”** इति।

परिभाषायामस्यां तदन्तविधौ एवमर्थस्य स्वीकारे अन्त्यस्य अलः स्थाने आदेशो न भूत्वा अलन्तस्य समुदायस्य स्थाने प्राप्नोतीति दोषः। तथाहि दिव् स् इति स्थिते **“अलोऽन्त्यस्य” (१।१।५२)** इति परिभाषया परिष्कृतेन **“दिव औत्” (७।१।८४)** इति सूत्रेण अन्त्यस्य अलः वकारस्य स्थाने औत् न भवति अपि तु अलन्तस्य समुदायस्य दिव् इत्यस्य स्थाने औकारादेशः प्राप्नोति। तेन प्रक्रियाकार्ये औः इति अनिष्टं रूपं स्यात्। एवमेव पन्थाः सः इत्यत्रापि दोषः प्रसज्यते। तथाह्युक्तं महाभाष्ये – **“अल्विधिश्च न प्रकल्पेत – द्यौः पन्थाः सः इति।”**[14] इति।

२.२.२) न्यासान्तरपक्षः

एवं सम्प्राप्तानां दोषाणां निवारणाय **“येन विधिस्तदन्तस्य”** इति सूत्रस्य स्थाने न्यासान्तरं प्रोक्तं **“प्रकृते तदन्तविधिः”**[15] इति।

**“प्रकृते तदन्तविधिः”** इति न्यासस्यार्थो भवति – **“प्रकृते प्रस्तुते विषये तदन्तविधिः स्यात्।”** इति। प्रस्तुतिर्नाम बुद्धौ सन्निधिः।[16] यत्र तदन्तविधिरभीष्टा तस्मिन् प्रस्तुते विषये तदन्तविधिर्भवति। प्रस्तुतं नाम पूर्वत्र दृष्टमनुवर्तमानं च इति नागेशः।[17]

प्रस्तावस्तु त्रिविधो भवति – साक्षाद् आक्षेपाद् अधिकाराच्च।[18] तत्र साक्षात्प्रस्तावस्योदाहरणं भवति **“ईदूदेद्द्विवचनं प्रगृह्यम्” (१।१।११)** इति सूत्रे। अत्र द्विवचनस्य तदन्तविधिभाजो विशेष्यस्य साक्षान्निर्देशाद् ईदूदेदित्यत्र तदन्तविधिः। तेन सूत्रार्थः समायाति – **“ईदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञं स्यात्।”**[19] इति।

क्वचिद् अधिकारात् तदन्तविधिर्भवति। तत्रोदाहरणं यथा **“एरच्” (३।३।५६)** इति सूत्रे **“धातोः” (३।१।९१)** इत्यधिकारस्यानुवर्तनाद् एः इत्यत्र तदन्तविधिः। तेन **“इवर्णान्ताद् धातोः अच् स्यात्।”**[20] इति सूत्रार्थः समायाति।

क्वचिदाक्षेपात् तदन्तविधिर्भवति यथा **“इको झल्” (१।२।९)** इति सूत्रे। **“रुदविदमुषग्रहिस्वपिप्रच्छः संश्च” (१।२।८)** इति सूत्रात् सन् इत्यनुवर्तते। सनो धातुत एव विधानात् सना धातोराक्षेपो भवति। ततः धातोरित्यस्य विशेषणत्वात् इकः इत्यस्य तदन्तविधिर्भवति। तेन सूत्रार्थः समायाति इगन्ताद् धातोः झलादिः सन् कित् भवतीति। अत एव कौमुद्यामुक्तम् – **“इगन्ताद् झलादिः सन् कित्स्यात्।”**[21] इति।

२.२.३) सूत्रपक्षे सम्प्राप्तानां दोषाणां निरासः

एवं न्यासान्तरे स्वीकृते ब्रह्मेन्द्रः ब्रह्मोदकम् इत्यादौ लक्ष्ये प्रवृत्ते **“आद् गुणः” (६।१।८७)** इति सूत्रे अनभीष्टत्वात्

---

14 तत्रैव, पृ० ५६८

15 तत्रैव, पृ० ५६८

16 महाभाष्यप्रदीपव्याख्यानानि, ख० ३, पृ० २५० (विवरणम्)

17 प्रकृतं नाम पूर्वत्र दृष्टमनुवर्तमानं च – महाभाष्यप्रदीपव्याख्यानानि, ख० १, पृ० ५६८ (उद्योतः)

18 प्रस्तावश्च क्वचित् साक्षात् तदन्तविधिभाजो निर्देशात्, यथा - ईदूदेद्द्विवचनं प्रगृह्यमित्यत्र द्विवचनस्य। क्वचिदधिकाराद् यथा- एरजित्यत्र धातोः। क्वचिदाक्षेपाद् यथा - इको झलित्यत्र सना धातोः। - तत्रैव, पृ० ५६८ (प्रदीपः)

19 वैयाकरणसिद्धान्तकौमुदी, ख० १, पृ० ११२

20 वैयाकरणसिद्धान्तकौमुदी, ख० ४, पृ० ८

21 वैयाकरणसिद्धान्तकौमुदी, ख० ३, पृ० ४५०

तदन्तविध्यभावाद् अनिष्टरूपाभावान्नास्ति दोषः। एवमेव स्योनः स्योना इत्यादौ **"इको यणचि" (६।१।७७)** इति सूत्रे तदन्तविधेः अप्रस्तुतत्वात् प्राप्तिर्नास्ति। तेन नास्ति अन्तरङ्गबहिरङ्गव्यवस्थाभङ्गापत्तिः। द्यौः पन्थाः सः इत्यादौ प्रवृत्ते **"अलोऽन्त्यस्य" (१।१।५२)** इति सूत्रे अप्रस्तुतत्वात् तदन्तिवधेर्नास्ति प्राप्तिः।

एवं दोषाणां निरासनाद् **"येन विधिस्तदन्तस्य" (१।१।७२)** इति सूत्रस्य स्थाने **"प्रकृते तदन्तविधिः"** इति न्यासान्तरमेव समीचीनम्।

**२.३) सूत्रपक्षविचारः**

वस्तुतस्तु **"येन विधिस्तदन्तस्य" (१।१।७२)** इति सूत्रस्य स्थाने **"प्रकृते तदन्तविधिः"** इति न्यासान्तरस्य नास्ति प्रयोजनम्। सूत्रेणैव सर्वं लक्ष्यं सिध्यति। अस्मिन् सूत्रे येनेति करणे तृतीया न कर्तरि **"कर्तृकर्मणोः कृति" (२।३।६५)** इति षष्ठीप्रसङ्गात्। करणं नाम विशेषणम्। विधिशब्दः कर्मसाधनः। विधीयते इत्यर्थे विपूर्वकाद् धाधातोः **"उपसर्गे घोः किः" (३।३।९२)** इति सूत्रेण कर्मणि किप्रत्यये विधिशब्दो निष्पन्नः।

लोके हि दृश्यते अन्येनान्यस्य विधानं भवति। यथा यज्ञदत्तः मृत्तिकानिर्मितपात्रैः ओदनेन देवदत्तस्य भोजनं विदधाति। एवमेव शत्रुं प्रति संग्रामं राजा हस्त्यश्वरथपदातिभिः सम्पादयति। एवमेव **"अचो यत्" (३।१।९७)** इत्यत्र सूत्रकारः पाणिनिः अचा धातोः यद् विदधाति। एवञ्च अच् करणं भवति। करणं हि व्यापारवद् भवति। व्यापारश्चात्र इतरव्यावृत्तिरूपः। अच् इति पदं धातोर्विशेषणम्। एवं येन करणेन विधीयते तत् तदन्तस्य बोधकं भवति। **"अचो यत्" (३।१।९७)** इत्यत्र अचा धातोः यत्प्रत्ययो विधीयते, अतः अच्शब्दः अजन्तस्य बोधकः। एवमस्य सूत्रस्यार्थो भवति – **"अजन्ताद् धातोः यत् स्यात्।"**[22] इति। एवं तदन्तसूत्रार्थः समायाति – **"येन करणेन कार्यं विधीयते स शब्दस्तदन्तस्य संज्ञा।"**[23] इति। एतत्सूत्रपक्षे महाभाष्ये वर्णितं –

"न वक्तव्यम्। येन इति करणे एषा तृतीया। अन्येन चान्यस्य विधिर्भवति। तद्यथा – देवदत्तस्य समाशं शरावैरोदनेन च यज्ञदत्तः प्रतिविधत्ते। तथा – संग्रामं हस्त्यश्वरथपदातिभिः। एवमिहाप्यचा धातोर्यतं विधत्ते। अकारेण प्रातिपदिकस्य इञं विधत्ते।"[24] **इति।**

एवं यत्र विशेषणं स्वविशेष्यं विशेषयति तत्रैव विशेषणस्य तदन्तविधेः सूत्रेणानेन विधानाद् **"इको यणचि" (६।१।७७), "एचोऽयवायावः" (६।१।७८), "अलोऽन्त्यस्य" (१।१।५२)** इत्यादिषु सूत्रेषु विशेषणेन विशेष्यस्य विशेषितत्वाभावात् तदन्तविध्यापत्तिरिति दोषो नास्ति।

२.३.१) सूत्रपक्षे दोषनिरासः

**"येन विधिस्तदन्तस्य" (१।१।७२)** इति सूत्रस्य स्वीकारे ग्रहणोपाधीनां तदन्तोपाधिताप्राप्तिः, कृष्णं परमश्रित इत्यादौ अतिव्याप्तिः इत्यादयो दोषाः समुद्भवन्ति इति आक्षेपकाः। तेषां च समाधानमधः प्रदीयते –

**क) ग्रहणोपाधीनां तदन्तोपाधिदोषनिरासः – "येन विधिस्तदन्तस्य" (१।१।७२)** इति सूत्रस्य स्वीकारे तु ग्रहणोपाधीनां तदन्तोपाधिप्रसङ्ग इति दोषः समुपस्थापितः। गृह्यते उच्चार्यते इति ग्रहणम्। अर्थाद् ग्रहणं नाम गृह्यमाणः विधिसूत्रे उच्चार्यमाणः। ग्रहणस्य उपाधिर्नाम विशेषणांशः ग्रहणोपाधिः।[25] यदि येन विधानं भवति तत्

22 वैयाकरणसिद्धान्तकौमुदी, ख० ४, पृ० ८

23 व्याकरणमहाभाष्यम्, ख० १, पृ० ५६८ (प्रदीपः)

24 तत्रैव, पृ० ५६८

25 गृह्यते अनेनेति ग्रहणं विशेषणम्, तस्योपाधिः विशेषणं ग्रहणोपाधिः - महाभाष्यप्रदीपव्याख्यानानि, ख० ३, पृ० २५२

तदन्तस्य बोधकमित्यर्थः स्वीक्रियते तर्हि गृह्यमाणस्य विशेषणांशस्य तदन्तस्य विशेषणांशत्वप्राप्तिप्रसङ्गः स्यात्।[26][27] तथाहि दोषप्रदर्शकं वार्तिकं – **"येन विधिस्तदन्तस्येति चेद् ग्रहणोपाधीनां तदन्तोपाधिप्रसङ्गः"**[28] इति।

ग्रहणोपाधीनां तदन्तोपाधिप्रसङ्गे सति बहुत्र दोषाः सम्भवन्ति। तत्र यथा –

**१) प्रथमदोषः** – सूत्रे उतः इति गृह्यमाणस्य असंयोगपूर्वादिति पदं विशेषणम्। तदन्तविधिस्वीकाराद् गृह्यमाणान्तस्य उकारान्तस्य विशेषणं स्यात्। तेन **"असंयोगपूर्वपदं यद् उकारान्तं तस्मात् परस्य हेः लुक् स्यात्।"** इति सूत्रार्थः भवति।

एवं सूत्रार्थे स्वीकृते अक्ष्णुहि तक्ष्णुहि इत्यादौ अक्ष् नु हि इति तक्ष् नु हि इति च स्थिते क्ष् इति संयोगपूर्वत्वाद् नु इत्युकारान्तस्य असंयोगपूर्वपदत्वाभावात् ततः परस्य हेर्लुक् न भवति। किन्तु आप्नुहि इत्यादौ आप् नु हि इति स्थिते नु इत्यस्मात्पूर्वं संयोगस्यासत्त्वाद् नु इत्यस्य असंयोगपूर्वपदत्वात् तस्मात् परस्य हेः लुक्प्राप्तिरिति दोषः समुद्भवति।[29]

**२) द्वितीयदोषः** – तदन्तविधिस्वीकाराद् **"उदोष्ठ्यपूर्वस्य" (७।१।१०२)** इत्यत्र ऋकारस्य विशेषणम् ओष्ठ्यपूर्वस्येति ऋकारान्तस्य विशेषणं स्यात्। तेन **"अङ्गावयवौष्ठ्यपूर्वस्य ऋकारान्तस्याङ्गस्य उत् स्यात्।"** इति सूत्रार्थः भवति।

तेन संकीर्णम् संगीर्णम् इत्यादौ सम् कॄ क्त इति सम् गॄ क्त इति च स्थिते ऋकारान्तस्य कॄ इत्यङ्गस्य गॄ इत्यङ्गस्य च म् इति ओष्ठ्यवर्णपूर्वत्वाद् उत्त्वं प्राप्नोति इत्यनिष्टे स्थले प्राप्तिरूपा अतिव्याप्तिः।

**२) तृतीयदोषः** – परन्तु निपूर्ताः पिण्डा इत्यत्र नि पॄ क्त इति स्थिते ऋकारान्तात् पॄ इत्यस्मात्पूर्वम् ओष्ठ्यवर्णस्याभावाद् उत्त्वं न प्राप्नोतीति इष्टे स्थले अप्राप्तिरूपा अव्याप्तिः।[30]

एवं **"येन विधिस्तदन्तस्य" (१।१।७२)** इति यथान्यासपक्षे दोषाः समुद्भवन्ति। तेषां दोषाणां समाधानं प्रोक्तं वार्तिकेन महाभाष्ये – **"सिद्धं तु विशेषणविशेष्ययोः यथेष्टत्वात्"**[31] इति।

विशेषणविशेष्यभावस्य वक्तुरनुसारेण यथेष्टत्वाद् यथान्यासपक्षे नास्ति दोषः। प्रोक्तदोषत्रयस्य समाधानं तावत् –

**१) प्रथमदोषसमाधानम्** – एवञ्च **"उतश्च प्रत्ययादसंयोगपूर्वात्" (६।४।१०६)** इति सूत्रे असंयोगपूर्वपदम् उकारस्यैव विशेषणत्वेनाभिमतं न तु उकारान्तस्य। तेन **"असंयोगपूर्वो य उकारस्तदन्तात् प्रत्ययात् परस्य हेर्लुक् स्यात्।"** इति सूत्रार्थः। तेन अक्ष्णुहि तक्ष्णुहि इत्यत्रेव आप्नुहि शक्नुहीत्यादावपि प्न् क्न् इति संयोगपूर्वत्वात् न हेर्लुक्।[32]

**२) द्वितीयदोषसमाधानम्** – एवमेव **"उदोष्ठ्यपूर्वस्य" (७।१।१०२)** इति सूत्रे ओष्ठ्यपूर्वपदम् ऋकारस्य विशेषणं न तदन्तस्य। तेन संकीर्णम् संगीर्णम् इत्यादौ सम् कॄ क्त इत्यत्र सम् गॄ क्त इत्यत्र च ऋकारस्य ओष्ठ्यपूर्वत्वाभावात् उत्त्वं न भवतीति अनिष्टस्थले प्राप्तिरूपातिव्याप्तिदोषो निरस्तः।

**३) तृतीयदोषसमाधानम्** – एवमेव निपूर्ताः पिण्डा इत्यत्र नि पॄ क्त इति स्थिते ऋकारस्य प् इत्योष्ठ्यवर्णपूर्वकत्वात्

26 येन विधिस्तदन्तस्येति चेद्ग्रहणोपाधीनां तदन्तोपाधिताप्रसङ्गः। ग्रहणोपाधयस्ते तदन्तोपाधयः स्युः। व्याकरणमहाभाष्यम्, ख० १, पृ० ५६८

27 गृह्यते उच्चार्यते इति ग्रहणं तस्य ये उपाधय इष्यन्ते ते तदन्तस्य संज्ञिनः प्राप्नुवन्ति - तत्रैव, पृ० ५६८ (प्रदीपः)

28 तत्रैव, पृ० ५६८ (आक्षेपवार्तिकम्)

29 "उतश्च प्रत्ययादसंयोगपूर्वाद्" इत्यसंयोगपूर्वग्रहणमुकारान्तविशेषणं स्यात्। तत्र को दोषः? असंयोगपूर्वग्रहणेन इहैव पर्युदासः स्यात् - अक्ष्णुहि तक्ष्णुहीति। इह न स्याद् - आप्नुहि शक्नुहीति। - तत्रैव, पृ० ५६८

30 तथा "उदोष्ठ्यपूर्वस्य" इति ओष्ठ्यपूर्वग्रहणमृकारान्तविशेषणं स्यात्। तत्र को दोषः? ओष्ठ्यपूर्वग्रहणेन इहैव प्रसज्येत - संकीर्णम्, संगीर्णमिति। इह च न स्याद् - निपूर्ताः पिण्डा इति। - तत्रैव, पृ० ५६९

31 तत्रैव, पृ० ५६९ (समाधानवार्तिकम्)

32 "उतश्च प्रत्ययादसंयोगपूर्वाद्" इति नासंयोगपूर्वग्रहणेन उकारान्तं विशेष्यते। किं तर्हि? उकार एव विशेष्यते - उकारो योऽसंयोगपूर्वस्तदन्तात् प्रत्ययादिति। - तत्रैव, पृ० ५६९

तदन्तस्य पॄ इत्यस्य उत्त्वं सम्भवतीति इष्टे स्थले अप्राप्तिरूपाव्याप्तिदोषो निरस्तः।[33]

एवं नास्ति यथान्यासपक्षे दोषः। अतः **"येन विधिस्तदन्तस्य" (१।१।७२)** इति सूत्रमेव साधु **"प्रकृते तदन्तविधिः"** इति न्यासान्तरस्य नास्त्यपेक्षा।

**ख) अतिव्याप्तिदोषनिरासः** – परन्तु सूत्रस्यास्य स्वीकारे केषुचिदनिष्टस्थलेषु तदन्तविधिः प्राप्नोति। यथा – **"द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः" (२।१।२४)** इति सूत्रे श्रितादौ तदन्तविधिप्राप्तिः। तेन द्वितीयान्तं श्रिताद्यन्तैः सह समासं प्राप्नोति। तेन कृष्णं परमश्रितः इत्यत्र समासप्राप्तिप्रसङ्ग इति दोषः।

एवमेव **"नडादिभ्यः फक्" (४।१।९९)** इति सूत्रे तदन्तविधौ नडाद्यन्तेभ्यः अपि फकः प्राप्तिप्रसङ्गः। तेन सूत्रनडस्यापत्यमिति विग्रहे नडान्तात् सूत्रनडशब्दात् फकि सौत्रनडायन इत्यनिष्टरूपप्रसङ्ग इति दोषः।

एतद्दोषनिराकरणाय तदन्तसंज्ञाप्रतिषेधकारकं वार्तिकं प्रोक्तं कात्यायनेन – **"समासप्रत्ययविधौ प्रतिषेधः"**[34] इति।

समासविधौ प्रत्ययवधौ च तदन्तस्य प्रतिषेधो वाच्य इति वार्तिकार्थः।

तेन **"द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः" (२।१।२४)** इति समासविधौ तदन्तनिषेधात् कष्टं श्रित इति विग्रहे एव द्वितीयातत्पुरुषो भवति कष्टं परमश्रित इति विग्रहे द्वितीयातत्पुरुषस्य प्राप्तिर्न भवति।

एवमेव **"नडादिभ्यः फक्" (४।१।९९)** इति प्रत्ययविधौ तदन्तनिषेधात् नडस्यापत्यमिति विग्रहे फकि नाडायन इति रूपं सिध्यति किन्तु सूत्रनडस्यापत्यमिति विग्रहे फक् न भवति।

तथाह्युक्तं महाभाष्ये –

"समासविधौ प्रत्ययविधौ च प्रतिषेधो वक्तव्यः। समासविधौ तावत् – द्वितीया श्रितादिभिः समस्यते – कष्टश्रितः नरकश्रितः। कष्टं परमश्रित इत्यत्र मा भूत्। प्रत्ययविधौ – "नडादिभ्यः फक्" नडस्यापत्यं नाडायनः। इह न भवति – सूत्रनडस्यापत्यं सौत्रनाडिः।"[35] **इति।**

**"समासप्रत्यविधौ प्रतिषेधः"** इति स्वीकारे प्रत्ययविधौ तदन्तविधेर्निषेधाद् भवन्तमतिक्रान्ता इति विग्रहे **"अत्यादयः क्रान्ताद्यर्थे द्वितीयया"** इति वार्तिकेन निष्पन्नाद् अतिभवत् इति शब्दाद् **"उगितश्च" (६।३।४५)** इति ङीप् न भवति। तेन अतिभवती इतीष्टं रूपं न सिध्यतीति दोषः।

एवमेव प्रत्ययविधौ तदन्तविधेर्निषेधात् **"अत इञ्" (४।१।९५)** इत्यनेन दक्षस्यापत्यमित्यर्थे दक्षशब्दाद् इञ् न प्राप्नोति। तेन दाक्षिरिति इष्टं रूपं न सिध्यतीति दोषः।

एतद्दोषद्वयनिरासाय वार्तिकं प्रोक्तम् – **"उगिद्वर्णग्रहणवर्जम्"**[36] इति।

वर्जयतेर्णमुलि वर्जमिति निष्पन्नम्। उगिच्च वर्णश्च उगिद्वर्णौ इतीतरेतरद्वन्द्वः। उगिद्वर्णयोर्ग्रहणम् उगिद्वर्णग्रहणमिति षष्ठीतत्पुरुषः। उगिद्ग्रहणं वर्णग्रहणं च वर्जयित्वा **"समासप्रत्ययविधौ प्रतिषेधः"** इत्युक्तः प्रतिषेधो भवतीति वार्तिकस्यार्थः।

एवं वार्तिकस्वीकाराद् अतिभवद् इत्युगिदन्ताद् प्रातिपदिकात् ङीपि अतिभवतीति रूपं सिध्यति। एवमेव दक्षस्यापत्यमिति विग्रहे अकारान्ताद् दक्षप्रातिपदिकाद् इञ् सिध्यतीति सर्वत्रानिष्टापत्तिपरिहारः।

33 तथा "उदोष्ठ्यपूर्वस्य" इति नौष्ठ्यपूर्वग्रहणेन ऋकारान्तं विशेष्यते। किं तर्हि? ऋकार एव विशेष्यते - ऋकारो य ओष्ठ्यपूर्वस्तदन्तस्य धातोरिति। - तत्रैव, पृ० ५६९

34 तत्रैव, पृ० ५७० (आक्षेपवार्तिकम्)

35 तत्रैव, पृ० ५७०

36 तत्रैव, पृ० ५७० (आक्षेपपरिशेषवार्तिकम्)

तथाह्युक्तं वार्तिकस्यास्य व्याख्यानवेलायां फणिमणिना महाभाष्ये –

“उगिद्ग्रहणं वर्णग्रहणं च वर्जयित्वा। उगिद्ग्रहणम् – “उगितश्च” भवती अतिभवती, महती, अतिमहती। वर्णग्रहणम् – “अत इञ्” दाक्षिः प्लाक्षिः।”[37] **इति।**

२.३.२) सूत्रप्रयोजनम्

**“येन विधिस्तदन्तस्य” (१।१।७२)** इत्यस्य सूत्रस्य स्वीकारे सम्प्राप्तानां दोषाणां परिहाराय वार्तिकद्वयं निर्मितम् **“समासप्रत्ययविधौ प्रतिषेधः”** इति **“उगिद्वर्णग्रहणवर्जम्”** इति च। एवं दोषदुष्टत्वादस्य सूत्रस्य स्वीकारो मास्तु इति न वक्तुं शक्यते। एतत् सूत्रं हि बहुप्रयोजनसाधकम्। कान्यस्य सूत्रस्य प्रयोजनानीति अधस्तात् प्रतिपाद्यन्ते –

**क) “प्रयोजनं सर्वनामाव्ययसंज्ञायाम्”**[38] – सर्वनामसंज्ञायामव्ययसंज्ञायाञ्च तदन्तविधेरस्ति प्रयोजनम्। तेन सर्वशब्दस्य इव **“सर्वादीनि सर्वनामानि” (१।१।२७)** इत्यनेन सर्वान्तस्य परमसर्वशब्दस्य सर्वनामसंज्ञायां जसि **“जसः शी” (७।१।१७)** इति सूत्रेण शी इत्यादेशे प्रक्रियाकार्ये परमसर्वे इति सिध्यति। एवमेव स्वराद्यन्तानां तदन्तविधौ उच्चैः नीचैः इतिवत् परमोच्चैः परमनीचैः इत्यस्य **“स्वरादिनिपातमव्ययम्” (१।१।३७)** इति सूत्रेणाव्ययसंज्ञा सिध्यति।

**ख) “उपपदविधौ भयाढ्यादिग्रहणं प्रयोजनम्”**[39] – भयाढ्याद्युपपदवत्सु कृदन्तेषु तदन्तविधेरस्ति प्रयोजनम्। तेन **“मेघर्तिभयेषु कृञः” (३।२।४३)** इति सूत्रेण भयोपपदात् कृधातोः खचि भयङ्कर इतिवद् भयान्ताद् अभयोपपदात् कृधातोः खचि अभयङ्कर इति निष्पद्यते।

**ग) “ङीब्विधावुगिद्ग्रहणं प्रयोजनम्”**[40] – **“उगितश्च” (६।३।४५)** इति भवतु इत्युगिदि इव अतिभवत् इत्यत्र ङीपो विधानाय तदन्तविधेरस्ति प्रयोजनम्। तेन भवती इव अतिभवती इत्यादिकं सिध्यति।

**घ) “प्रतिषेधे स्वस्रादिग्रहणं प्रयोजनम्”**[41] – **“न षट्स्वस्रादिभ्यः” (४।१।१०)** इति सूत्रेण यः ङीब्निषेधः स स्वसृशब्दाद् यथा तथैव स्वस्रन्तात् परमस्वसृशब्दाद् यथा स्यात्तदर्थं तदन्तविधेरस्ति प्रयोजनम्।

**ङ) “अपरिमाणबिस्ताचितग्रहणञ्च प्रतिषेधे प्रयोजनम्”**[42] – **“अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि” (४।१।२२)** इत्यनेन द्विबिस्ता द्व्याचिता इत्यादौ इव द्विबिस्ताद्यन्तेषु द्विपरमबिस्ता द्विपरमाचिता इत्यादौ ङीब्निषेधाय तदन्तग्रहणं कार्यम्।

**च) “दिति”**[43] – **“दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः” (४।१।८५)** इति सूत्रेण ण्यविधाने तदन्तविधिस्वीकाराद् दितिशब्दाद् इव दित्यन्ताद् अदितिशब्दादपि ण्यो भवति।तेन अदितिशब्दस्य सूत्रे ग्रहणं न कार्यम्। तेन दितिग्रहणेन तदन्तविधौ दैत्यः इव आदित्यः इति रूपं सिध्यति।

**छ) “रोण्या अण्”**[44] – यथा रोण्या अदूरभव इत्यर्थे **“रोणी” (४।२।७८)** इति सूत्रेण रोणीशब्दाद् अण् विधीयते

37 तत्रैव, पृ० ५७०
38 तत्रैव, पृ० ५७३ (प्रयोजने भाष्यवार्तिकम्)
39 तत्रैव, पृ० ५७३ (प्रयोजने भाष्यवार्तिकम्)
40 तत्रैव, पृ० ५७३ (प्रयोजने भाष्यवार्तिकम्)
41 तत्रैव, पृ० ५७३ (प्रयोजने भाष्यवार्तिकम्)
42 तत्रैव, पृ० ५७३ (प्रयोजने भाष्यवार्तिकम्)
43 तत्रैव, पृ० ५७३ (प्रयोजने भाष्यवार्तिकम्)
44 तत्रैव, पृ० ५७३ (प्रयोजने भाष्यवार्तिकम्)

तथैव अजकरोण्या अदूरभवः इत्यर्थे रोण्यन्तताद् अणो विधानाय तदन्तविधिरपेक्षते। तेन रौण इव आजकरौण इति रूपं सिध्यति।

ज) **"रथसीताहलेभ्यो यद्विधौ प्रयोजनम्"**[45] – रथसीताहलशब्देभ्यः यथाक्रमं **"तद्वहति रथयुगप्रासङ्गम्" (४।४।७६)** इति, **"नौवयोधर्मविषमूलमूलसीतातुलाभ्य-स्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितेषु" (४।४।९१)** इति **"मतजनहलात् करणजल्पकर्षेषु" (४।४।९७)** इति सूत्रत्रयेण यद्विधीयते। यथा रथसीताहलशब्देभ्यो यत् सिध्यति तथैव रथसीताहलशब्दान्तेभ्यो यतो विधानाय तदन्तविधिरपेक्षते। तेन च रथ्यः सीत्यम् हल्यमित्यादिवत् परमरथ्यः, परमसीत्यम्, परमहल्यमत्यादि रूपं सिध्यति।

झ) **"सुसर्वार्धदिक्छब्देभ्यो जनपदस्य प्रयोजनम्"**[46] – यथा पञ्चालशब्दाद् **"अवृद्धादपि बहुवचनविषयात्" (४।२।१२५)** इति सूत्रेण वुञि प्रक्रियाकार्ये पाञ्चालक इति सिध्यति तथैव सु-सर्व-अर्ध-दिक्शब्देभ्यः परं जनपदवाचिभ्यः शब्देभ्यः प्रत्ययविधानाय तदन्तविधिरपेक्षते। तेन सुपाञ्चालक इत्यादि सिध्यति।

ञ) **"ऋतोर्वृद्धिमद्विधावयवानां प्रयोजनम्"**[47] – तदन्तविधेः स्वीकारात् शरदि भवमित्यर्थे **"सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्" (४।३।१६)** इति सूत्रेणाणि यथा **"अवयवादृतोः" (७।३।११)** इत्यनेनोत्तरपदवृद्धिर्भवति तथैव ऋत्वन्ताद् शरदः पूर्वोऽवयवः इति विग्रहे निष्पन्नात् पूर्वशरद् इत्यस्मात् शब्दाद् अणि उत्तरपदवृद्धौ पूर्वशारदमिति निष्पद्यते।

ट) **"ठञ्विधौ संख्यायाः प्रयोजनम्"**[48] – ठञ्विधौ संख्यावाचिशब्दानां तदन्तविधौ षष्टिः परिमाणमस्य इत्यर्थे **"प्राग्वतेष्ठञ्" (५।१।१८)** इति सूत्रेण ठञा षाष्टिकमितिवत् षष्टिशब्दान्ताद् द्विषष्टिशब्दात् ठञा द्विषाष्टिकमिति निष्पद्यते।

ठ) **"धर्मान्नञः प्रयोजनम्"**[49]– धर्मं चरतीति विग्रहे **"धर्मं चरति" (४।४।४१)** इति सूत्रेण ठकि धार्मिकशब्दो निष्पन्नः। नञः परं धर्मशब्दात् ठको विधानाय तदन्तस्यापेक्षास्ति। तेन अधर्मं चरति इति विग्रहे धर्मान्ताद् अधर्मशब्दात् ठकि अधार्मिकः इति शब्दो निष्पन्नः। **"अधर्माच्चेति वक्तव्यम्"** इति वार्तिकस्य नास्त्यपेक्षा।

### २.४) न्यासान्तरसमीक्षणम्

**"येन विधिस्तदन्तस्य" (१।१।७२)** इति सूत्रस्य स्वीकाराद् **"इको यणचि" (६।१।७७), "एचोऽयवायावः" (६।१।७८), "अलोऽन्त्यस्य" (१।१।५२)** इत्यादिषु सूत्रेषु विशेषणस्य तदन्तविधिरिति दोषस्य स्वीकाराद् एव सूत्रस्य स्थाने "प्रकृते तदन्तविधिः" इति न्यासान्तरं प्रकल्पितम्। ततो न्यासान्तरेण सिद्धस्य दोषनिवारणस्य सूत्रेणैव सिद्धत्वात् न्यासान्तरं खण्डितम्। यतो हि सूत्रेणानेन विशेषणं यत्र विशेष्यं विशेषयति तत्रैव तदन्तविधेः स्वीकाराद् **"इको यणचि" (६।१।७७)** इत्यादिषु स्थलेषु नास्ति दोषः।

एतद् हि न्यासान्तरं स्वप्रत्याख्यानव्याख्यानेन सूत्रस्य अतिव्याप्त्यादिदोषराहित्यं सम्पादयति। एवं सूत्रपक्षस्य यथार्थत्वप्रतिपादनमेवात्र न्यासान्तरस्य लक्ष्यम्। एवं बहुलक्ष्यसाधकत्वात् सूत्रदोषपरिहारवार्तिकद्वयेन **"समासप्रत्ययविधौ प्रतिषेधः" "उगिद्वर्णग्रहणवर्जम्"** इति वार्तिकद्वयेन सहितस्य **"येन विधिस्तदन्तस्य" (१।१।७२)** इति सूत्रस्यास्त्यपेक्षा।

45 तत्रैव, पृ० ५७५ (प्रयोजने भाष्यवार्तिकम्)
46 तत्रैव, पृ० ५७५ (प्रयोजने भाष्यवार्तिकम्)
47 तत्रैव, पृ० ५७५ (प्रयोजने भाष्यवार्तिकम्)
48 तत्रैव, पृ० ५७६ (प्रयोजने भाष्यवार्तिकम्)
49 तत्रैव, पृ० ५७६ (प्रयोजने भाष्यवार्तिकम्)

परन्तु **"येन विधिस्तदन्तस्य" (१।१।७२)** इति सूत्रस्य स्थाने **"प्रकृते तदन्तविधिः"** इति यत् न्यासान्तरं परिकल्पितं तत्र सूत्रभेददोषस्य महाभाष्ये अकल्पनात् तत् न्यासान्तरं लक्ष्यसाधकमेवेति भाति।

### ३) उपसंहारः

अस्मिन् प्रबन्धे **"येन विधिस्तदन्तस्य" (१।१।७२)** इति सूत्रस्य महाभाष्यदिशा न्यासान्तरसमीक्षणं मया प्रत्यपादि। तत्रादौ व्याकरणशास्त्रस्य किं प्रयोजनमिति प्रतिपाद्य सर्वेषु व्याकरणेषु लोकवेदोभयोपकारकत्वात् पाणिनीयव्याकरणं सर्वातिशायीति प्रतिपादितम्। ततः पाणिनीयव्याकरणस्य मूलभूते सूत्रग्रन्थे अष्टाध्यायीत्याख्ये प्रथमाध्यायस्य प्रथमपादस्य द्विसप्ततितमस्य सूत्रस्यास्य सूत्रार्थः वर्णितः। ततः सूत्रार्थं प्रतिपाद्य सूत्रस्यास्य दोषयुक्तत्वात् तस्य स्थाने महाभाष्ये **"प्रकृते तदन्तविधिः"** इति न्यासान्तरं परिकल्पितम्। न्यासान्तरार्थप्रकाशनद्वारा दोषनिरासः विहितः। ततः सूत्रपक्षे एव दोषराहित्यविधानेन सूत्रस्य च बहुलप्रयोजनव्याख्यानेन च सूत्रस्यैव स्वीकारो जातः। यद्यपि सूत्रभेददोषः अत्र नोपात्तः। अतः न्यासान्तरमपि लक्ष्यप्रतिपादकमेव प्रतीयते। तथापि सूत्रस्यादृष्टप्रयोजनकत्वात् सूत्रमेव वरमिति आशयः। एवं समासेन "येन विधिस्तदन्तस्य" इति सूत्रस्य न्यासान्तरसमीक्षणं प्रस्तुतम् इति शिवम्।

### परिशीलितग्रन्थावली


१) एम, एस, नरसिंहमाचार्यः, १९७६, *महाभाष्यप्रदीपव्याख्यानानि,* तृतीयखण्डः, फ्रेञ्च इनस्टिटिउट अफ पण्डिचेरी (French Institute of Pandichery), पण्डिचेरी।

२) नागेशभट्टः, संस्करणम् २०१३, *लघुशब्देन्दुशेखरः षट्टीकोपेतः,* पञ्चसन्ध्यन्तः प्रथमो भागः, सम्पादकः - प्रो० बालशास्त्री, चौखम्बा सुरभारती प्रकाशन, वाराणसी।

३) भट्टोजिदीक्षितः, २००४, *वैयाकरणसिद्धान्तकौमुदी बालमनोरमा-तत्त्वबोधिनीव्याख्योपेता* (१-भागः), संशोधकौ- गिरिधरशर्मा परमेश्वरानन्दशर्मा च, मोतीलाल बनारसीदास।

४) भट्टोजिदीक्षितः, २००४, *वैयाकरणसिद्धान्तकौमुदी बालमनोरमा-तत्त्वबोधिनीव्याख्योपेता* (३-भागः), संशोधकौ- गिरिधरशर्मा परमेश्वरानन्दशर्मा च, मोतीलाल बनारसीदास।

५) भट्टोजिदीक्षितः, २००४, *वैयाकरणसिद्धान्तकौमुदी बालमनोरमा-तत्त्वबोधिनीव्याख्योपेता* (४-भागः), संशोधकौ- गिरिधरशर्मा परमेश्वरानन्दशर्मा च, मोतीलाल बनारसीदास।

६) महर्षिः पतञ्जलिः, पुनर्मुद्रणम् २०१४, *व्याकरणमहाभाष्यम्,* प्रथमखण्डः, सम्पादकः - भार्गवशास्त्री जोशी, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली।

७) महर्षिः पतञ्जलिः, षष्ठं संस्करणम् २०१०, *व्याकरणमहाभाष्यं नवाह्निकम् (प्रदीपोद्योततत्त्वालोकोपेतम्)*, चौखम्बा प्रकाशनम्, वाराणसी।

८) महर्षिः पतञ्जलिः, पुनर्मुद्रणम् २०१३, *व्याकरणमहाभाष्यं सप्रदीपोद्योतभावबोधिनीहिन्दीव्याख्योपेतम्,* १-५ आह्निकानि, सम्पादकः - जयशङ्करलालत्रिपाठी, चौखम्बा कृष्णदास अकादमी, वाराणसी।

९) महर्षिः पतञ्जलिः, पुनर्मुद्रणम् २०१३, *व्याकरणमहाभाष्यं सप्रदीपोद्योतभावबोधिनीहिन्दीव्याख्योपेतम्,* ६-९ आह्निकानि, सम्पादकः - जयशङ्करलालत्रिपाठी, चौखम्बा कृष्णदास अकादमी, वाराणसी।

१०) महर्षिः पाणिनिः, २०१०, *अष्टाध्यायी,* सम्पादकः- गोपालशास्त्री, चौखम्बा-संस्कृत-संस्थानम्, वाराणसी।


Received on 02. 06. 2017 Accepted on 24. 07. 2017

# *संक्षेपशारीरके* आत्मस्वरूपावलोकनम्

देवाञ्जनदासः*

**सारसंक्षेपः**

*अद्वैतवेदान्ते प्रधानतया प्रस्थानद्वयमस्ति— विवरणप्रस्थानं भामतीप्रस्थानं चेति। आत्मस्वरूपावलोकनविषये उभयोर्मध्ये सादृश्यं परि लक्ष्यते। विवरणप्रस्थानस्य तत्त्वानुसारेण ब्रह्म एव स्वप्रकाशं, न तु माया। विशिष्टस्य स्वप्रकाशत्वे विशेषणस्यापि तत्प्रसङ्गादित्यर्थेन 'मायापि स्याद् ब्रह्मवत् स्वप्रकाशा'(सं. शा. २।१४४) इत्युप लभ्यते। ब्रह्मण एव स्वप्रकाशत्वं मायायास्तु तद्वेद्यतेति। अनुभवविरोधान्माया न ब्रह्मवदिति सिद्धान्तः।*

**विधिवाददृष्ट्या ब्रह्मणः स्वप्रकाशत्वस्थापनम्—**

ननु वेदान्तेष्वपि 'आत्मा वा अरे द्रष्टव्यः' (बृह. उ. २।४।५), 'सोऽन्वेष्टव्यः, स विजिज्ञासितव्यः' (छा. उ. ८।७।१), 'तद्विजिज्ञासस्व' (तै. उ. ३।१) इत्येवमादिषु विधयः श्रूयन्ते। वस्तुतो न केवलं विधावेव तव्यप्रत्ययो विहितो, येन तच्छ्रवणबलाद् वेदान्तेषु विध्यभ्युपगमः। किं तु 'अर्हे कृत्यतृचश्च' (पा. ३।३।१६९) इति सूत्रयतः पाणिनेराचार्यस्यार्हाद्यर्थे चापि कृत्यस्मरणम् अभिमतमिष्टमेव। लिङ्लोडादेश्च यथा बहुशः प्रार्थनादौ वृत्तिरिति पाणिनेः जैमिनेश्चार्यस्याभिमतं भवति।

**स्वप्रकाशत्वनिर्णये शाब्दापरोक्षवादः—**

सर्वज्ञात्ममुनिना शाब्दापरोक्षवादः स्वीक्रियते। वेदान्तवाक्येनैव स्वप्रकाशाद्वितीय-सच्चिदानन्दरूपस्य ब्रह्मणः अनुभूतिः जायते, नान्यथा। ईदृशी महावाक्योत्था धीः मुक्तिफलं प्र यच्छति। अयं हि शाब्दापरोक्षवाद—इति संक्षेपपशारीपकग्रन्थस्य शेषांशे सिद्धान्तितः। किं तु पूर्वपक्षमतेन महावाक्यादेव परोक्षज्ञानं प्र भवति, श्रवण-मनन-निदिध्यासनानां प्रकर्षमेव मोक्षस्य कारणम्। अतो महावाक्यजन्यज्ञानं न अपरोक्षम्। *संक्षेपशारीरक*कारस्तु विवरणपन्थानुसारेण तन्मतं निराकृत्य शाब्दापरोक्षवादं प्रकटीकरोति स्वमतं द्रढीकरोति च। वेदान्तवाक्यजन्यज्ञाने अपरोक्षे सति महावाक्यात् आत्मसाक्षात्कारो भवतीति।

**_संक्षेपशारीरके_ आत्मस्वरूपावलोकनम्**

अद्वैतवेदान्ते *शांकरभाष्यस्य* परवर्तिनि काले सर्वज्ञात्ममुनेः *संक्षेपशारीरक*ग्रन्थः प्रणिधानयोग्यः। तस्य समयकालविषये परिचयविषये च बहूनि मतानि दृश्यन्ते।

१. किंवदन्त्यनुसारेण सर्वज्ञात्ममुनिः ताम्रपर्णीनदीतीरस्थस्य ब्रह्मदेशस्य निवासी। तस्य पितुर्नाम आसीद् वर्धन इति। शंकरभगवत्पादस्य दिग्विजयकाले सशिष्यवर्धनः पराजितोऽभवत्। अतो वर्धनस्य सप्तमवर्षीयः पुत्त्रो महादेवः शंकराचार्येण सह दिवसत्रयं तर्कालोचनां कृतवान्। किं तु चतुर्थे दिवसे शंकरभगवत्पादसमीपे आत्मनिवेदनं कृतम्। सन्न्यासं गृहीत्वा स सर्वज्ञात्ममुनि इति आख्यायितः; भाविकालस्य कामकोटिपीठाध्यक्षरूपेण च शंकराचार्यैः

* Assistant Professor in Sanskrit, Jhargram Raj College

मनोनीतः। सुरेश्वराचार्यस्य अधीने मुनिवरो नवजीवनम् आरब्धवान्। किं तु वृत्तान्तमिदं न ऐतिहासिक-तथ्यानुसारि। नामपुथिरीमहाभागमतेन—शृङ्गेरीमठस्य तालिकायां सर्वज्ञात्मपादो देवेश्वरपादरूपेण उल्लिखितः।[1]

२. सर्वज्ञात्ममुनेः आविर्भावकालो नवमख्रिस्टाब्द इति दाशगुप्तमहोदयेन आशुतोषशास्त्रिमहोदयेन च निर्धारितः।[2] नवमशतकस्य अन्तिमभागे तस्य आविर्भाव इति संकेतः मुनिमहाभागैः स्वयं ग्रन्थान्ते प्रदत्तम् —

श्रीदेवेश्वरपादपङ्कजरजःसम्पर्कपूताशयः
सर्वज्ञात्मगिराङ्कितो मुनिवरः *संक्षेपशारीरकम्*।
चक्रे सज्जनबुद्धिवर्धनमिदं राजन्यवंशे नृपे
श्रीमत्यक्षतशासने मनुकूलादित्ये भुवं शासति॥ इति ( सं. क्षे. ४।६२)

यस्य राज्ञः समये *संक्षेपशारीरकं* विरचितं , तस्य नाम किं श्रीमान् अथवा अक्षतशासनः अथवा मनुकुलादित्य इति संशयो जातः। प्रज्ञानानन्दसरस्वतीस्वामिपादैः श्रीमानिति गृहीतम्। श्रीशब्दस्यार्थो लक्ष्मीरिति। लक्ष्मीपतिरेव श्रीमान् अथवा नारायणः श्रीकृष्णो वा। अयं श्रीकृष्णो राष्ट्रकूटवंशीयः श्रीकृष्ण इति राजा। गोपीनाथकविराज-महामहोपाध्यायैः *ब्रह्मसूत्र*भूमिकायां लिखितम्—अयं राजा मानववंशीय आदित्य-चालुक्य इति भाण्डारकरमहाभागैः *Early History of Deccan* इति ग्रन्थे उल्लिखितम्। चालुक्यवंशे आदित्य इति नाम्ना राजत्रयमासीत्। तेषां प्राचीनतम आदित्य आसीत् परान्तकस्य पिता इति, यस्य राजत्वकालो दशमशतकस्य प्रथमार्धे एव। अतः सर्वज्ञात्ममुनेः अवस्थानकालो नवमशतकस्य प्रथमार्धे इति सिद्धान्तीकृतम्। वाचस्पतिमिश्रेभ्यः परमेव सर्वज्ञात्ममुनेः काल इति सर्वजनस्वीकृतम्। तस्यापरो नाम नित्यबोधाचार्य इति। स शृङ्गेरीमठस्य नवमः पीठाधीश आसीदिति शृङ्गेरीमठस्य प्राचीनलेखादुप लभ्यते। आलोच्ये श्लोके 'देवेश्वर'पदेन सुरेश्वराचार्योऽभिहितः मधुसूदनसरस्वती-रामतीर्थमहाभागैरुक्तमिति।[3]

३. *Encyclopedia of Indian Pholosophies* इति ग्रन्थे उल्लिखितं— भाण्डारकरमहाभागानुसारेण चोलसाम्राज्यस्य प्रथम आदित्यो द्वितीयो विक्रमादित्यश्च एको जन एव। वेक्ङटेश्वर-अइयारमतेन प्रथम आदित्यो द्वितीय-विक्रमादित्यस्य पूर्ववर्ती एव। गोपीनाथराओमहाभागैः उक्तं—*संक्षेपशारीरोक्तो* देवेश्वरो न तु शंकरभगवत्पादस्य शिष्यः, स एव देवानन्दस्य शिष्यः। तस्य परमगुरुरासीत् श्रेष्ठानन्द इति। सर्वज्ञात्ममुनिकृते प्रमाणलक्षणमिति ग्रन्थे अनेन क्रमेण गुरुपरंपरा प्रदर्शिता। हुजुर-ताम्रशासनं तिरुमूलिक्कुलम्लेख इति लेख्यप्रमाणानुसारेण मनुकुलादित्यस्य शासनकालः १०२७ ख्रिस्टाब्दः अथवा तत्पूर्ववर्ती एव। पुनरपि *प्रमाणलक्षणमि*ति ग्रन्थे इष्टसिद्धिप्रणेतुः विमुक्तात्मनस्य उल्लेख आसीत्। विमुक्तात्मनस्य समयकाल आसीत् १००० ख्रिस्टाब्दः। अतः सर्वज्ञात्ममुनेः समयकालः १०२७ ख्रिस्टाब्द इति।[4]

सर्वज्ञात्ममुनिः स्वयमेव *संक्षेपशारीरक*ग्रन्थं *शारीरकभाष्यस्य* प्रकरणरूपेण वर्णितवान्। उच्यते तत्र—

शक्तो गुरोश्चरणयोर्निकटे निवासा-
न्नारायणतश्च निरन्तरायः।
शारीरकार्थविषयावगतिप्रधानं
संक्षेपतः प्रकरणं करवाणि हृष्यन्॥ इति (सं. क्षे. १।१०)

*शारीरकभाष्यस्य* वार्त्तिकवद् ग्रन्थोऽयं श्लोकाकारेण विरचितः। अतो ग्रन्थोऽयं *शारीरकभाष्यस्य* प्रकरणवार्त्तिकम

1 Potter 2006, p.435.
2 Dasgupta 1975, pp. 111-112. Bhattacharya 1962, pp. 339-338.
3 Sarvajñātmamūnīśvara, *Saṃkṣepaśārīraka,* Ed. Swami Jagadananda, pp. XXVII-XXVIII.
4 K. H. Potter, *op. cit.*, pp. 435-436.

इत्युच्यते। ग्रन्थकारः स्वयं उक्तग्रन्थस्य प्रथम-द्वितीय-तृतीयाध्यानाम् अन्तिमपुष्पिकायां ग्रन्थोऽयं प्रकरणवार्त्तिकरूपेण उल्लिखितः—'इति देवेश्वर-पूज्यपादशिष्य-श्रीसर्वज्ञात्ममहामुनेः कृतौ *शारीरकप्रकरणे संक्षेपशारीरके* ...'। अत्र प्रकरणशब्दस्यार्थः प्रकरणवार्त्तिक इति। *शारीरकभाष्य*वत् ग्रन्थेऽस्मिन् चत्वारः अध्यायो दृश्यते—समन्वय-अविरोध-साधन-फलानीति। प्रथमाध्यायस्य त्रिषष्ट्यधिक-पञ्चशतश्लोकेन अद्वये ब्रह्मणि वेदान्तस्य समन्वयो, द्वितीयाध्यायस्य अष्टचत्वारिंशदधिक-द्विशतश्लोकेन अद्वैतवेदान्तमतेन सह भिन्नदार्शनिकमतानां द्वैतप्रतिपादकानां प्रत्यक्षादिप्रमाणां चाविरोधः, तृतीयाध्यायस्य पञ्चषष्ट्यधिक-त्रिशतश्लोकेन ब्रह्मज्ञानस्य साधनं, चतुर्थाध्यायस्य त्रिषष्टिश्लोकेन ब्रह्मविज्ञानस्य फलं तथा मुक्तिरिति व्याख्यातम्। *पञ्चपादिका*यां यथा चतुःसूत्रीभाष्यं नववर्णकेषु विभक्तं, तथा ग्रन्थस्यास्य प्रथमोऽध्यायो नववर्णकैः विभाज्यः। *पञ्चपादिका*नुसारेण अनुबन्धचतुष्टयेन सह अध्यासादिविचारपूर्णः *वेदान्तदर्शनस्य* प्रथमसूत्रस्य प्रथमो वर्णकः *संक्षेपशारीरकस्य* १।२० इति श्लोकतः १।५७ इति श्लोके उप लभ्यते। ब्रह्ममीमांसा न धर्ममीमांसान्तर्गतेति द्वितीयवर्णकस्य विषयः १।५६—१।५९ इति श्लोकत्रयेन प्रतिपादितः। कर्माधिकारी न एव ब्रह्मविचारस्य अधिकारीति तृतीयवर्णकस्य विषयः १।६५ श्लोके उपलब्धः। सामान्यरूपेण ज्ञातेऽपि विशेषेण विप्रतिपत्त्या ब्रह्मविचारस्य आवश्यकतेति चतुर्थवर्णकस्य विषयः १।५७ इति श्लोकादारभ्य १।९२ श्लोकपर्यन्तो दृश्यते। ब्रह्मणः तटस्थलक्षणस्य, स्वरूपलक्षणस्य, जगत्कारणतायाश्च विचार इति *पञ्चपादिका*नुसारेण *वेदान्तदर्शनस्य* द्वितीयसूत्रस्य तथा पञ्चमवर्णकस्य विषयः *संक्षेपशारीरकस्य* १।१७७ श्लोकतः १।१९५ श्लोकपर्यन्तः, अपि च १।४९६ श्लोकतः १।५५० श्लोकपर्यन्तो ग्रथितः। *पञ्चपादिका*नुसारेण *ब्रह्मसूत्रस्य* तृतीयसूत्रान्तर्गतस्य षष्ठवर्णकस्य ब्रह्मणः सर्वज्ञतासंबन्धीयविचारः सर्वज्ञात्ममुनिना १।१३०—१।१७३ इति श्लोकेषु वर्णितः। सप्तमवर्णकान्तर्गतः शास्त्रवाक्यस्य प्रामाण्यनिर्णयरूपविचारः, *ब्रह्मसूत्रस्य* चतुर्थसूत्रान्तर्गतस्य अष्टमवर्णकस्य ब्रह्मणः शास्त्रप्रमाणकत्वमिति पद्मपादाचार्यकृतः पूर्वपक्षनिरसनपूर्वको निर्णयः संक्षेपशारीरकस्य १।१००—१।३१५ इति श्लोकेषूपलब्धः। ब्रह्मणो विधिविषयत्वं नास्तीति नवमवर्णकस्य विषयः *संक्षेपशारीरकस्य* १।३४३—१।५६३ इति श्लोकेषु विचारितः।

*पञ्चपादिका*वत् ग्रन्थेऽस्मिन् प्रधानतो निर्गुण-ब्रह्म एव प्रतिपादितम्। यद्यपि *शारीरकभाष्यस्य* तृतीये चतुर्थे चाध्याये सगुणब्रह्मोपपत्तिः, उपासनानां स्वरूपं फलं च, मोक्षप्राप्तये उपासनानाम् आपातप्रयोजनं, क्रमन्मुक्तेः जीवन्मुक्तेर्वा पर्यायसकलं च शंकराचार्यैः प्रतिष्ठितं, किं तु पञ्चपादिका *संक्षेपशारीरकं* चेति ग्रन्थद्वये निर्गुण-ब्रह्मोपासना एव कैवल्यमुक्तेः द्वारकारणरूपेण गृहीता, न सगुण- ब्रह्मोपासना। अपि च *संक्षेपशारीरके* जीवन्मुक्तावस्था अर्थवादरूपेण वर्णिता—

जीवन्मुक्तिप्रत्ययं शास्त्रजातं जीवन्मुक्ते कल्पिते योजनीयम्।
तावन्मात्रेणार्थवत्त्वोपपत्तेः सद्योमुक्तिः सम्यगेतस्य हेतोः॥ इति। (सं. शा. ४।३९)

अपि च *पञ्चपादिका*कारैः वार्त्तिककाकारैश्च प्रतिपादितं—सन्न्यासश्रमिणां ब्रह्मविद्यायाम् अधिकारः, सगुणोपासनादेः अमोक्षपरत्वस्थापनं, जीवन्मुक्तत्वादेः अविद्यासहितत्वात् अर्थवादकल्पना, मुमुक्षूणां नाड्यादिमार्गेण अर्चिरादिमार्गेण चोत्क्रान्तिः, दहरोपासनादिकमिति विषयसकलं संक्षेपशारीरके उल्लिखितम्। अत उक्तविषयः, अनुक्तविषयो दुरुक्तविषयः च वि शद्यते, अनन्योपायेन वि चार्यतेऽत्र सर्वज्ञात्ममुनिना। फलतो वार्त्तिकस्य लक्षणमत्र सुप्रतिष्ठितं—'उक्तानुक्तदुरुक्तादि चिन्ता यत्र प्र वर्तते। तं ग्रन्थं वार्त्तिकं प्राहुर्वार्त्तिकज्ञा मनीषिणः॥' वस्तुतस्तु *शारीरकभाष्यस्य* गाम्भीर्येण मन्दबुद्धीनां दुर्ज्ञेयत्वात्, मुमुक्षूणां सविशेषब्रह्मोपासनां निवृत्त्य निर्विशेषब्रह्मविषये

प्रवृत्तकरणत्वात् प्रकरणवार्त्तिकदपः *संक्षेपशारीरकाख्यो* ग्रन्थो विरचितः।[5]

*संक्षेपशारीरक*ग्रन्थस्य बहवः टीकाग्रन्थः सन्ति। ते यथा—नृसिंहाश्रमस्य *तत्त्वबोधिनी*, पुरुषोत्तम-दीक्षितस्य *सुबोधिनी* (अग्निचित्पुरुषोत्तममिश्रस्य?), राघवानन्दस्य *विद्यामृतवर्षिणी*, विश्वदेवस्य *सिद्धान्तदीपः*, कृष्णतीर्थशिष्यस्य रामतीर्थस्य *अन्वयार्थप्रकाशिका*, मधुसूदनसरस्वतीमहाभागानां *संक्षेपशारीरक-सारसंग्रह* इति।[6]

विवरणप्रस्थानस्य तत्त्वानुसारेण ब्रह्म एव स्वप्रकाशं, न तु माया। विशिष्टस्य स्वप्रकाशत्वे विशेषणस्यापि तत्प्रसङ्गादित्यर्थेन 'मायापि स्याद् ब्रह्मवत् स्वप्रकाशा'(सं. क्षे. २।१४४) इत्युप लभ्यते। ब्रह्मण एव स्वप्रकाशत्वं मायायास्तु तद्वेद्यतेति। अनुभवविरोधान्माया न ब्रह्मवदिति सिद्धान्तः। अनुभवविरोधमेव स्पष्टयति—

आत्मा मूढ स्वप्रकाशो यथाऽयं
नैव मायि ब्रह्म नः स्वप्रकाशम्।
अज्ञादन्यद् ब्रह्म चेत् स्वप्रकाशं
द्वे विस्पष्टे स्वप्रकाशे स्फुरेताम्।। इति। (सं. क्षे. २।१४५)

ग्रन्थेऽस्मिन् ब्रह्मणः स्वप्रकाशत्वस्थापनाय ब्रह्मणि विधित्वनिरासो, शाब्दापरोक्षवादो, भेदाभेदवादस्य बौद्धमतस्य च निरसनमिति विशेषरूपेण विचारितम्।

**विधिवाददृष्ट्या ब्रह्मणः स्वप्रकाशत्वस्थापनम्—**

अद्वैतवेदान्ते परिनिष्ठिते ब्रह्मवस्तुस्वरूपे विधिर्न संभवति। क्रियाविषये एव विधिः प्रयुक्तः। ब्रह्म तु अनुत्पाद्यम्, अप्रयोज्यस्वरूपं, नित्यं, कूटस्थं, सिद्धस्वरूपम्। अतो ब्रह्म न क्रियायाः साधनं भवितुमर्हति। अपि च ब्रह्म यदि विधिबोधिताया उपासनाक्रियाया अङ्गं स्यात्, तर्हि उपासनाजन्यकर्मफलवत् ब्रह्मज्ञानजन्यो मोक्षो विनश्वरो भवेत्। अतो ब्रह्म न उपासनाक्रियायाः अङ्गं, नापि विधिविषयकम्।[7] *संक्षेपशारीरक*ग्रन्थेऽपि विषयोऽयं विशदीकृतः।

१.*संक्षेपशारीरक*ग्रन्थस्य प्रधानपूर्वपक्षाः—पूर्वमीमांसाकाचार्याः। तेषां मतेन पूर्व-मीमांसयैव समस्तवेदार्थविचारस्य कृतत्वात् पृथग् वेदान्तशास्त्रं नारम्भनीयं; वाक्यार्थनिर्णयेन अपेक्षितस्य सर्वस्य न्यायस्य पूर्वमीमांसाशास्त्रेणैव अव गच्छतीति।

सिद्धान्तिमतेन—'अथातो धर्मजिज्ञासे'ति प्रतिज्ञासूत्रे धर्मस्यैव यागादिलक्षणस्य विचार्यत्वेन प्रतिज्ञातत्वात् चोदनासूत्रे च तस्यैव लक्षणप्रमाणयोः उपन्यासात् उत्तरसूत्रेष्वपि प्रतिलक्षणं च तद्विचारेणैव शास्त्रसमाप्तिदर्शनात् पूर्वमीमांसाविचारेण उत्तरमीमांसाशास्त्रस्य अवगम्यता नास्ति।

२.अपि च पूर्वमीमांसाशास्त्रे सर्वत्र विध्यपेक्षितविचारस्य प्राधान्यता दृश्यते। अतो विधिरहितवाक्यानां चार्थवादादीनां विध्यैकवाक्यतया प्रदर्शितत्वात् वेदान्तविज्ञानस्यापि विधिविषयत्वाद् विध्यपेक्षिता-र्थसम्पर्कत्वेन न पृथग्विचारार्हम्।

अस्य आक्षेपस्य निरसनाय सर्वज्ञात्ममुनिना उच्यते—'न हि विधेः पदमात्मसमीक्षणमि'ति (सं. शा. १।५९)। वेदान्तवाक्योत्थम् आत्मसमीक्षणं प्रत्यगेकरसब्रह्मज्ञानं न विधेर्विषयः, साक्षाद्वा परम्परया वा न विधियोग्यः। यागदानहोमवदिह वेदान्तेषु आत्मदर्शनं पुरुषप्रयत्नेन न निष्पाद्यम्। ज्ञातविषये एव विधिः प्रयुक्तः, न त्वज्ञातविषये। अतो न केवलं पुरुषप्रयत्नाभावादेव ब्रह्मज्ञानस्य अविधेयता, अपि तु विधिविषयवद् विधिवाक्यप्रतीतेः प्रागेव

5 Sarvajñātmamūnīśvara, Ed. Swami Jagadananda 2003, pp. XXVIII-XX. Bhattacharya 1962, p. 339.
6 Dasgupta 1975, pp. 116-115.
7 *Braḥmasūtra-śāṃkarabhāṣya* 1|1|4.

परमात्मविषयकज्ञानस्य प्रतीतिर्नास्ति। सर्वेषां अहमिति आत्मज्ञानत्वात् अत्र विधिविषयतास्तीति वक्तुं न शक्यते, यतः स्वाभाविकात्मज्ञानस्य नित्यप्राप्तत्वात् विधेः प्रयोजनीयता नास्ति। किं तु प्राकृतात्मज्ञानं न वेदान्तैः प्रतिपाद्यम्। वेदान्तवाक्योत्थितस्य अलौकिकपरमात्मज्ञानस्य अन्यतः असिद्धत्वात् न विधेर्विषयत्वम्। आत्मज्ञाने विधिविषये सति मोक्षत्वाभावो दृश्यते।

३.पुनश्च यदि 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. उ.२।१) इत्यत्र सत्यादिपदैः परमात्मा विदित इति अङ्गीक्रियते, तर्हि अस्य परमात्मनो ज्ञानस्य विधिः निरर्थको भवेत्। निखिलभेदस्य अशेषविकल्पस्य संसारलक्षणस्य निदानम् अनाद्यनिर्वचनीयाज्ञानम्। परमात्मज्ञानोदयेन अज्ञानस्य निवृत्तिर्भवति। यदि विध्यनुष्ठानकार्यस्य प्रागेव परमात्मज्ञानोदयेन अज्ञानस्य निवृत्तिर्भवति, तर्हि विधिरनर्थकः। अत्र न केवलं विधेः वैयर्थ्यता, विध्यपेक्षितविषयनियोज्य-कारक-फलाद्यपि दुर्लभं भवति। वेदान्तवाक्य-प्रमाणेन अद्वितीयं ब्रह्मैवाहम् आत्मेत्यवगमे तद्विरुद्धक्रिया-कारक-फलभेदनिरसनेन विध्यवसरो नास्ति। टीकायामुप लभ्यते—'तस्मात् कर्मकाण्डविषय एव विचारः प्राच्या मीमांसया कृतो, न ज्ञानकाण्डविचारोऽतः पृथगारम्भो युक्त एवेति भावः' (अ. प्र. १।६१)।

३.ननु वेदान्तेष्वपि 'आत्मा वा अरे द्रष्टव्यः' (बृह. उ. २।४।५), 'सोऽन्वेष्टव्यः, स विजिज्ञासितव्यः' (छा. उ. ८।७।१), 'तद्विजिज्ञासस्व' (तै. उ. ३।१) इत्येवमादिषु विधयः श्रूयन्ते। वस्तुतो न केवलं विधावेव तव्यप्रत्ययो विहितो, येन तच्छ्रवणबलाद् वेदान्तेषु विध्यभ्युपगमः। किं तु 'अर्हे कृत्यतृचश्च' (पा. ३।३।१६९) इति सूत्रयतः पाणिनेराचार्यस्यार्हाद्यर्थे चापि कृत्यस्मरणम् अभिमतमिष्टमेव। लिङ्लोडादेश्च यथा बहुशः प्रार्थनादौ वृत्तिरिति पाणिनेः जैमिनेश्चार्यस्याभिमतं भवति। उक्तं च—

अर्हाद्यर्थे च कृत्यस्मरणमभिमतं पाणिनेः प्रार्थनादौ
लिङ्लोडादेश्च वृत्तिः प्रचुरमभिमता पाणिनेर्जैमिनेश्च।
तस्माद्वेदान्तवाक्ये पठितमपि लिङाद्यन्यथा योजनीयं
विध्यर्थासम्भवेन स्फुटमुदितनयादेतदन्यागतार्थम्।। इति। (सं. क्षे. १।६३)

४.ज्ञाने विधिर्न सं भवतीति प्रकारान्तरेणापि प्रतिपादितम् अस्मिन् ग्रन्थे। विनियोगप्रकरणाद्यभावेन नात्मनः कर्मशेषत्वं, मुमुक्षोरुपासनया प्रयोजनाभावेन नोपासनाविधिशेषत्वं वा। 'आत्मन्येवात्मानं पश्येत्' (बृह. उ. ४।४।२३) इति नात्मज्ञानविधिपरत्वं, यतः अलौकिकाद्वयात्मविषयस्य ज्ञानं विधातुं न शक्यम्; 'अतिरात्रे षोडशिग्रहणम्', 'उदितहोमानुदितहोमादि'वद्वा। ज्ञानं तु नैवं, तस्य प्रमाणप्रमेयैकतन्त्रतया पुरुषेच्छाभावात्। न हि ज्ञानं चिकीर्षया निष्पद्यते, अनिच्छतोऽपि तद्दर्शनात्। नापि कृत्या, अयतमानस्यापि तद्दृष्टेरिति ज्ञानस्य अविधेयतया न वेदान्तास्तद्विधिपरत्वा इति।

५.किं च 'आत्मानं पश्येत्' (बृह. उ. ४।४।२३) इति वाक्यार्थावगमात् प्राग् विधेयमात्मज्ञानं न ज्ञातं किं वा ज्ञातमिति संशयो जातो। ब्रह्मज्ञाने ज्ञाते एव ब्रह्मज्ञानं कर्तव्यमिति ज्ञातुं शक्यते। विधेयब्रह्मज्ञानस्य स्वरूपानवबोधे तस्य कर्तव्यत्वं न ह्यवबोद्धुं शक्यते। अतो ब्रह्म ज्ञातमिति वाच्यम्। अज्ञाते ब्रह्मणीत्यस्मिन् पक्षे विधिर्नास्ति। किं तु ब्रह्मज्ञानं मोक्षाय वि धीयते। फलतो ब्रह्मतत्त्वे विज्ञाते विदुषो मुक्तिं प्राप्नुवन्ति। ततो विधीनां कृत्यं नास्ति।

६.पुनरपि आशङ्का—यद्यपि संसारोऽनर्थाध्यस्तः, तथापि अनर्थस्य दृढभावितत्वात् सहसा ज्ञानोदयमात्रेण न निवृत्तिः सं भवति। अतो ज्ञानाभ्यासो विधेयः। सिद्धान्तिमतेन मैवं स्वीकृतम्। यतो वेदान्तप्रमाणजाता आत्मतत्त्वब्रह्माकारा असंभावनादिदोषैरचालिता मतिः स्वजन्ममात्रेण स्वप्रकाशमात्रेण चिदात्मनः आच्छादनरूपम्

अनाद्यविद्यापटरूपनेत्रबन्धनं नाशयति। प्रसिद्धा श्रुतिरिह—
स यो ह वै तत्परमं ब्रह्म वेद
ब्रह्मैव भवति नास्याब्रह्मवित् कुले भवति।
तरति शोकं तरति पाप्मानं
गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति।। (मु. उ. ३।२।९),
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।। (मु. उ. २।२।८),
तरति शोकमात्मविद् (छा. उ. ७।१।३), ब्रह्मैव सन् ब्रह्माप्येति(बृह. उ. ४।४।६) इति।

वस्तुतः श्रुतिद्वारा ब्रह्मणि विज्ञाते सति तस्य ब्रह्मणः प्रत्यये साक्षात्कारे वा अयं विधिः अफलः स्यात्। अज्ञातं ब्रह्म यस्य ज्ञानस्य विषयः, तज्ज्ञानमेव विधेर्विषय इति न बोध्यं विषयास्फुरणे विधेरवगमस्य अशक्यत्वात्। अतः स्वरुपतो विषयतश्च परोक्षरूपेण अपरोक्षरूपेण वा ब्रह्मणि ज्ञातेऽज्ञाते वा ब्रह्मात्मज्ञाने विधिः सर्वथा अयुक्तः। तस्मात् कृत्स्नस्य कर्मकाण्डस्य नियोगार्थत्वेऽपि उक्तन्यायेन वेदान्तेषु तदसंभवात् तेषाम् अखिलवेदान्तवाक्यानां सिद्धे ब्रह्मण्येव पर्यवसानं भवति।

७.पुनो विरुद्धत्रिकदृष्टान्तेन ज्ञानविध्यसंभव इति प्रतिपादितः। 'वाजपेयेन स्वाराज्यकामो यजेत' इति श्रुयते। तत्र संशयः—किमयं गुणविधिरुत कर्मनामधेयमिति। गुणविधिरिति तावत्प्राप्तं वाजमन्नं तत्पेयमस्मिन्नस्तीति अर्थेन मत्वर्थलक्षणां कृत्वा 'वाजपेयगुणवता यागेन स्वाराज्यं भावयेत्' इति वाजपेयगुणविशिष्टतया प्रकृतज्योतिष्टोमस्यैव स्वाराज्यफलस्य गुणविधि-निबन्धनत्वोपपत्तेः—इति पूर्वपक्षः। किं तु उपाये सति लक्षणा न स्वीकरणीया। यदि 'यजेत' इति क्रियापदस्य 'ईत'प्रत्ययेन द्रव्यं फलं च वि धीयते, तर्हि अर्थश्च—वाजपेयद्रव्येन यागं भावयेत्, यागेन स्वाराज्यं भावयेदिति। एकस्मिन् वस्तुनि विधौ अनुवादे सति विध्यनुवाददोषो जातः। तस्मात् रामतीर्थस्वामिनोक्तं—'नात्र गुणविधिरुप पद्यते विरुद्धत्रिकद्वयापत्तेः। तथा हि यदा यागमुद्दिश्य वाजपेयगुणः तस्मिन् वि धीयते तदा यागस्य उद्देश्यत्वम् अनुवादत्वं प्रधानत्वमिति त्रिकं प्राप्नोति। यदा पुनः स्वाराज्यफलमनूद्य तादर्थ्येन यागविधिस्तदा फलापेक्षया यागस्य तस्यैवोपादेयत्वं विधेयत्वं शेषत्वं चेति त्रिकं प्राप्नोति' (अ. प्र. १।४५६)। तथा च उद्देशत्वोपादेयत्वयोः अनुवादत्वविधेयत्वयोःप्रधानत्वगुणत्वयोः एकस्मिन् एकदा विरोधात् एकेन वाक्येन उभयात्मबोधानुपपत्तेः नेदं वाक्यं गुणविधिपरं किं तु कर्मनामधेयमिति मीमांसामतम्। प्रकृतस्थले तु मोक्षकामस्य अभिलषितं प्रत्यग्ब्रह्मात्मकं मोक्षमुद्दिश्य यदा 'मुमुक्षरात्मानं जानीयादि'ति श्रूयते, तदा तत्र ज्ञानविध्यभ्युपगमे मोक्षात्मकब्रह्मणः सिद्धवत्त्वात् उद्देश्यत्वं, प्रागनवगतत्वात् अनूद्यमानत्वम्, उद्दिश्यमानस्य फलत्वात् प्राधान्यत्वमिति एकं त्रिकम्। तथा विधेयज्ञानप्रमेयरूपेण उद्देश्यत्वविरुद्धम् उपादेयत्वं, प्रागज्ञातप्रमेयत्वात् प्रधानत्वविरुद्धम् अनूद्यमानत्वविरुद्धम् अज्ञातत्वं, विधेयक्रियाविशेषणतया प्रधानत्वविरुद्धम् अप्रधानत्वं चेति। अनेन ज्ञानविधिना निर्विशेषस्वप्रकाशब्रह्मणि उद्देश्यत्वादिगुणसंनिधानाद् निर्गुणब्रह्मस्वरूपस्य हानिः; वैरूप्यं च प्रसज्यत इति।

अपि च कथितत्रिकविरोधवशात् सकृत् उच्चार्यमाणं 'यजतिः'इति पदं यागस्वरूपे गुणं फलं च सङ्गमयितुं न क्षमते। वस्तुतो 'वाजपेयेन स्वाराज्यकामो यजेत' इत्यस्य वाक्यस्य गुणविधित्वे अङ्गीकृते 'वाजपेयगुणेन यागं कुर्यात्' इत्यत्र 'यजि'पदस्य कर्मकाकत्वं सिद्धम्। पुनो 'यागेन स्वाराज्यं भावयेत्' इत्यत्र 'यजि'पदस्य करणकारकत्वमपि सिद्धम्। फलतो यागस्यैकस्य कर्मत्वे करणत्वे च कल्पिते वाक्यभेददोषो जातः। मीमांसामतेन अत्र 'वाजपेय'शब्देन

गुणविधिर्नोक्तः; अग्निहोत्रशब्दवद् वैदिकक्रियाया नामधेय इति। अतो वाजपेयवाक्यप्रवृत्ति-पर्यालोचनात् आत्मप्रमितौ विधिर्नास्तीति उप लभ्यते। अस्य हेतोः उपनिषद् विधिशून्यतया परमात्मवस्तुविषया।[8]

८.'आत्मानं पश्येत्' (बृह. उ. ४।४।२३) इत्यत्र लिङाद्यर्थे कृतिसाधनत्वं श्रेयसाधनत्वं च भागद्वयमस्ति। आत्मज्ञाने सर्वानर्थमूलाविद्यां निवृत्त्य अज्ञातश्रेयसाधनत्वं लिङ्पदेन बोध्यते। अतः कृतिसाध्यताभागस्य अभावात् आत्मज्ञाने लिङ्पदं गौणम्, किं तु पुरुषेच्छाधीनत्वात् यागादौ तदेव मुख्यम्। मननादिष्वपि पुरुषेच्छाधीनवशात् लिङादेर्मुख्यार्थतास्ति। वस्तुतः अविद्यादशायां सर्वमेव विधिनिमित्तम्। आत्मनस्तु असङ्गत्वात् न कस्यापि अङ्गत्वम्। अतः आत्मनि श्रवणविधेरङ्गत्वं नास्ति। कर्मकाण्डे यथा व्रीहिकपालादेः सिद्धस्य साध्यरूपेण उपदेशः, ब्रह्मवस्तुपरे ज्ञानकाण्डे तथा न इष्टम्। अस्मिन् ब्रह्मकाण्डे तु सिद्धसाध्यपरत्वविपरीतं साध्यस्य यज्ञादेः श्रवणादेश्च सदा सिद्धस्वरूपमोक्षाय उपदेशो; यतः साध्ये उपदिष्टे मोक्षरूपपरमपुरुषार्थो न सिद्ध्यते, सिद्धे प्रतीतौ तु मुक्तिरस्ति। अत एव 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृह. उ. २।४।५) इत्यादिकं समस्तं विधानं सिद्धाद्वैतब्रह्मोपदेशस्य अङ्गरूपम्। विधिप्रकरणे सिद्धार्थवादादिवाक्यानि साध्येन सह सं बध्यन्ते। तस्मात् सिद्धवाक्यानां गौणतादिर्न दोषाय भवति। 'ब्रह्माप्येति' (बृह. उ. ४।४।६), 'ब्रह्मैव भवति' (मु. उ. ३।२।९) इत्यातिकार्यार्थवादिवचनेष्वपि न गौणतादिः दोषो; यत उपनिषत्स्वपि सिद्धब्रह्मवस्तुपराय साध्यस्य उपदेशः। 'ब्रह्मैव सन् ब्रह्माप्येति' (बृह. उ. ४।४।६) इत्यत्र 'अप्येति'पदेन न ब्रह्मप्राप्तिर्बोध्यते, अविद्याकृतायाः ब्रह्माप्राप्तत्वरूपाया भ्रान्ते ध्वंस एव अव गम्यते। यद्यपि वाक्ये नामपदम् अप्रधानं क्रियापदं च प्रधानं, किं तु अत्र 'ब्रह्मैव सन्नि'ति नामपदम् प्रधानम् 'अप्येती'ति क्रियापदम् अप्रधानम्। साध्यार्थस्य असंभवात् 'अप्येती'ति न क्रियापदं ; 'ब्रह्मैव सन्नि'ति नामपदेन अस्य क्रियापरत्वमपसृतम्। उच्यते च—

भव्याय भूतमिति किं च विधिप्रधाने
काण्डे नयोऽयमिह तद्विपरीतमाहुः।
भुताय भव्यमिति भूतपरं हि सर्वं
वेदावसानमिति सूत्रकृदाचचक्षे।। इति। (सं. शा. १।३१२)

विधिनिष्ठे कर्मकाण्डे प्रमेयस्य धर्मस्य अवगतिः श्रुत्यादिप्रमाणेनैव भवेद् धर्मस्य जडत्वात् स्वयंप्रकाशाभावाद्वा। वेदान्तवाक्येषु प्रमेयस्य ब्रह्मणः स्वयंप्रकाशत्वात् अजडत्वात् आत्मरूपप्रमेयेन स्वाविद्यारूपावरणाभिभवस्य जडान्तःकरणवृत्त्यादिरूप-प्रमाणस्य अवगतिः युक्तिसंमता; यथा चेतनेनैव जडघटादीनाम् अवगतिर्दृश्यते।

अपि च कर्मप्रधाने काण्डे वाक्यत्वम् आख्यातपदप्रयुक्तं क्रियाप्रधानमेव भवति। ब्रह्मप्रधाने काण्डे तु नामप्रधानं समस्तं वचनम्। उच्यते च—

कार्यप्रधानमखिलं च पदं सुबन्त-
माख्यातमेव फलतः खलु कर्मकाण्डे।
तद्वत्तिङन्तमपि वेदशिरःसु सर्वं
नामैव तद्धि परिनिष्ठितवस्तुनिष्ठम्।। इति। (सं. शा. १।४८९)

वेदान्तवाक्यगतानि 'अस्ति', 'अस्मि', 'असि' इति च तिङन्तपदानि सन्ति। तथापि तानि पदानि क्रियापदस्य या निजा शक्तिः तस्या भव्यार्थप्रकाशरूपं भारं न वहेयुः। यस्मात् अस्त्यादीनां संबन्धं पर्यवसानं वा अस्तित्वमात्रनिष्ठम्।

8 Sarvajňātmamūnīśvara, Ed. Swami Jagadananda 2003, pp. 330-341.

वस्तुतः संविद आश्रयरूपेण आत्मनः स्फुरणं, न विषयरूपेण; स्वयंप्रकाशमानरूपेणैव संविदः स्फुरणं, न वेद्यत्वेन।[9]

९•'आत्मा वा अरे द्रष्टव्यः...' (बृह. उ. २।४।५) इत्यत्र श्रूयमाणो 'तव्यो' न विध्यर्थे प्रयुक्तः। किं तु विधिप्रमेयं विधिविषयज्ञानविशेषणतया विधिविषयत्वेनाभिमतम् आत्मानमेव नि यच्छति आत्मतत्त्वमेव प्रति पादयति। अथवा द्रष्टव्य इत्ययमपि विधिर्विधेः प्रमेयभूतमात्मानं नैव वि वर्जयति, किं तु आत्मन्येव पश्यति न विधिमात्रे। विधौ प्रत्यये सति विधेयाभावाद् विध्यनभ्युपगम इति परि हरति। अज्ञातज्ञापको हि विधिर्भवति। परमात्मा न विधेय इत्यर्थो नात्र विधित्वमस्ति। यद्विधेयत्वेन अभिमतं तद्दर्शनं च न विधेयं; यस्माद् दर्शनं न कर्तृवशवर्ति। सिद्धवस्तुपरत्वात् तदेव न पुरुषेच्छाधीनम्। विधेयं तु कर्त्रधीनम्; ज्ञानस्य च तदभावान्न विधेयत्वम्—

द्रष्टव्य इत्यपि विधिर्न विधिप्रमेय-
मात्मानमेव वि नि यच्छति तत् कुतश्चेत्।
अज्ञातता च परमात्मन एव यस्माद्
यस्माच्च कर्तृवशवर्ति न दर्शनं तत्।। इति। (सं. शा. २।५०)

अपि च 'अर्हे कृत्यतृचश्च' (पा. ३।३।१६९) इति पाणिनिसूत्रानुसारेण अयं 'तव्य' इति कृत्यात्मकः प्रत्ययः अर्हार्थे एव विहितः। आत्मनो दर्शनयोग्यताम् अस्मान् प्रति वदति, न तत्त्वान्तरं विधिम्। तस्मादात्मैव प्रमेयं, न जडमिति सिद्धम्।[10]

**स्वप्रकाशत्वनिर्णये शाब्दापरोक्षवादः—**

सर्वज्ञात्ममुनिना शाब्दापरोक्षवादः स्वीक्रियते। ग्रन्थेऽस्मिन् 'तत्त्वमस्या'दीनां महावाक्यानां 'सत्यं ज्ञानमनन्तं ब्रह्म' चेत्यादीनां ब्रह्मणः स्वरुपप्रतिपादक-वाक्यानां तात्पर्यं विस्तृतरूपेण आलोचितम्। तत्पूर्वे एतादृशी व्याख्या न केनापि कृता।[11] उच्यते—

भेदो भिन्नश्चातिरेकोऽतिरिक्तोऽ-
भेदोऽभिन्नः संविदः स्वप्रकाशाः।
इत्येतस्मिन् विद्यते नार्थभेदो
वेदान्तानामप्यखण्डस्तथार्थः।। इति। (सं. शा. १।२१५)

वेदान्तवाक्येनैव स्वप्रकाशाद्वितीय-सच्चिदानन्दरूपस्य ब्रह्मणः अनुभूतिः जायते, नान्यथा। केवलम् अनुमानप्रमाणेन चेतनकारणस्य एकत्वविषये निश्चयात्मकं ज्ञानं न सं भवति। जगति प्रासादादि-निर्माणाय बहुकर्तृकत्वं दृष्टम्। अतः 'क्षिति सकर्तृका कार्यत्वाद् घटादिवदि'त्यत्र चेतनकारणे सिद्धेऽपि कारणमेकं बहु वेति संशयो जातः। यदि चेतनकारणस्यैकत्वे सर्वज्ञत्वं सर्वशक्तित्वं सर्वकर्तृत्वं च सिध्यति। ब्रह्मसूत्रस्य विलक्षणत्वाधिकरणे उक्तं—'नानेन मिषेण शुष्कतर्कस्यात्रात्मलाभः सं भवति। श्रुत्यनुगृहीत एव ह्यत्र तर्कोऽनु-भवाङ्गत्वेनाश्रीयते' (ब्र. सू. शां. भा. २।१।६)। तथा च श्रुतिः—'नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ' (कठ. उ. १।२।९)। अस्य व्याख्याकाले शांकरभाष्ये उक्तं—'अतोऽनन्यप्रोक्ते आत्मन्युत्पन्ना येयमागमप्रतिपाद्यात्ममतिर्नैषा तर्केण स्वबुद्ध्यभ्यूहमात्रेणापनेया न प्रापणीयेत्यर्थः। नापनेतव्या वा न हातव्या। तार्किको ह्यनागमज्ञः स्वबुद्धिपरिकल्पितं यत्किंचिदेव कथयति। अत एव च येयमागमप्रसूता मतिरन्येनैव आगमाभिज्ञेनाचार्येणैव तार्किकात् प्रोक्ता सती सुज्ञानाय भवति' (कठ. उ. शां. भा.

9 *Ibid.*, pp. 367-356 ,223-218.
10 *Ibid.,* with *Anvayārthaprakaśikā* comm.( Chowkhamba) 1918, pp. 447-446.
11 Bhattacharya 1962, p. 350.

१।२।९)। सिद्धानामपि जगत्कारणस्य दुर्बोध्यता अन्यत्रापि दृश्यते—'को अद्धा वेद क इह प्रवोचत्, इयं विसृष्टिर्यत आबभूव' (ऋक्. सं. १।३०।६), 'अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्' (महा. भा. भीष्म. प. ५।१२), 'न मे विदुः सुरगणाः प्रभवं न महर्षयः। अहमादिर्हि देवानां महर्षीनां च सर्वशः' (गी. १०।२)। वेदान्तवाक्यं येन लोकप्रसिद्ध-पदशक्त्यनुसारिलक्षण-मार्गेण विश्वोद्भव-स्थिति-लय-प्रकृतौ निमित्ते सच्चित्सुखा-त्मनि प्रवृत्तम्। अनुमानादिना एतन्न भवितुमर्हति; श्रुतिरेव अत्र प्रमाणम्। वेदान्तप्रतिपादिताद् महावाक्यादेव ब्रह्मलक्षणं प्रकाशितम्[12]—

एकं चेतनमस्य यत् प्रकृतितामापन्नमुत्प्रेक्ष्यते
तद्ब्रह्मेति निशामयेति निपुणं ब्रूते परब्रह्मणः।
सिद्धं लक्षणमादरेण महता व्यावर्तयद्ब्रह्मण-
स्तत्त्वं तत्त्वमसीति वाक्यनिलयं तच्छब्दलक्ष्यं वचः।। इति। (सं. शा. १।५१३)

ईदृशी महावाक्योत्था धीः मुक्तिफलं प्रयच्छति। अयं हि शाब्दापरोक्षवाद—इति संक्षेपपशारीरकग्रन्थस्य शेषांशे सिद्धान्तितः।[13] किं तु पूर्वपक्षमतेन महावाक्यादेव परोक्षज्ञानं प्र भवति, श्रवण-मनन-निदिध्यासनानां प्रकर्षमेव मोक्षस्य कारणम्। अतो महावाक्यजन्यज्ञानं न अपरोक्षम्। संक्षेपशारीरककारस्तु विवरणपन्थानुसारेण तन्मतं निराकृत्य शाब्दापरोक्षवादं प्रकटीकरोति स्वमतं द्रढीकरोति च।

ब्रह्मजिज्ञासायाः कारणं द्विविधं—कतिपयानि वहिरङ्गकारणानि कतिपयानि च अन्तरङ्गकारणानि। परमात्मविषये विविदिषोत्पादनाय साधनत्वरूपेण विहितं, तदेव तत्त्वज्ञानं प्रति वहिरङ्गसाधनं यथा—यज्ञादिः। सर्वज्ञात्ममतेन मोक्षरूपफलं प्रति यदेव कारकं तदेव वहिरङ्गसाधनम्। अदृष्टोपायेन फलोत्पादकमेव कारकम्। वैदिकयज्ञादिना इहजन्मनि जन्मान्तरे वा पापक्षयो भवति, अतो परमात्मविषये विविदिषा उत्पादिता—इदं हि वहिरङ्गसाधनम्। अन्तरङ्गसाधनं च परमात्मनः साक्षात्काराय विहितम्। शमादिना श्रवणादिना च प्रतिबन्धकं निवृत्त्य परमात्मा अभिव्यञ्जितो भवति। इमे शमादयः श्रवणादयश्चेति अन्तरङ्गसाधनम्। मोक्षकामी शमादिरूपं श्रवणादिरूपं चाभिव्यञ्जकं न परिहरति; यतः श्रवणादिनैव तत्त्वज्ञानमुदेति।[14] सर्वज्ञात्ममुनिना उक्तं—

यद्धि कारकतयावगम्यते
दूरतस्तदिह साधनं धियः।
अन्तरङ्गमखिलं तु तत्पुन-
र्व्यञ्जकं भवति यत्परात्मनः।। इति। (सं. शा. ३।३३०)

ब्रह्मज्ञानस्य अन्तरङ्गसाधनं वेदान्ततत्त्वविचारः तथा 'तत्त्वमस्या'दीनां महावाक्यानाम् अर्थविचारः। विचारशक्तिरियं श्रवण-मनन-निदिध्यासन-लभ्या। अध्यात्मशास्त्राणाम् अनुशीलनं तथा गुरुमुखाद् ब्रह्मस्वरूपस्य श्रवणं, युक्त्या अस्य विचारस्तथा मननं, मननगम्यस्य अर्थस्य ध्यानं निदिध्यासनं वा—एभिः अविद्या निवृत्ता ब्रह्मणश्च अपरोक्षरूपेण साक्षात्कारो भवति। यद्यपि शब्दः स्वभावात् परोक्षज्ञानमुत्पादयति[15], वेदान्तवाक्यात् ब्रह्मणः अपरोक्षज्ञानोदये कापि बाधा नास्ति—

ब्रह्मात्मवस्तु निरवद्यचिदेकरूपं
वह्न्युष्णतावदपरोक्षवपुः स्वभावात्।

12 Sarvajñātmamūnīśvara, Ed. Swami Jagadananda 2003, pp. 372-406.
13 *Ibid,* p. XXII.
14 Kar 2007, p. 67.
15 *Saṃkṣepaśārīraka,* Śloka-1|123.

निर्दोषवेदशिरसो वचनादतोऽस्मिन्
ब्रह्मात्मवस्तुनि भवेदपरोक्षबुद्धिः।। इति। (सं. शा. १।३४१)

वेदान्तानुशीलनात् अविद्यावरणं निरस्य जीवः पूर्णब्रह्मत्वं प्राप्नोति[16]—

नित्यः शुद्धो बुद्धमुक्तस्वभावः
सत्यः सूक्ष्मः सन् विभूश्चाद्वितीयः।
आनन्दाब्धिर्यः परः सोऽहमस्मि
प्रत्यग्धातुर्नात्र संशीतिरस्ति।। इति। (सं. शा. १।१७३)

सर्वज्ञात्ममुनिः विवरणसिद्धान्तानुसारेणैव श्रवण-मनन-निदिध्यासनानां व्याख्यानं कृतम्।

१•श्रवणमित्यस्यार्थो विचारः। युक्तिबलेन शब्दशक्तिविषयस्य निरूपणमेव श्रवणम्। मधुसूदनसरस्वतीमतेन— शक्तिरिति वेदान्तश्रवणाधिकारिणा जिज्ञासितं ब्रह्मवस्तुबोधकं सामर्थ्यरूपं तात्पर्यम्। 'शक्ति'पदेन अपौरुषेयवेदोक्तं तात्पर्यमभिहितं, पुरुषाभिप्रायरूपं तात्पर्यं च निराकृतम्। तर्केण सह श्रुत्यभिप्रायानुसारेण उपक्रमोपसंहारादिविषयनिरुपणाकुलं मानसव्यापारं श्रवणमिति। उच्यते—

शब्दशक्तिविषयं निरूपणं युक्तितः श्रवणमुच्यते। इति। (सं. क्षे. ३।३४३)

२•युक्त्या वस्तुवृत्तनिरूपणमेव मननम्। 'तत्'पदस्य 'त्वम्'पदस्य च यदेव लक्ष्यवस्तु, तयोः रूम्यग्रूपेण ऐक्यप्रतिपादनमेव वस्तुवृत्तम्। ब्रह्मणः साक्षात्कारत्वादिहेतुना भेदादिप्रपञ्चस्य मिथ्यात्वं निरूपितम्—अनया युक्त्या परमात्मनः अद्वितीयत्वप्रतिपादनकारि मानसव्यापारं मननमिति। कथितं च—

वस्तुवृत्तविषयं निरूपणं युक्तितो मननमित्युदीर्यते।। इति। (सं. शा. ३।३४३)

३•सर्वजडविषयाकारत्वं परित्यज्य चित्तस्य चिदेकरसात्मकरूपेण अवस्थानं ध्यानं निदिध्यासनं वा। एतदेव अन्तरङ्गसाधनम्। परमात्मनः साक्षात्काराय अवश्यमेव अनुष्ठेयमेतत्। उक्तं च—

चेतसस्तु चितिमात्रशेषता
ध्यानमित्यभिवदन्ति वैदिकाः।
अन्तरङ्गमिदमित्थमीरितं
तत्कुरुष्व परमात्मबुद्धये।। इति। (सं. शा. ३।३४४)

४•निपुणमतिवार्त्तिककारानुसारेण सर्वज्ञात्ममुनिः निदिध्यासनस्य अपरेकां व्याख्यां प्रदर्शितवान्। तन्मतेन— श्रवण-मननबुद्ध्योर्जातयोः यदन्तरालिकं फलमुत्पादितं, तदेव निदिध्यासनम्। वस्तुतस्तु श्रवण-मननयोः र्समाप्तिकाले उत्कर्षप्राप्तिकाले च जीवब्रह्मणयोः 'अहं ब्रह्मे'ति साक्षात्कारात् प्रागेव अनुभवनविहीना साक्षात्कारत्वरहिता परोक्षनिश्चयरूपा बुद्धिरिति निदिध्यासनम्—

श्रवणमननबुद्ध्योर्जातयोरयत्फलं
तन्निपुणमतिभिरुच्चैरुच्यते दर्शनाय।
अनुभवनविहीनायैवमेवेतिबुद्धिः
श्रुतमननसमाप्तौ तन्निदिध्यासनं हि।। इति। (सं. शा. ३।३४५)

'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति श्रुतिवाक्यस्य अन्तिमभागे पठितं 'दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्' (बृह. उ. २।४।५) इति। अत्र निदिध्यासनपदेन ज्ञानात्मकं ध्यानं बोधितम्।[17]

16 Bhattacharya 1962, pp. 350-351.
17 *Upaniṣadgranthāvalī* 2013, p.161.

मधुसूदनसरस्वतीमहोदयेन उल्लिखितम्— विज्ञानपदेन अनुवादान्न तद्ध्यानं, किं तु आत्मनिर्णयज्ञानमेव। अत्र श्रवणं वेदान्तस्य तात्पर्यगोचराज्ञानं संशयादिप्रतिबन्धकं च नि वारयति, मननं विरोधिमतान्तरोद्भूतप्रमेयसंभावनां नि वर्तयति, निदिध्यासनं च चित्तचाञ्चल्यादिरूपप्रतिबन्धकं नि वर्तयति। सर्वे प्रतिबन्धके दूरीभूते सति 'तत्त्वमसी'ति महावाक्यात् आत्मसाक्षात्कारो भवति।[18]

---

18 *Kar 2007, pp. 6769-.*

# *Abbreviations*

ऋक्. सं. = *ऋक्संहिता*
कठ. उ.= *कठोपनिषद्*
कठ. उ. शां. भा.= *कठोपनिषत्-शांकरभाष्यम्*
गी.= *श्रीमद्भगवद्गीता*
छा. उ.= *छान्दोग्योपनिषत्*
तै. उ.= *तैत्तिरीयोपनिषद्*
पा.= *पाणिनि-सूत्रम्*
बृह. उ.= *बृहदारण्यकोपनिषद्*
ब्र. सू. शां . भा.= *ब्रह्मसूत्र-शांकरभाष्यम्*
महा. भा. भीष्म. प. =*महाभारत-भीष्मपर्व*
मु. उ.= *मुण्डकोपनिषद्*
वे. प.= *वेदान्तपरिभाषा*
श्वेत. उ.= *श्वेताश्वतरोपनिषद्*
सं. शा. = *संक्षेपशारीरकम्*
*MLBD= Motilal Banarsidass.*
*RMIC= Ramakrishna Mission Institute of Culture.*

## *Bibliography*

Appydīikṣita. 2003(2nd ed.) (1st rpt.) (1st ed. BS 1356). *Siddhāntaleśasaṃgraha.* Ed. Swami Gambhirananda. Kolkata: Udbodhan Karyalaya.

Bhattacharya, Asutosh. *Vedāntadarśaṇ(a)-Advaitavād(a).* 1962 (2nd ed.) Vol. 1. *Vedāntacintār(a) Kramavikāś(a).* Calcutta (now Kolkata): Calcutta University Press.

*Braḥmasūtra-śāṃkarabhāṣya.* 1990 (rpt.). (1st ed. 1985). Delhi/ Varanasi/ Patna: MLBD. (Works of Śaṃkarācārya in original Sanskrit, Vol.III).

__. 1972. Ed. with Vācaspatimiśra's commentary *Bhāmatī* and Beng. trans. Srimohan Bhattacharya. (Part- 1). Calcutta (now Kolkata): Sanskrit Pustak Bhandar.

Dasgupta, Surendranath. 1975 (1st ed. 1922, London: Cambridge University Press). *A History of Indian Philosophy.* Vol. 2. Delhi/ Varanasi/ Patna: MLBD.

Dharmarājādhvarīndra. Śaka 1883. *Vedāntaparibhāṣā.* Ed. with commentary

*Paribhāṣāsaṃgraha*, Panchanan Bhattacharya, Calcutta (now Kolkata): Panchanan Bhattacharya.

Kar, Minati. 2007. *Śābdāparakṣavāda*. Kolkata: RMIC.

Potter, K. H. 2006. *Encyclopedia of Indian Philosophies*.Vol. XI. Ed. K. H. Potter. Delhi/ Patna/ Varanasi: MLBD.

Sarvajñātmamunīśvara. 1924. *Saṃkṣepaśārīraka*. Ed. Bhau Sastri Vajeh with Madhusūdanasarasvatī's comm. *Sārasaṃgraha*. Vol.1. Beneras : Chowkhamba Sanskrit Sansthan, (Kashi Sanskrit Series / Haridas Sanskrit Granthamala 18).

__. 1925. __. Ed. Bhau Sastri Vajeh and Sitaram Sastri Kelkar with Madhusūdanasarasvatī's comm. *Sārasaṃgraha*. Vol. 2 Beneras : Chowkhamba Sanskrit Sansthan,. (Kashi Sanskrit Series/Haridas Sanskrit Granthamala 18).

__. 1918. __. Ed. Ranganath Shastri, with Agnicitpuruṣottamamiśra's Comm. *Subodhinī* and Ramatīrtha's Comm. *Anvayārthaprakāśika*. Vol. 1 and 2. Kashi : Anandasharamamudranalaya, (Ānandāśrama-saṃkṛtagranthāvali 83).

__. 1992. __ .Ed. Bhau Shastri Vajheh, with Sans. comm. *Anvayārthaprakāśikā* of Ramatīrtha. Varanasi : Chowkhamba Sanskrit Sansthan. (Rpt. ; reproduction of the earlier edition of the Kashi Sanskrit Series.).

__. 2003. (Rpt. ; 1st ed. 1999). __ . Ed. with Beng. trans. and exp. Swami Jagadananda. Kolkata : Udbodhan Karyalaya,

Sharma, Chandradhar. 2009 (rpt.). *A Critical Survey of Indian Philosophy.* Delhi/ Patna/ Varanasi: MLBD.

*Upaniṣadgranthāvalī*. 2013 (4th ed., 19th rpt.).Ed. and Beng. trans. Swami Gambhirananda. Vol. 3. Kolkata: Udbodhan Karyalaya.

Received on 06. 06. 2017 Accepted on 24. 07. 2017

# नित्यानन्दस्मृतितीर्थप्रणीतः कालिदासजीविताश्रितो व्यायोगः 'कालिदासः'- विश्लेषणात्मिका पर्यालोचना

सौम्यजित् सेनः*

♣ ***प्रबन्धविषयसंकेतः***

*विंशशतके प्रख्यातमहाकवीनां जीवनवृत्तमाधारीकृत्य बहूनि रूपकाणि प्रणीतान्यभूवन्निति तु मन्येऽनेकैरेवाज्ञातमस्ति। यथा वाल्मीकि-भास-कालिदास-भवभूति-विज्जिकादीनां ख्यातनाम्नां महाकवीनां जीविताश्रिताः किंवदन्तीः समाश्रित्याधुनिकैः नाट्यकृद्भिर्विरचितानि नैकानि नाट्यानि। समग्रेऽपि भारतवर्षे मत्प्राप्ततथ्यानुसारं न्यूनातिन्यूनतया द्वाविंशतिसंख्यकानि रूपाणि रचितानि केवलमेव महाकविकालिदासस्य जीवनवृत्तान्युपजीव्य। तन्मध्ये वङ्गीयविद्वद्वरैः प्रणीतानां कालिदासजीविताश्रितानां नाट्यानां संख्या प्रायः षट्।*

*आधुनिकसंस्कृतसाहित्यस्यान्यतमो महायशस्को विद्वद्वरेण्यो वङ्गीयकविवर्य्यस्तावत् नित्यानन्दस्मृतितीर्थः। मदीयोऽयं प्रबन्धस्तु तस्यैव कविवर्य्यस्य 'कालिदासः' इत्यष्टदृश्यावलम्बिनं व्यायोगाख्यं रूपकभेदमाश्रित्य विरचितः। ऐतिह्याधुनिकतयोः समन्वयसाधनं कविनात्र केन प्रकारेण विहितमिति विषयिणी चर्चैवेह मयकाकारि।*

♣ **प्रधानपदनिचयाः**

'कालिदासः', नित्यानन्दस्मृतितीर्थः, कालिदासः, विद्यावती, सरस्वती, व्यायोगः, किंवदन्ती, ऐतिह्यम्, आधुनिकत्वम्।

## ०.१. उपोद्घातः

सभ्यमात्रगौरवास्पदीभूता विविधविज्ञानप्रसूः सर्वदेशव्यापिका भारतमातुरास्यभूता ह्यस्मदीया संस्कृतसरस्वतीत्यत्र नास्ति संशीतिः काचिदपि। तत्राप्यतलसंस्कृताब्धौ विद्यमानेषु महार्घ्येषु रत्नेष्वन्यतमत्वं भजत आधुनिकसंस्कृतसाहित्यम्। सर्वदिग्गामिनी परिव्याप्तिस्तावदस्य त्वद्यत्वे। विविधविषयवैचित्र्यावगाहिनि साहित्येऽस्मिन् कविवर्य्यैः प्रणीतानि बहूनि काव्यानि प्रचलितोदन्तानि किंवदन्तीर्वा समुपजीव्य प्रवर्तितानीति त्वस्माभिः प्रत्यक्षीक्रियते। आधुनिकसंस्कृतसाहित्यस्य किंवदन्त्याश्रितनाट्यपरिसरेऽस्मिन् येषां ख्यातयशसां नाट्यकाराणां योगदानमवश्यमेव सरस्वतीसुरभारतीसेविभिरस्माभिः सर्वान्तःकरणेन सदैव स्मर्तव्यमस्ति, तेषु पश्चिमवङ्गहीरकहारस्यान्यतमं मौक्तिकं तावन्नित्यानन्दस्मृतितीर्थः।

## ०.२. किंवदन्त्योपजीव्या कृतिततिः

विंशशतके प्रख्यातमहाकवीनां जीवनवृत्तमाधारीकृत्य बहूनि रूपकाणि प्रणीतान्यभवन्निति तु मन्येऽनेकेषां पण्डितमूर्धन्यानामप्यज्ञातमस्ति। यथा वाल्मीकि-भास-कालिदास-भवभूति-विज्जिकादीनां विख्यातानां

* सहायकाध्यापकः, संस्कृत-संकायः, कोचविहारपञ्चानन-वर्मा-विश्वविद्यालयः, कोचविहारः।

महाकवीनां जीविताश्रिताः किंवदन्तीः समाश्रित्याधुनिकैः नाट्यकृद्भिर्विरचितान्यङ्गुल्यगण्यानि नाट्यानीति तु नो महाप्रमोदकारणम्। दिङ्मात्रोदाहरणानि यथा ---

- ❖ वाल्मीकेः जीवनवृत्तमाश्रित्य ---
  1) कालीपदतर्काचार्याणाम् > ‘प्रशान्तरत्नाकरम्’ इति।
  2) विश्वेश्वरविद्याभूषणानाम् > ‘दस्युरत्नाकरम्’ ‘वाल्मीकिसंवर्द्धनम्’ चेति।
  3) बुद्धदेवपाण्डेयपादानाम् > ‘आदिकविः’ इति।
  4) भि. राघवन् – वर्य्याणाम् > ‘वाल्मीकिप्रतिभा’ इति।
  5) काशीकृष्णाचार्यपादानाम् > ‘वाल्मीकिः’ इति।
- ❖ भासस्य जीवितवृत्तमधिकृत्य ---
  1) जि. बि. पलसुलेपादानाम् > ‘भासोऽहासः’ इति।
- ❖ भवभूतेः जीवनवृत्तान्तानुपजीव्य ---
  1) राधावल्लभत्रिपाठिचरणानाम् > ‘प्रेमपीयूषम्’ इति।
- ❖ जगन्नाथस्य जीवितोदन्तान्युररीकृत्य ---
  1) रमाकान्तशुक्लमहोदयानाम् > ‘पण्डितराजीयम्’ इति।
- ❖ विज्जिका-विकटनितम्बा-अवन्तीसुन्दरीणां महाकवीनां जीवनवृत्तान्युपजीव्य ---
  1) भि. राघवन् – वर्य्याणाम् > ‘प्रेक्षणकत्रयी’ इति।

समग्रेऽपि भारतवर्षे मत्प्राप्ततथ्यानुसारं न्यूनातिन्यूनतया द्वाविंशतिसंख्यकानि रूपाणि प्रणीतानि नाट्यकारैर्विविधैः केवलमेव महाकविकालिदासस्य जीवनवृत्तान्युपजीव्य। तन्मध्ये वङ्गीयपण्डितमूर्धन्यैरनेकैर्विरचितानां कालिदासोपजीवितोदन्ताश्रितानां नाट्यानां संख्या प्रायः षट्। तानि यथा ---

- ♣ नित्यानन्दस्मृतितीर्थानाम् --- ‘कालिदासः’ (१९५६)
- ♣ वीरेन्द्रकुमारभट्टाचार्याणाम् --- ‘कविकालिदासम्’ (१९६३-६४)
- ♣ श्रीजीवन्यायतीर्थानाम् --- ‘महाकविकालिदासम्’ (१९६३)
- ♣ रमाचौधुरीचरणानाम् --- ‘कविकुलकोकिलम्’ (१९७०)
  --- ‘कविकुलकमलम्’ (१९७०) च
- ♣ सुखमयमुखोपाध्यायानाम् --- ‘अभिज्ञानकवीश्वरम्’ (अप्रकाशितम्)

आधुनिकसंस्कृतसाहित्यजगति निश्चयेनान्यतमो लब्धवैशारद्यो वङ्गीयकविवरः खलु नित्यानन्दस्मृतितीर्थः। मदीयोऽयं प्रबन्धस्तु तस्यैव कविवर्य्यस्य कालिदायजीवनाधारितं ‘कालिदासः’ इत्यष्टदृश्यावलम्बिनं व्यायोगाख्यं रूपकभेदमाश्रित्यालिखितः। संस्कृतसाहित्यस्य चिरन्तनैतिह्यधारा यथात्राक्षुण्णैव विद्यते तथैवाधुनिकताया अवश्यम्भावी स्पर्शोऽप्यस्मिन् नाट्ये प्रायः समभावेन कविना संसृष्ट इत्यस्य महाकवेः पाण्डित्यप्रकर्षोत्कर्षत्वमेव निश्चप्रचमातनोतीति मामकी निःसन्दिग्धा मतिः।

**०.३. नित्यानन्दस्मृतितीर्थः**

आधुनिकसंस्कृतसाहित्यस्य प्रख्यातसमालोचिकायाः श्रीमत्या क्षता-चहोपाध्याय-महोदयाया

विविघग्रन्येभ्यः प्राप्ततथ्यानुसारेण वक्तुं शक्यते यद १९२३ – ख्रीष्टाब्दे वांलादेशस्य यशोरनामके स्थाने लब्धजन्मनो भरद्वाजगोत्रोद्भवस्यास्यासीज्जनको रामगोपालमुखोपाध्यायस्मृतिरत्नः माता च दीनतारिणी देवी। काव्य-व्याकरण-पुराण-न्याय-स्मृत्यादिशास्त्रेषु तीर्थोपाधिना भूषितोऽयं महान् पण्डितवरो बभूव हावडाकोडारवागानस्थस्य संस्कृतविद्यालयस्य प्रसिद्धतमोऽध्यापकः। न केवलमियं चतुष्पाठी, नवद्वीपमहाविद्यालयेन समं कलिकातास्थराष्ट्रियसंस्कृतमहाविद्यालयोऽप्यस्य प्रकाण्डज्ञानवतोऽध्यापकस्याध्यापनया धन्यः संबभूवेत्यत्र नास्ति काचिदपि विप्रतिपत्तिः। १९९४ – ख्रीष्टाब्दे भारतसर्वकारेणास्मै प्रदत्तो भारतस्य संस्कृतपरिसरे मान्यतमो राष्ट्रपतिपुरस्कारः। हावडासंस्कृतसमाजस्यान्यतमेनानेन प्रतिष्ठात्रा तथा सम्पादकेन स्वीयं सम्पूर्णं जीवनं समर्पितं संस्कृतस्य सर्वत्र प्रचाराय प्रसाराय च।

संस्कृतसाहित्यस्य एवंविधस्य विद्वन्मूर्धन्यस्य सारस्वतचर्चाया निदर्शनत्वेन प्रायः पञ्चाशदधिकैकशतसंख्यकानि काव्यानि सन्ति। सन्ति च नैकानि सुललितानि सङ्गीतानि तथा चानेके ज्ञानसमृद्धाः प्रबन्धाः। तेन साकल्येन प्रायः दशोत्तरैकशतसंख्यकानि रूपकाणि, सप्त महाकाव्यानि तथा च चतुर्विंशतिः खण्डकाव्यानि प्रणीतानि। अस्यैव विपुलज्ञानभाण्डारस्यान्यतममेकं रत्नं तावत्तदीयः कालिदासजीवितोपजीव्यः ‘कालिदास’ इत्याख्यः संस्कृतव्यायोगः।

### ०.४. ‘कालिदासः’

हावडासंस्कृतसाहित्यसमाजतः १९५६ – ख्रीष्टाब्दे प्रकाशिते ‘कालिदासः’ इत्याख्ये अष्टदृश्योपेते व्यायोगाख्ये रूपके कालिदासस्य जीवनमाश्रित्य लोके प्रचलितान्युदन्तानि नितरां सरसया रमणीयया शैल्या कविमूर्धन्येन नित्यानन्दशर्मणा प्रस्तुतानि। तातचरणाब्जयुगले भक्त्या समर्पितोऽयं ग्रन्थस्तस्य सारस्वतसाधनायाः प्रथमरचनात्वेनावश्यं सफलप्रयासरूपः सन् समेषां प्रीतिभाजनमभूत्। तस्मादेव हावडाकोडारवागानचतुष्पाठीविद्यार्थिभिर्व्यायोगोऽयमभिनीतः हावडासंस्कृतसाहित्यसमाजसदस्यैः साकं मिलित्वा। ग्रन्थोऽयं तदीयतातनिर्देशेन तस्यैव परमपूज्यपादेषु तदध्यापकनिचयेषु सश्रद्धं प्रचारितः। किञ्चास्यापरमेकं वैशिष्ट्यं यदस्य संशोधनरूपस्य गुरुदायस्य भारस्तस्यैवाध्यापकवर्य्याः श्रीकालीपदतर्काचार्यास्तथा श्रीतारानाथन्यायतर्कतीर्थपादाः स्वीयस्कन्धयोः स्थापिता। तस्मादस्य समादरोऽतितरां वर्धित इत्यत्र मन्ये नास्ति काचित् संशीतिः। स्वयमेव कविर्वक्ति विनयप्रदर्शनपुरःसरं ग्रन्थस्यास्यादावेव निवेदनांशे ---

“नास्ति मे काचन कवित्वशक्ती रचनादिव्यापारे निपुणता वा। तथापि त्रयोदशवर्षात्प्राक् केषाञ्चित् सुहृज्जनानां प्रेरणया शिशोश्चन्द्रालिङ्गनेच्छावन्मादृशस्यापि जनस्य स्वप्नसदृशी काचन प्रवृत्तिः समजायत व्यायोगस्यास्य रचनायाम्। तच्चेष्टाफलरूपेण यदिदं किञ्चन समुत्पन्नं तत् परमाराध्यानां स्नेहमूर्त्तीनां स्वर्गतानां पितृदेवानां चरणाब्जेषु निवेदितम्। पितृदेवाः स्नेहवशान्मत्प्रथमकृतग्रन्थमिममाशिषा सम्वर्द्ध्य मदीयाध्यापकेषु निवेदनार्थं समादिशन्। तेषां निर्द्देशेनैव परमपूज्यपादेषु मदीयाध्यापकेषु ग्रन्थोऽयं प्रचारितः। अस्माकं परमपूज्यपादा अध्यापकवर्य्या महामहोपाध्यायश्रीयुक्तकालीपदतर्काचार्य्यमहोदयाः श्रीयुक्ततारानाथन्यायतर्कतीर्थमहोदयाश्च कृपया स्नेदवशाच्च अकिञ्चित्करं ग्रन्थमिमं संशोधितवन्तः। तेषां पादमूले असंख्या प्रणतिर्निवेद्यते।”[1] इति।

1 नित्यानन्दस्मृतितीर्थः. १३६३ (वङ्गाब्दः). *कालिदासः*, निवेदनम्

## ०.५. विषयवस्तु

सन्ति साकल्येनाष्टौ दृश्यान्यस्मिन् व्यायोग इति तु पूर्वमेव सूचितम्। तत्रादावेव प्रथमे दृश्ये सूत्रधार-पारिपार्श्विकयोः कथोपकथनेन ज्ञायते यत् समागतस्तदा वसन्तः। सूत्रधारेण सर्वज्ञानदायिन्या देव्याः सरस्वत्या आराधनायादिष्टः पारिपार्श्विकः। तदा पारिपार्श्विकेन पृष्टः सोऽवादीद् यद् ---

"भवतोक्तं शास्त्रेष्वपि मया दृष्टम्, किन्तु अस्य सत्यतां कथं जानीमः? यतो, न दृश्यते अधुना कोऽपि जनः केवलं वाग्देवीमाराध्य प्राप्तवान् सर्व्वविद्याम्। तस्मादद्य संशयापन्नो निवेदयामि भवतः सविधे।"[2] इति।

--- तदा सूत्रधारेण कालिदासस्य कवित्वप्राप्तिकथा श्राविता। एवमस्य व्यायोगस्यारम्भोऽभूत्।

द्वितीये दृश्ये ढक्कां वादयता राजपुरुषेण राजपथे समुद्घोषितं यद्विद्यया विद्यावतीं यो विद्वान् सर्व्वगुणभूषितां रूपलावण्यमयीं राजदुहितां तोषयितुं शक्तो भवेत्तस्मै विदुष एव स्वीयां कन्यकां प्रदास्यति नृप इति।

तृतीये दृश्ये वयं पश्यामो यत् कुठारहस्तो मूर्खः कालिदासो नितरां विमनायमानो वृक्षच्छेदने प्रवृत्तः। तस्मादेव वृक्षात्कश्चनांशः पतितस्तेनैव वर्त्मना गच्छतोः शिवदास-विष्णुदासाख्ययोः पण्डितयोर्मस्तकोपरि। वृक्षाग्रमारुह्य मूलं छेद्यमानं कालिदासं वीक्ष्य तौ पण्डितौ कालिदासद्वारैव राजदुहितां विद्यावतीं वञ्चयितुं प्रवृत्तौ। राजजामातृत्वं कालिदासेनैव लभ्यमिति लोभं प्रदर्शयन्तौ तौ कालिदासेन साकं समुपस्थितौ राजगृहम्।

चतुर्थे दृश्ये स्वसख्या मधुमालया सममालपन्तीं विद्यावतीं पश्यामो वयम्। प्रियसख्या विवाहो न भवतीति चिन्तया व्याकुलिता मधुमाला विद्यावतीकृतां प्रतिज्ञां परित्यज्य रूपवन्तं शीलवन्तं कञ्चन पुरुषं स्वामित्वेन ग्रहीतुमनुरुरोध विद्यावतीम्। परन्तु निजप्रतिज्ञां कथमपि परित्यक्तुमसम्मता राजकन्या समस्तं जीवनं प्रतीक्ष्यमाणा स्थास्यति, परं मूर्खं कञ्चिन्न वरत्वेन ग्रहीष्यतीत्युवाच। तदैव कञ्चुकी समागत्य राजप्रदत्तः संवादः प्रस्तुतो यद् ---

"ये तावद् विबुधा भर्त्तृदारिकायाः प्रश्नसमाधाने असमर्थाः सन्तः प्रतिनिवृत्ताः, तैः सर्व्वैर्मिलित्वा आनीतोऽपरोऽप्येकः पुरुषः भवत्याः संशयविनाशाय।"[3] इति।

--- ततो विद्यावत्या सह कालिदासस्य वादे प्रवृत्ते कालिदासायाङ्गुलीमेकां प्रदर्शयामास विद्यावती। तदा कालिदासेन चिन्तितं यद्राजदुहिता तस्य चक्षुरेकं नाशयिष्यतीति। तथाहि राजनन्दिन्याः चक्षुर्युगलं नाशयितुमिच्छता कालिदासेनादौ अङ्गुलीमेकां तदन्वङ्गुलीद्वयं दर्शयामास। एतदालोक्य तद्दर्शितस्य इङ्गितस्य परमार्थं विचिन्तयन्त्या नितरामानन्दितया विद्यावत्या सर्वसमक्षं समुद्घोषितं यद् ---

"अपगतो मे संशयः। भवतापि इङ्गितेन यत् प्रकाशितं तदेव मे संशयापनोदकम्। तथाहि ---

एकं हि परमं ब्रह्म नास्ति तस्मात् परं खलु।
जीवब्रह्मप्रभेदेन ब्रह्मैव द्विविधं मतम्।।"[4] इति।

पञ्चमदृश्यस्य प्रारम्भो भवति शयनकक्षे प्रविष्टयोः कालिदास-विद्यावत्योः कथोपकथनेन। प्राकृतभाषिणं कालिदासं निशम्यादौ विद्यावत्या चिन्तितं यदुपहासायैव विद्वद्वरः कालिदासः प्राकृतभाषया वक्तीति। परं यदा उष्टस्स, उट्रस्स, किम् उट्टस्स इत्येवंप्रकारेण उष्ट्रशब्दस्य सर्वथा असाधूच्चारणं विहितं कालिदासेन तदा तस्य मूर्खत्वं सम्यक्तयैव प्राकाश्यं नीतम्। तेन नितरां दुःखिता क्रोधवशीभूता सा पदाघातेन कालिदासं ताडिता। ततो मधुमाला सर्वं वृत्तान्तमाकर्ण्य त्वरया तां राजसकाशं नीतवती।

---

2 *कालिदासः*, पृष्ठम् - ३
3 तत्रैव, पृष्ठम् - १३
4 तत्रैव, पृष्ठम् - १६

षष्ठे दृश्ये विषण्णेन कालिदासेन साकं भूमङ्गलाख्यस्य कस्यचिन्मुनेः साक्षात्कारो जातः। तदा मुनिनानुरुद्धः कालिदासः श्रावयाञ्चक्रे निजदुःखगाथाम्। तत्रैव जले निमज्जितो भूत्वा स्वप्राणान् परित्यक्ष्यतीति कालिदासवचनं श्रुत्वा स मुनिर्वृथा जीवितविसर्जनचिन्ता सर्वथा परिहार्या मनुष्यजीवनदुर्लभत्वादित्यादिदेश। तस्मादेव वाग्देवी सरस्वत्येव कालिदासेनाराध्याधुना तत्प्रसादात्श्रेष्ठत्वप्राप्तिसम्भावनासम्भावितत्वादिति भूमङ्गलात्समवाप्तेनोपदेशेन प्रेरितः स तस्यैव मुनेः प्रत्यक्षसाहाय्येन सरस्वत्याः साधनाय सज्जीबभूव।

सप्तमे दृश्ये साक्षात् सरस्वत्याः स्पर्शेन तस्य सर्वं दुःखं तमो वापगतम्। स विश्वेऽस्मिन् विश्वे सर्वैरेव पूजितो भविष्यति, सर्वाण्यपि शास्त्राणि वेत्स्यतीत्येवं वरस्तत्प्रसादादवाप्तः।

अन्तिमे तथाष्टमे दृश्ये वयं विश्लिष्टवेशां विषण्णां विद्यावतीं पश्यामः। क्रोधेन स्वस्वामिनं प्रति यत्पशुवदाचरणं तया विहितं, तेन सुतरामेव सा लज्जिता। विद्यागर्वगर्वितायास्तस्या विद्या एव सर्वनाशस्य कारणं सञ्जातम्। एवं यदा सा नितरामेव कष्टमनुभवन्ती रुदन्ती च विद्यते तदैव सरस्वतीवरपुत्रस्य कालिदासस्याविर्भावः। 'प्रिये! अस्ति कश्चिद् वाग्विशेषः'[5] इत्युक्त्वा यदा कालिदासो विद्यावत्याः समक्षं समागतस्तदा ज्योतिर्मयदेहं दिव्यकान्तिधारिणं स्वभर्त्तारमवलोक्य क्षमां प्रार्थयन्ती सा तस्य पादयोरपतत्। ततश्च कालिदाससकाशं तया काचन प्रार्थना समुपस्थापिता---'नाथ! मामुद्दिश्य प्रथमं यद् भाषितं तत एव आरभ्य विरचयतु भवान् ग्रन्थम्।'[6] इति।

--- काम्यविषये कालिदासेन पृष्टया विद्यावत्या ग्रन्थस्य समाप्तौ समेषां हिताय यत्प्रार्थितं तत्तु सर्वथोल्लेखार्हमित्यत्र नास्ति संशयावसरः ---

"भवतु भवतु नारी गर्व्वहीना समन्ता-
दपनयतु च वाणी विश्वतः सर्व्वमोहम्॥"[7] इति।

### ०.६. नाट्यवैशिष्ट्यानि

**क) 'कालिदासः' इत्यस्य व्यायोगत्वसिद्धिः**

स्वयमेव नाट्यकृता ग्रन्थस्यास्य निवेदनांशेऽगादि यत् --- '... काचन प्रवृत्तिः समजायत व्यायोगस्यास्य रचनायाम्'[8] इति। अतो व्यायोगत्वेनैवास्य रूपकस्य परिगणनास्माभिः विधीयते। परन्त्वत्र सूक्ष्मेक्षिकया यदि विचार्यते तदा त्वस्य व्यायोगत्वमालङ्कारिकदृष्ट्या नैव सङ्गच्छते। ननु किं तावल्लक्षणं व्यायोगस्येत्याकांक्षायां विश्वनाथेनाभ्यधायि तदीये दर्पणे ---

"ख्यातेतिवृत्तो व्यायोगः स्वल्पस्त्रीजनसंयुतः।
हीनो गर्भविमर्षाभ्यां नरैर्बहुभिराश्रितः॥
एकाङ्कश्च भवेदस्त्रीनिमित्तसमरोदयः।
कौशिकीवृत्तिरहितः प्रख्यातस्तत्र नायकः॥
राजर्षिरथ दिव्यो वा भवेद्धीरोद्धतश्च सः।
हास्यशृङ्गारशान्तेभ्य इतरेऽत्राङ्गिनो रसाः॥"[9] इति।

--- 'ख्यातेतिवृत्त' इति पदस्य व्याख्यायां प्रख्यातटीकाकर्त्रा हरिदाससिद्धान्तवागीशेन तदीयायां 'कुसुमप्रतिमा'ख्यायां

5 नित्यानन्दस्मृतितीर्थः. १३६३ (वङ्गाब्दः). *कालिदासः*, पृष्ठम् - २८
6 तत्रैव, पृष्ठम् - २९
7 तत्रैव, पृष्ठम् – ३०
8 *कालिदासः*, पृष्ठम् - १६
9 विश्वनाथः. २०१५ (पुनर्मुद्रितसंस्करणम्). *साहित्यदर्पणः*. (षष्ठः परिच्छेदः). सम्पा. उदयचन्द्र वन्द्योपाध्याय, पृष्ठम् - १३९

टीकायां टीकितं यत् ---
‘ख्यातं पुराणभारतादिषु प्रसिद्धमितिवृत्तं यस्य स’[10] इति। परन्तु ‘कालिदासः’ इत्यस्य नाट्यस्य यन्मुख्यमितिवृत्तं तत्तु पुराणेषु तथा महाभारतेऽपि न दृग्गोचरीभवति। तर्हि केन प्रकारेणास्य ख्यातेतिवृत्तत्वं स्थापितं भवेदित्याकाङ्क्षायां हरिदासस्य भाषायामेव वक्तुं शक्यते यद् --- ‘अत्रादिपदेन महाभारतादीतिहास-पुराण-लोकसमाजानां ग्रहणम्’[11] इति। तेनास्य रूपकस्य लोकसमाजे प्रख्यातस्य कालिदासस्य किंवदन्त्याश्रितत्वाद् व्यायोगत्वं सिद्धं भवति। स्त्रीजनस्वल्पत्वमप्यत्र सङ्गच्छते विद्यावती-मधुमालादीनां कतिपयानां स्त्रीजनानामेवात्र विद्यमानत्वात्। परन्तु नायकदिशा अङ्कदिशा रसदिशा वा यदि पर्यालोच्यते रूपकमिदं, तदा त्वस्य व्यायोगत्वं कथमपि न सिध्यति। यतोऽत्र दृश्यानि सन्ति, न त्वङ्काः। अपि तु शृङ्गारहास्यव्यतिरिक्तो नान्यः कोऽपि रसोऽत्र भवितुं शक्यते। तर्हि कविनयेन कथमस्य व्यायोगत्वं सिध्येत्?

आधुनिकसंस्कृतसाहित्यस्यान्यतमायाः समालोचिकाया अध्यापिकायाः श्रीमत्या ऋता-चट्टोपाध्यायमहोदयाया नयेनात्र व्यायोगशब्दस्य साधारणनाट्यार्थ एव प्रयोगो विहितः। यथा वीरेन्द्रकुमारभट्टाचार्यविरचिते ‘वेष्टनव्यायोगा’ख्ये रूपकेऽपि व्यायोगशब्दस्य सामान्यनाट्यार्थ एव व्यवहारो दृश्यते। किञ्च, आधुनिकनाट्यकाराणामेतदेव वैशिष्ट्यं यत्ते तदीयायां रचनायां सर्वत्रैव ऐतिह्येन साकमाधुनिकतायाः मेलबन्धनं विधीयत इति। तस्मादेव क्वचिदालङ्कारिकसम्मतव्यायोगलक्षणं क्वचित्तु तद्विपरीतमार्गमनुसरतीदं रूपकमित्यस्य विशेषता।

2) **किंवदन्तीनां यथायथं निवेशः**

महाकवेः कालिदासस्य जीवने यासां किंवदन्तीनां विषये लोके प्रचारो वर्तते, तासां प्रायः सर्वासां यथायथं प्रयोगेण ‘कालिदास’ इति नाट्यस्यास्योत्कर्षः सुतरामेव वृद्धिं गतः इत्यत्र नास्ति सन्देहलवः कश्चित्। नाट्येऽस्मिन् प्रयुक्तानां कासाञ्चित्किंवदन्तीनां प्रयोगपाटवमत्र प्रदर्श्यते ---

- ‘...सर्वगुणोपेतामतुलरूपमयीं सर्व्वविद्याविभूषितामात्मजां सम्प्रदास्यति भूपस्तस्मै, यो विद्यया तां तोषयितुं समर्थो भवेत्।’[12] इति।
- ‘वृक्षशाखामाश्रित्य तन्मूलच्छेदकृद् युवा।
  कोऽयं मूर्खो मनुष्येषु यस्यैवं वर्त्ते मतिः॥’[13] इति।
- ‘कथं राजनन्दिनी ममैकं चक्षुर्नाशयिष्यति। तत्, किं करोमि। भवतु, यदि राजनन्दिनी ममैकं चक्षुरेव नाशयिष्यति, तत् खल्वहमपि अस्याश्चक्षुर्युगलमेव नाशयिष्यामि। (इति प्रथममङ्गुलीमेकां ततोऽङ्गुलीद्वयञ्च दर्शयति)’[14] इति।
- ‘प्रिये! अस्ति कश्चिद् वाग्विशेषः।’[15] इति।
- ‘वत्स! त्वं मद्वचनाद् वाग्देवीं भजस्व।...वाग्देवीप्रसादाद् मूर्खतां निरस्य विद्वत्सु श्रेष्ठतां प्राप्स्यसि।’[16] इति।

---

10 तदेव
11 तत्रैव, पृष्ठम् - ५
12 नित्यानन्दस्मृतितीर्थः. १३६३ (वङ्गाब्दः). *कालिदासः*, पृष्ठम् - ४
13 तत्रैव,, पृष्ठम् - ८
14 तत्रैव, पृष्ठम् - १६
15 तत्रैव, पृष्ठम् - २८
16 तत्रैव, पृष्ठम् - २४

➤ "अद्यप्रभृति सर्व्वत्र पूजितस्त्वं भविष्यसि।
क्षितौ सर्व्वाणि शास्त्राणि वेत्स्यसि मत्प्रसादतः।।
सर्व्वलोकस्य भव्यार्थं यत्यतां सर्व्वथा त्वया।
तव प्रसादात् सर्व्वेऽत्र कल्याणं प्राप्नुयुर्यथा।।"[17] इति।

ग) गीतगुरुत्वम्

भरतमुनिना प्रणीते नाट्यशास्त्रे न केवलं नाट्यतत्वं, प्रयोगतत्त्वमपि विस्तरेणालोचितमिति तु सर्वैर्ज्ञायते। नाट्यशास्त्रस्य पञ्चमाध्याये पूर्वरङ्गविधानप्रसङ्गे भरतेन संगीतविषयः समुत्थापितः। नेपथ्यसंगीतविषयिणी चर्चाप्यत्रावाप्यते ---

"एतानि तु बहिर्गीतान्यन्तर्यवनिकागतैः।
प्रयोक्तृभिः प्रयोज्यानि तन्त्रीभाण्डकृतानि च।।"[18] इति।

--- प्रसङ्गेऽस्मिन् सागरनन्दिनयोऽवश्यमनुसन्धेयः। रङ्गमञ्चात् सूत्रधारो यदा निष्क्रान्तो भवति, तदा सूत्रधार इव सर्वरूपगुणसम्पन्नः स्थापकः समागमिष्यति, ध्रुवासंज्ञका गीतिश्च नाट्यकार्यानुसारं भविष्यतीति नाटकलक्षणरत्नकोषे व्याख्यातम्। तदुच्यते ---

"स्थापकस्य प्रवेशे तु कर्तव्यार्थनुगा ध्रुवा।
सुवाक्यमधुरैः श्लोकैः नानाभावरसान्वितैः।।"[19] इति।

--- भरतकथिता सैव ध्रुवा गीतिरद्यत्वे श्रूयते रवीन्द्रनाथ-गीरिशकार्नाड-श्रीजीव-सिद्धेश्वर-रमाकान्तशुक्ल-राधावल्लभादीनां नाटकेष्वपि। ध्रुवायाः समेऽपि भेदा यद्यपि न सन्ति, तथापि क्वचित् प्रावेशिक्याः, क्वचिद्वा गेयपदस्य, क्वचित्पुनः मृदङ्गलयस्य प्रयोगेण तदेवैतिह्यं समभावेन प्रचलतीति मम समयः। तथाहि कालिदास इति व्यायोगेऽपि यद्यपि गीतस्य तादृशः प्रयोगो नालक्ष्यते, तथापि चतुर्थदृश्यस्यादावेव विद्यावत्याः सखी गायति ---

"प्रखरतपनदीप्त्या दीप्यते या स्वयैव
विमलकमलभासा राजते या सदैव।
धवलकमलवासा वर्त्तते यत्र वाणी
जयति बुधवरा सा राजपुत्री सखी नः।"[20] इति।

प्रसङ्गतो वक्तुमलं यन्नित्यानन्दस्येव श्रीजीवन्यायतीर्थस्य प्रायः प्रत्येकं नाटक एव गीतस्यानन्यप्रयोगेण सृष्टया मूर्च्छनया तु समेऽपि सहृदयहृदयाः सुतरामेव मूर्च्छिता भवितार इत्यत्र नास्ति सन्देहावसरः कश्चित्। प्रथमाङ्के यथा वैतालिकगीतिः ---

"एहि सुजनगण! वाणीपूजन-
पुण्यदिवस इह तीर्थे।
सद इदमतिथे! सदयमलङ्कुरु
विद्याविलसितकीर्ते।"[21] इति।

---

17 तत्रैव, पृष्ठम् - २७
18 भरतः. २००३ (पुनः प्रकाशितम्). *नाट्यशास्त्रम्* (प्रथमखण्डः). सम्पा. आर. एस. नागरः, पृष्ठम् - २९२
19 सागरनन्दी. १३८५ (वङ्गाब्दः). *नाटकलक्षणरत्नकोषः*. सम्पा. सिद्धेश्वरचट्टोपाध्यायः, पृष्ठम् - ४०
20 नित्यानन्दस्मृतितीर्थः. १३६३ (वङ्गाब्दः). *कालिदासः*, पृष्ठसंख्या - ११
21 तत्रैव, पृष्ठम् - ३३

**घ) प्राग्भवानां महाकवीना प्रभावः**

कालिदास इत्यस्य व्यायोगस्य नायकः स्वयं कालिदासः। महाकवेरस्य चरित्रचित्रायणे यत्नवतोऽपरस्य महाकवेः नित्यानन्दस्य लेखन्यां प्राग्भवकवेः कवित्वप्रतिभायाः प्रभावोऽवश्यम्भावी। कालिदासप्रभावस्य दिङ्मात्रमुदाहरणमत्र प्रदीयते ---

"न खलु न खलु जाने किञ्चिदेव ह्यहं हि
तव च निखिलशक्तेर्लेशतो नास्ति बोधः।"[22] इति।

--- नाट्यस्यास्यादावेव वसन्तसमयवर्णनं यथा ---

"सर्व्वो वृक्षः कुसुमनिचयैः शोभमानो विभाति
मन्दं मन्दं वहति पवनो दक्षिणस्य दिशोऽद्य।
आरक्ताभा नवकिसलया मानसं नो हरन्ति
पुष्पे पुष्पे जलधरणिजे गुञ्जतेऽद्य द्विरेफैः।।"[23] इति।

क्षेमेन्द्रस्य प्रख्यातं वचनं किञ्चित् परिवर्त्य वक्तुं शक्यते ---

"सुवशा श्रीश्रीजीवस्य मन्दाक्रान्ता प्रवल्गति।
सदश्वदमकस्येव काम्बोजतुरगाङ्गना।।"[24] इति।

--- तस्मादेव कालिदास इव श्रीनित्यानन्दस्य नाटकेष्वपि वैदर्भी रीतिर्नितरां सुष्ठुतयैव प्रयुक्तेति समवलोक्यते। एतदतीत्य व्यायोगारम्भ एव नित्यानन्देन महाकवेर्भासस्य पन्थानुसृतः। तेन 'नान्द्यन्ते प्रविशति सूत्रधारः' इति भासकवेरिव स्वरूपकारम्भो विधायीत्यस्यापरं वैशिष्ट्यम्।

**ङ) भाषागतं वैशिष्ट्यम्**

विंशशतके संस्कृतसाहित्ये भाषाव्यवहारविषयिणी विविधा परीक्षा विहितेति दृश्यते। नाटके नायकादीनि पुरुषपात्राणि सुरगिरा, नार्य्यश्च प्राकृतभाषया वार्तालापं करिष्यन्तीति विश्वनाथेनोक्तम्। तथाह्यभ्यधायि कविराजेन विश्वनाथेन ---

"पुरुषाणामनीचानां संस्कृतं स्यात् कृतात्मनाम्।
शौरसेनी प्रयोक्तव्या तादृशीनाञ्च योषिताम्।।"[25] इति।

--- एष खलु नियमस्तु न सार्वत्रिकः। स्थानकालपात्रभेदेन नाट्यकृता नियमस्यास्य परिवर्तनं कर्तुं शक्यते। धनञ्जय-रूपगोस्वामि-विश्वनाथादिभिरालङ्कारिकैर्भाषायाः परिवर्तनं प्रयोजने सति भवितुमर्हतीति स्वीकृतम्। नाटकचन्द्रिकायां रूपगोस्वामिना स्पष्टमेव निगदितं ---

'सर्वेषां कारणवशात् कार्यो भाषाव्यतिक्रमः।'[26] इति।

--- प्रसङ्गेऽस्मिन् मृच्छकटिके सूत्रधारवागेवानुसन्धेया ---

'एषोऽस्मि भोः कार्यवशात् प्रयोगवशाच्च प्राकृतभाषी संवृत्तः।'[27] इति।

---

22 तत्रैव, पृष्ठम् – २६

23 तत्रैव, पृष्ठम् – १-२

24 चट्टोपाध्याय, ऋता. १४११ (वङ्गाब्दः). *पण्डित श्रीजीव न्यायतीर्थेर सारस्वत साधना*, पृष्ठम् - १६

25 विश्वनाथः. १८७५ (पञ्चमं संस्करणम्). *साहित्यदर्पणः*. सम्पा. हरिदाससिद्धान्तवागीशः, पृष्ठम् - ३६५

26 चट्टोपाध्याय, ऋता. २००६. *सिद्धेश्वर चट्टोपाध्याय (बुडोदा) ओ ताँर रचित अथ किम्*, पृष्ठम् - २३

27 शूद्रकः. २००२. *मृच्छकटिकम्*. सम्पा. जगदीशचन्द्रमिश्रः, पृष्ठम् - ११

अत्रापि 'कालिदास' इति रूपके विद्यावती-मधुमाला-सखी-प्रभृतीनां नारीणां भाषा संस्कृतम्। अद्यत्वे तु प्रायः सर्वा अपि नार्यः शिक्षिता भवन्ति। विद्यावती एतावती विदुषी नारी बभूव यत्तस्याः प्रौढिविचारेण सर्वेऽपि पण्डिता राजकुमाराः पराजिताः प्रत्याख्याताश्चाभूवन्। एतदतिरिच्य कालिदासो यदा मूर्खो बभूव तदा तन्मुखे नाट्यकृता यथा प्राकृतभाषायास्तथैव सरस्वतीवरवृतस्य कालिदासस्यास्ये संस्कृतभाषाया युगोपयोगी प्रयोगो नाट्यस्य वैशिष्ट्यमन्यतमम्। तथाहि ऐतिह्याधुनिकतयोरपूर्वः समन्वयोऽत्रास्माभिः प्रत्यक्षीकर्तुं शक्यते।

**०.७. उपसंहृतिः**

"शब्दार्थोक्तेस्तु यः पश्येदिह किञ्चन नूतनम्।
उल्लिखेत् किञ्चन प्राच्यं मन्यतां स महाकविः।।"[28]

--- इति राजशेखरमतमनुसृत्य वक्तुमलं यत् श्रीनित्यानन्दो हि नूनमेव कश्चन महाकविः। द्विविधयोः कारयित्री-भावयित्र्योः प्रतिभयोरभूतपूर्वं मेलनमस्मिन् दृग्गोचरीभवति। यो वै सहृदयः काव्यानि सम्यगनुभवति, स एव नूनं काव्यानि रचयितुमर्हतीति चिन्तयामि। नित्यानन्दोऽपि कालिदासप्रणीतानि काव्यानि सर्वान्तःकरणेन प्रतिच्छत्रमनुभूतवान्। तस्मादेव तल्लेखनीलताप्रसूतोऽभूत् 'कालिदास' इत्याख्यो व्यायोगः।

परन्तु यद्यस्य व्यायोगस्यालङ्कारिकदृष्ट्या विचारो मूल्यायनं वा क्रियते, तदा तु मन्ये रचनेयं नैव रसोत्तीर्णेति राद्धान्त एव सहृदयसम्मतः स्यात्। यतोऽत्र तस्य ग्रन्थान्तराणीव विविधानाम् अलङ्काराणां प्रयोगपाटवं नैव नयनयोरापतति। छन्दसामपि तथा व्यवहारो नास्ति यथान्यत्र दृष्टमस्माभिः। विष्कम्भकसन्ध्यादीनां नाट्यतत्त्वगतविषयाणामपि प्रयोगो नास्ति। रसस्य चमत्कारित्वं नैवालक्ष्यते। तस्मादेव रचनेयं रसोत्तीर्णा नैव सञ्जाता। अत्र कारणं भवितुमर्हति यदेष तदीयः प्रथमः प्रयास इति तु प्रागेवोक्तम्। यूनः कवेस्तदा लेखनीधारा परिपक्वतां नानीता। तथाहि ग्रन्थारम्भ एव निवेदनांशे तेनाकपटतया स्वीकृतं यद् ---

"नास्ति मे काचन कवित्वशक्ती रचनादिव्यापारे निपुणता वा।... पितृदेवाः स्नेहवशान्म**त्प्रथमकृतग्रन्थ**मिममाशिषा सम्वर्द्ध्य मदीयाध्यापकेषु निवेदनार्थं समादिशन्।"[29] इति।

'उत्पादका न बहवः कवयः शरभा इव' इति वाणोक्त्या वक्तुं शक्यते यन्नित्यानन्दः खलु कश्चन उत्पादकः कविः। अन्तिमे तु विंशशतकस्य मूर्धन्यभूतस्य नाट्यकारस्य श्रीहरिदाससिद्धान्तवागीशस्य सुललिता सुरभारती सश्रद्धं स्मर्यते ---

"वचश्चाप्यपूर्वं विशेषेण सर्वे
रसज्ञाः पुराणाच्चिरायाद्रियन्ते।।"[30] ---

इति स्वल्पबुद्धिना मयका यदि नूत्ना अपूर्वा च काचिदपि वागत्रभवतां भवतां सकाश उपन्यस्ता, तदा तस्याः समादरः सुतरां प्राथ्र्यत इति कृतं पल्लवितेनेति शिवम्।

---

28 चट्टोपाध्याय, ऋता. १४११ (वङ्गाब्दः). *पण्डित श्रीजीव न्यायतीर्थेर सारस्वत साधना*, पृष्ठम् - १६
29 नित्यानन्दस्मृतितीर्थः. १३६३ (वङ्गाब्दः). *कालिदासः*, निवेदनम्.
30 चट्टोपाध्याय, ऋता. २०१३. *महामहोपाध्याय हरिदास सिद्धान्तवागीशेर सारस्वत साधना*, पृष्ठम् - २१३

## परिशीलिता ग्रन्थानुक्रमणी


✓ **प्रबन्धोपजीव्यग्रन्थः**

मुखोपाध्यायः, नित्यानन्दः. १३६३ (वङ्गाब्दः). *कालिदासः*. हावडा : हावडा-संस्कृत- साहित्य-समाजः.

✓ **सहायकाः प्राचीनसंस्कृतग्रन्थग्रामाः**

कालिदासः. २००३ (चतुर्थसंस्करणम्). *अभिज्ञानशकुन्तलम्*. सम्पा. अनिलचन्द्रवसुः. कोलकाता : संस्कृत बुकडिपो.

भरतः. २००३ (पुनः प्रकाशितम्). *नाट्यशास्त्रम्* (प्रथमतः चतुर्थखण्डः). सम्पा. आर. एस. नागरः. देहली (अधुना दिल्ली) : परिमल पाब्लिकेशन.

विश्वनाथः. १८७५ (पञ्चमं संस्करणम्). *साहित्यदर्पणः* (कुसुमप्रतिमा-टीकोपोतः), सम्पा. हरिदाससिद्धान्तवागीशः. कलिकाता : सिद्धान्तविद्यालयः.

शूद्रकः. २००२ (पुनर्मुद्रितसंस्करणम्). *मृच्छकटिकम्*. सम्पा. जगदीशचन्द्रमिश्रः. वाराणसी : चौखम्बा सुरभारती प्रकाशन.

सागरनन्दी. १३८५ (वङ्गाब्दः). *नाटकलक्षणरत्नकोषः* सम्पा. सिद्धेश्वरचट्टोपाध्यायः, कोलकाता : संस्कृत पुस्तक भाण्डार.

✓ **सहायका अर्वाचीनसंस्कृतग्रन्थग्रामाः**

भट्टाचार्यः, वीरेन्द्रकुमारः. १८९० (शकाब्दः). *कविकालिदासम्*. कलिकाता : संस्कृत पुस्तक भाण्डार.

श्रीजीवन्यायतीर्थः. २००८. *महाकविकालिदासम्*. संस्कृतसाहित्यपरिषत्पत्रिका. Vol. LXXXX Nos. 1-4. कोलकाता : संस्कृतसाहित्यपरिषत्.

✓ **सहायका वङ्गभाषोपनिबद्धा ग्रन्थग्रामाः**

चट्टोपाध्याय, ऋता. २०१२. *आधुनिक संस्कृत साहित्य (१९१०-२०१०) छोटोगल्प ओ नाटक*. कोलकाता : प्रोग्रेशिभ पाब्लिशार्स.

चट्टोपाध्याय, ऋता. १४११ (वङ्गाब्दः). *पण्डित श्रीजीव न्यायतीर्थेर सारस्वत साधना* (श्रीजीव न्यायतीर्थ स्मारक वक्तृता), कोलकाता : संस्कृत पुस्तक भाण्डार.

चट्टोपाध्याय, ऋता. २०१३ *हरिदाससिद्धान्तवागीशेर सारस्वत साधना*. कोलकाता : संस्कृतसाहित्यपरिषत् ओ संस्कृत पुस्तक भाण्डार.

चट्टोपाध्याय, ऋता. २००६. *सिद्धेश्वर चट्टोपाध्याय (बुडोदा) ओ ताँर रचित अथ किम्*. कोलकाता : संस्कृत पुस्तक भाण्डार.

मुखोपाध्याय, अञ्जलिका. २०१३ (प्रथमसंस्करणम्). *संस्कृत काव्यचर्च्चाय वाङाली सेकाल ओ एकाल,* कोलकाता : संस्कृत पुस्तक भाण्डार.

✓ **सहायक आङ्गलभाषोपनिबद्धो ग्रन्थः**

Chattopadhyay, Rita. 2009. *20th Century Sanskrit Literature*. Kolkata: Sanskrit Pustak Bhandar.



Received on 09. 06. 2017 Accepted on 24. 07. 2017

# मीमांसादर्शने यत्किञ्चित् पर्यालोचनम्

**स्वामिना अलोकानन्देन ***

भारतीयदर्शनशृङ्खलायां मीमांसादर्शनस्य समादरोऽस्ति। याज्ञवल्क्यस्मृतावुक्तं –

''पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश।।''

'मान्'धातोरुत्तरं जिज्ञासार्थे 'सन्' कृदन्त 'अ' प्रत्यययोगेन 'मीमांस' इति शब्दप्राप्तौ तदुत्तरं स्त्रियां टाप्प्रत्ययेन मीमांसाशब्दो निष्पन्नो भवति। 'मान पूजायाम्' इति 'मान'शब्दस्य पूजा अर्थो भवति। वार्त्तिककारैरुक्तं 'मानेर्जिज्ञासायामि'ति। तथा भट्टोजिदीक्षितमहाभागेन सन्नन्त'मान्'धातोः अर्थः विचार इति स्वीक्रियते। अर्थसंग्रहकारो लौगाक्षिभास्करमहोदयः 'अथातो धर्मजिज्ञासे'ति मीमांसासूत्रव्याखायां 'जिज्ञासापदस्य विचारे लक्षणे'ति उच्यते। तथा च ब्रह्मसूत्रस्य भामतीटीकायां वाचस्पतिमिश्रेण मीमांसाशब्दस्यार्थः 'पूजितविचारे'ति कथ्यते। तेनोक्तं - 'पूजितविचारवचनो मीमांसाशब्दः। परमपुरुषार्थहेतुभूत-सूक्ष्मतमार्थनिर्णयफलतया च विचारस्य पूजिते'ति (ब्र.सू. भामतीटीका)। अतः 'मान्'धातोः पूजा जिज्ञासा विचारश्चेति अर्थत्रयसमन्वयेन मीमांसाशब्दस्यार्थः 'पूजितविचारः' स्वीक्रियते।

'इति मीमांसन्ते ब्रह्मवादिनः' (तै.सं.-5/7/1), 'उत्सृज्यां नोत्सृज्यामिति मीमांसन्ते' (काठकसंहिता–3/3/7), 'इति मीमांसन्ते' (मैत्रायणीसंहिता -1/8/5) इत्यादिषु ब्राह्मणवाक्येषु 'मीमांसा'पदस्यार्थः 'विचारः' इति प्राप्यते। उपनिषदि दार्शनिकसिद्धान्तौ विचारविमर्शः इति गृह्यते।

वेदवादिनां सर्वोत्तमः प्रमाणशास्त्रः वेदः। 'अज्ञातज्ञापको वेदः'। अज्ञातकर्तव्यनिर्देशेन वेदस्य कर्मकाण्डात्मकांशः पूर्वमीमांसादर्शनमिति तथा अज्ञातब्रह्मविषयं निर्दिश्य ज्ञानकाण्डात्मकांश उत्तरमीमांसादर्शनम् वेदान्तदर्शनं नाम्ना वा प्रसिद्धोऽस्ति।

यद्यपि कर्मकाण्डप्रक्रियाप्रयोगादीनां विस्तारः वेदस्य ब्राह्मणभागेऽपि उपलभ्यते तथापि उत्तरकाले कर्मकाण्डविषये भिन्नमतमुपलभ्य किं कर्तव्यं किमकर्तव्यमिति निरूपणाय विचारविमर्शात्मकं पूर्वमीमांसादर्शनं सूत्राकारेण महर्षिजैमिनिना प्रणीतम्। द्वादशाध्यायात्मकोऽयं कर्मकाण्डात्मकः ग्रन्थः।

आचार्येण लौगाक्षिभास्करेण अर्थसंग्रहग्रन्थस्य पातनिकायामुक्तम् - ''अथ परमकारुणिको भगवान् जैमिनिर्धर्मविवेकाय द्वादशलक्षणीं प्रणिनीय तत्रादौ धर्मजिज्ञासां सूत्रयामास - 'अथातो धर्मजिज्ञासे'ति।।''

## मीमांसादर्शनस्य व्याख्यातारः

महर्षिणा जैमिनिना कृतोऽयं सूत्रग्रन्थः सर्वेषां सुखबोधाय न भवति। तस्मादादौ शवरस्वामी सूत्रस्योपरि भाष्यग्रन्थं रचितवान्। तदनन्तरं मीमांसादर्शनस्य व्याख्याकाररूपेण कुमारिलभट्टपादस्य प्रभाकरगुरोः 'अपि च मुरारेस्तृतीयः' इति मुरारिमिश्रस्य नामानि श्रद्धया स्मर्तव्यानि। शावरभाष्योपरि पण्डितवर्येण कुमारिलभट्टपादेन 'श्लोकवार्त्तिकम्', 'तन्त्रवार्त्तिकम्', 'टुप्टीका' ग्रन्थाश्च विरच्य मीमांसादर्शनस्य प्राणमुज्जीवितम्। उत्तरकाले भट्टपादस्य शिष्यो

* Ramakrishna Advaita Ashrama, Varanasi

मण्डनमिश्रकृतः विधिविवेकः, भावनाविवेकः, विभ्रमविवेकः, मीमांसासूत्रानुक्रमणी ग्रन्थाः मीमांसादर्शने अमूल्यसंयोजनम्। अपि च पार्थसारथिमिश्रः, माधवाचार्यः, अप्पयदीक्षितः, खण्डदेवमिश्रः, आपोदेवः, लौगाक्षिभास्करः, कृष्णयज्वादयानां नामानि श्रद्धया स्मरमीयानि। एषां बह्वालोचिता ग्रन्थाः पार्थसारथिमिश्रकृता शास्त्रदीपिका, माधवाचार्यकृता जैमिनीयन्यायमाला, आपोदेवप्रणीतः मीमांसान्यायप्रकाशः, खण्डदेवमिश्रकृता भट्टदीपिका, लौगाक्षिभास्करकृतः अर्थसंग्रहः, कृष्णयज्वकृता मीमांसापरिभाषा, अप्पयदीक्षितकृतं विधिरसायणं तथा च नारायणद्वयीकृतः मानमेयोदयादयः ग्रन्था अवश्यमेव पठनीयाः। अपि च कृष्णनाथभट्टाचार्यमहोदयस्य 'अर्थप्रतिपादिका टीका' श्रीमत्परमहंसरामेश्वरशिवयोगिभिक्षुविरचित'मीमांसार्थसंग्रहकौमी' मीमांसाशास्त्रपठने सहायो भवति।

## संक्षेपतः अर्थसंग्रहकारालोकेन मन्त्र-विधि-नामधेय-निषेधार्थवाद-पर्यालोचनम्

मीमांसादर्शने वेदः मन्त्र-विधि-नामधेय-निषेधार्थवादभेदात् पञ्चविधः।

यदा यदनुष्ठानं प्रवर्तते तदा तदनुष्ठानविषयं स्मारयति यः स एव मन्त्रः। तस्मात् मीमांसका वदन्ति - 'प्रयोगसमवेतार्थस्मारकाः मन्त्राः'।

'तत्र अज्ञातार्थज्ञापको वेदभागो विधिः'। यथा 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति विधिवाक्यश्रवणे स्वर्गलाभाय अग्निहोत्रं यागं कर्तव्यमिति निश्चीयते। अग्निहोत्रम् अज्ञातमेव। अस्य स्वर्गसाधकत्वमपि अज्ञातम्। अग्निहोत्रयागप्रकारम् अस्य स्वर्गसाधकत्वं वेद एव ज्ञापयति। एवं वेदः स्वर्गसाधकं यागमनुष्ठातुं प्रेरयति। तस्माद् अज्ञातकर्मणि प्रेरकं वाक्यमिदं विधिवाक्यम्।

विधिस्तु चतुर्विधः – उत्पत्तिविधिः, विनियोगविधिः, अधिकारविधिः प्रयोगविधिश्चेति।

यो विधिः अज्ञातकर्मणि प्रवर्तेत स एव उत्पत्तिविधिः। 'अग्निहोत्रं जुहोति' वाक्यश्रवणादुत्तरम् अज्ञातकर्मणि अग्निहोत्रयागे पुरुषप्रवृत्तिः जायते।

यागकर्मणि यत् मुख्यानुष्ठानं तत् प्रधानयागः। गौणानुष्ठानञ्च अङ्गयागः। यागस्य मुख्यगौणकर्मबोधाय यो विधिः प्रवर्तेत स विनियोगविधिः। अर्थसंग्रहकारेणोक्तम् 'अङ्गप्रधानसम्बन्धबोधको विधिर्विनियोगविधिः'। 'दध्ना जुहोति' वाक्ये याग एव प्रधानः। 'दध्ना' इति तृतीयान्तपदेन यागेन सह दध्नः अङ्गसम्बन्धो निरूप्यते। दध्ना होमं भावयेत् इत्यर्थः सिद्ध्यति।

विनियोगविधिना कर्मविनियोगज्ञानेन फललाभाय कर्मसम्पादने शीघ्रताभावबोधको विधिः प्रयोगविधिः। अपि चाङ्गानां पौर्वापर्यक्रमबोधको विधिः प्रयोगविधिः। क्रमबोधाभावे प्रयोगो न सार्थको भवति। तस्माद् विनियोगज्ञाने सति प्रयोगक्रमोऽपि ज्ञातव्यः।

प्रयोगविधिज्ञानानन्तरं कः प्रयोगकर्ता भवेदिति प्रश्ने अधिकारविधिः वर्ण्यते 'कर्मजन्यफलस्वाम्यबोधको विधिरधिकारविधिरि'ति।

वेदस्य तृतीयभागो नामधेयभागः। प्रयोजनवदर्थविधानेन विधेः धर्मविषये अर्थवत्ता तथा प्रयोगसमवेतार्थस्मारकत्वेन मन्त्रस्य सार्थकता प्रतिपादिता। नामधेयस्य धर्मविषये प्रामाण्यं नास्ति। तस्मात् अर्थवत्तापि नास्त्येव इत्याशङ्कापनयनाय उच्यते विधिविषयीभूतधात्वर्थनिष्ठविजातीयव्यवर्तनेन विधेयार्थस्य निश्चायकत्वात् नामधेयस्य सार्थकतास्ति।

'नामधेयः' पारिभाषिकशब्दविशेषः। वेदोल्लिखितमनेकार्थशब्दस्य यागविशेषबोधे सीमितकरणं नामधेयस्य कार्यम्। यथा 'उद्भिदा यजेत पशुकामः' वाक्ये बह्वर्थविशिष्टस्य उद्भिदशब्दस्य यागविशेषे ग्रहणं नामधेयेन येन प्रकारेण सम्भवति तत्तु अस्मिन् प्रकरणे आलोचितम्।

विधिवाक्यं यथा इष्टसाधने पुरुषं प्रवर्तयति तथा निषेधवाक्यमपि अनिष्टाद् वारयति। रागतः पुरुषः कर्मणि प्रवृत्तो भवति। परन्तु अनिष्टसाधककर्म तस्य हिताय न भवति। तस्माद् अस्मिन् विभागे निषेधवाक्येन अनिष्टपरिहाराय पुरुषं प्रवर्तयति। यथा 'न कलञ्जं भक्षयेदि'त्यादिवाक्ये।

विधिप्रणयणे वेदेषु प्रशंसा निन्दा च द्विविधवाक्यमस्ति। तस्माद् अर्थसंग्रहकारेणोक्तं - 'प्राशस्त्यनिन्दान्यतरपरं वाक्यमर्थवादः'। 'वायव्यं श्वेतमालभेत भूतिकामः' इति विधिवाक्ये 'वायुर्वै क्षेपिष्ठा देवता' इति विधिशेषार्थवादः। 'वर्हिषि रजतं न देयमि'ति निषेधवाक्ये 'सोऽरोदीद् यदरोदीत् तद्रुद्रस्य रुद्रत्वमि'ति निषेधशेषार्थवादः। विस्तृतम् अर्थसंग्रहादिप्रकरणग्रन्थे द्रष्टव्यम्।

## विधेः अन्यतरः विभागः

अन्यरूपेण विधिः त्रिविधः वर्ण्यते – अपूर्वविधिः, नियमविधिः, परिसंख्याविधिश्चेति। तन्त्रवार्त्तिके भट्टपादेनोक्तं –

'विधिरत्यन्तप्राप्तौ नियमः पाक्षिके सति।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते॥' (तन्त्रवार्त्तिकम् – 1/2/4)

अर्थात् 'प्रमाणान्तरेणाप्राप्तस्य प्रापको विधिरपूर्वविधिः, यथा 'यजेत स्वर्गकामः' इत्यादिः। पक्षेऽप्राप्तस्य प्रापको विधिर्नियमविधिः, यथा 'व्रीहीनवहन्ती'त्यादि। युगपदुभयप्राप्तावितरव्यावृत्तिपरो विधिः परिसंख्याविधिः, यथा 'पञ्च पञ्चनखा भक्ष्याः' इत्यत्रार्थसंग्रहकारोक्त्या संक्षेपतः विधित्रयं प्रदर्शितम्।

मीमांसासिद्धान्तानां कतिपया विशेषाः

मरणान्तरं जीवस्यात्मा विद्यते तथा स्वर्गे स्थित्वा कर्मफलं भुञ्जते। काचित् शक्तिरस्ति या जीवानां कर्मफलानि रक्षति सा एव अपूर्वनाम्ना कथ्यते। वैदिककर्मकाण्डस्य मूलशास्त्रं वेदः न केनचित् पुरुषेण कृतम्। तस्मात् वेदः अपौरुषेयः तथा नित्यः। तथा च दृश्यमानस्य जगतः वास्तविकतास्ति। जीवस्य जीवनं तथा कर्म न तु स्वप्नमात्रमेव।

## मीमांसामतानुसारेण वेदस्यापौरुषेयत्वालोचनम्

भाष्यकारेण सायणाचार्येणोक्तम् 'इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः'। याज्ञवल्क्यस्मृतौ उक्तं –

'प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।
एनं विदन्ति वेदेन तस्माद् वेदस्य वेदता॥' इति।

वेदस्यापौरुषेयत्वमवलम्ब्य दार्शनिकसम्प्रदाये मतद्वैविध्यमस्ति। नैयायिका वेदस्य पौरुषेयत्वं स्वीकुर्वन्ति। अपि च ते तस्य अनित्यत्वं प्रकाशयन्ति। मीमांसानये वेदस्य नित्यत्वं तथा अपौरुषेयत्वं स्वीकृतम्। ते शब्दनित्यतावादिनः। यः गकारः अधुना उच्चरति स एव प्राक्तनगकारः तेनानुभूयते। गकारस्य पूर्वस्थितिसिद्धे शब्दस्यापि नित्यत्वं सिद्धं भवति।

'नित्यस्तु स्यात्' (1/1/18) तथा 'आख्याप्रवचनात्' (1/1/30) इति मीमांसासूत्राभ्याम् ऋषिभिः उच्चरितं वेदभागं तेषां नाम्ना प्रसिद्धमेव। पौरुषेयत्ववादी 'वेदवाक्यानि पौरुषेयाणि वाक्यत्वात् भारतादिवदि'ति यदनुमानं करोति तत्तु सिद्धसाधनतादोषदुष्टं भवति। अपि च 'अस्य महतो भूतस्य निःश्वसितमेतदृग्वेदो यजुर्वेदः सामवेदः' (बृ.उ. – 2/4/10) इति श्रुतौ तथा

''स्वयम्भुरेष भगवान् वेदे गीतस्त्वया पुरा।
शिवाद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न कारकाः।।
न कश्चिद् वेदकर्ता च वेदस्मर्ता पितामहः।
तमेव धर्म स्मरति मनुः कल्पान्तरान्तरे।।'' (पराशरस्मृतौ)

इति स्मृतौ च वेदस्यापौरुषेयत्वम्।

## अपूर्वत्वं मीमांसकानां मतविशेषः

मीमांसादर्शनं कर्मविषयकम्। वेदप्रतिपाद्यकर्म त्रिधा – काम्यनिषिद्ध-नित्यनैमित्तिकञ्च। येन कर्मणा स्वर्गादिकाम्यफलं लभते तत्तु काम्यकर्म। 'न कलञ्जं भक्षयेत्' इत्यादिनञर्थकवाक्ये अनिष्टफलविधायकं कलञ्जभक्षणादिकं निषेधं करोति। तस्मात् तत्तु निषिद्धकर्म इति।

किञ्चित् कर्म अस्ति यदननुष्ठानेन प्रत्यवायो भवति। प्रत्यवायनिवारणाय 'अहरहः सन्ध्यामुपासीते'त्यादिनित्यकर् मानुष्ठानविधायकं वेदवाक्यमवलम्ब्य तदनुष्ठानाय प्रयत्नं कर्तव्यम्। पर्वादिकमुपलक्ष्य अनुष्ठीयमानं कर्म नैमित्तिककर्म उच्यते।

अत्र जिज्ञासायागादिकर्मणि आज्यादिहव्यद्रव्याणि आहुतिप्रदानेन अवशेषं भस्ममेव पश्यति पुरुषः। कर्मणः अव्यवहितक्षणे फलरूपेण यदा भस्मः दृश्यते तदा तन्न कर्तव्यम्। परन्तु आज्यादिभक्षणेन शरीरपोषणमेव उचितम्। तदुत्तरे मीमांसका वदन्ति तन्न। कर्मणि अपूर्वनाम्ना पुण्यापुण्यफलमुत्पादयितुम् एका शक्तिरस्ति। तन्त्रवार्त्तिककारेणोक्तं –

'यागादेव फलं तद्धि शक्तिद्वारेण सिद्ध्यति।
सूक्ष्मशक्त्यात्मकं वा तत् फलमेवोपजायते।।' (पृ. - 365)

कुमारिलभट्टस्य मतानुसारे कर्त्रा कृतं यागादिकर्म कर्तरि शक्तिमुत्पादयति। तच्छक्तिः अपूर्वरूपेण तस्मिन् वर्तते देहपातानन्तरं तत्फलानुसारेण सः स्वर्गादिकं भुञ्जते। उक्तञ्च –

'कर्मभ्यः प्रागयोग्यस्य कर्मणः पुरुषस्य वा।
योग्यता शास्त्रगम्या या परा सापूर्वमिष्यते।।' (तन्त्रवार्त्तिकम्, पृ. – 264)

अन्विताभिधानवादिनः प्राभाकरास्तु तदपूर्वं कर्मणि स्वीकुर्वन्ति, न तु कर्तरीति विशेषः।

अपूर्वम् अनेकविधम्। तच्च उक्तं जैमिनीयन्यायमालाविस्तरे 'अपूर्वं दर्शपूर्णमासयोरनेकविधम्। फलापूर्वम्, समुदायापूर्वम्, उत्पत्त्यपूर्वम्, अङ्गापूर्वञ्चेति। येन स्वर्गम् आरभ्यते तत् फलापूर्वम्। अमावस्यायां त्रयाणां यागानामेकः

समुदायः, पौर्णमास्यामपरः। तयोर्भिन्नकालवर्तिनो संहत्य फलापूर्वारम्भायोगात् तदारम्भाय समुदायद्वयजन्यमपूर्वं कल्पनीयम्। तयोरेकैकस्य आरम्भाय एकैकसमुदायवर्तिनां त्रयाणां यागानां भिन्नक्षणवर्तित्वेन संघातापत्त्यभावात् यागत्रयजन्यानि त्रीणि उत्पत्त्यपूर्वाणि कल्पनीयानि। तेषाञ्च अङ्गोपकारमन्तरेण अनिष्पत्तेः अङ्गानां च अनेकक्षणवर्तिनां संघातासम्भवात् अङ्गापूर्वाणि कल्पनीयानी'ति (जैमिनिन्यायमाला, पृ. – 65)।

## ईश्वरस्थितिविषये मीमांसकमतम्

अन्ततः वयं मीमांसकमते ईश्वरसिद्धिं प्रदर्शयामः। चार्वाकाः ईश्वरं न स्वीकृत्यापि वेदस्य कर्ता निरूपणाय उक्तं - 'त्रयो वेदस्य कर्तारः धूर्तभण्डनिशाचराः'। नैयायिकाः ईश्वरं स्वीकुर्वन्ति। परन्तु मीमांसकास्तत्र निरपेक्षकाः। स्थानविशेषे ते बौद्धचार्वाकादिनास्तिक्यमतनिरासाय स्वमतं द्रढयन्ति। ते आदौ ईश्वरं विना वेदविहितकर्ममात्रमनुष्ठाय ऐहिकपारत्रिकफललाभाय प्रयत्नं कृतवान्। उत्तरकाले मीमांसकाचार्या ईश्वरं स्वीकृतवन्तः। ईश्वरं विना आसुरीभावबलेन मनुष्या नास्तिका भवन्ति। तस्माद् उत्तरकालीना मीमांसातन्त्रव्याख्यातारस्तेषां कृतिमध्ये ईश्वरवन्दनां कुर्वन्तीति दृश्यते –

'विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे।
श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे।। (श्लोकवार्त्तिकम्)
वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम्।।
अधिसरयूतटिनीतटमधिसाकेतां गणमधिदुधानम्। (जैमिनीन्यायमाला)
खेलनीरदनीलो बालो मे मानसे सदा भूयात्।।' (भाट्टचिन्तामणिः)

लौगाक्षिभास्करकृतः अर्थसंग्रहस्योपसंहारेऽपि 'ईश्वरार्पणबुद्ध्या क्रियमाणस्तु निःश्रेयसहेतुरि'ति वाक्ये ईश्वरः तथा निःश्रेयसत्वफलमपि मीमांसकैः स्वीकृतमिति दृश्यते।

*Invited Paper*

# अलङ्कारशास्त्रेषु प्रतिपादितं रसस्वरूपमम् : पर्यालोचनमेकम्

**Dr. Srimoyee Ghosh ***

**विषयसारः** –'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति भरतेनोक्तं नाट्यशास्त्रे। एषा उक्तिः रससूत्ररूपेण गृहीता आलङ्कारिकेषु। तत्र 'रस' इति क्षुद्रः शब्दो दृश्यते। किन्तु स शब्दो यथा दृश्यते तदर्थनिर्णयो न तावत् सरलः। तदर्थविषयं स्वीकृत्य मम्मट-विश्वनाथ-अभिनवगुप्तादय आलङ्कारिका बहुव्याख्यानानि आलोचितवन्तः, किन्तु अद्यापि मन्यते यत्तदालोचनेषु सम्पूर्णता अद्यापि न अभवत्। अधुनापि तद्विषयमधिकृत्य अलोचनावितर्कादि प्रचलति। अस्मिन् प्रबन्धे संज्ञादिनिर्णयपुरःसरं रसविषयकं तुलनात्मकमालोचनमेकं क्रियते। अत्र प्रथमो विषयस्तावत् रसशब्दस्य व्युत्पत्तिनिर्णयः, तत्परं रससंज्ञाविषये आलङ्कारिकाणां मतम्, रसानां वर्णो देवता च, रससंख्या, रसस्वरूपवैशिष्ट्यादिविषया आलङ्कारिकदिशा समुपवर्ण्य यथाशक्ति पर्यालोच्यन्ते। आनन्दवर्धनो ध्वनिभेदविशेषरूपेण रसस्य ग्रहणं करोति। तेन काव्ये ध्वनेः प्राधान्यं स्वीकृतं न तु रसस्य। विश्वनाथेन रससंज्ञाविषये रसाभासभावाभासादिनामपि ग्रहणं कृतम्। भरतः अष्टमप्रकाररसान् स्वीकरोति, किन्तु अभिनवगुप्तः स्वकीये व्याख्याने शान्तरसग्रहणं कृत्वा नवप्रकाररसान् एव स्वीकरोति। एते विषयास्तत्र संक्षेपेणालोच्यन्ते।

**Keywords-** रस्यते इति रसः, असंलक्ष्यक्रमव्यङ्गध्वनिभेदः, निर्वेदः, रससूत्रम्, आस्वाद्यधर्मता, स्वसंविदानन्दचर्वणा –व्यापाररसनीयरूपो रसः, दीप्तरसत्वं कान्ति।

तैत्तिरीयोपनिषदि एवमुक्तं –'रसो वै सः'[1]। तत्र ब्रह्मस्वरूपपर्यालोचनावसरे कथितमिदं यद् ब्रह्मस्वरूपं रसमयत्त्वमिति। किन्तु रसस्वरूपविषये तत्र न किञ्चिदपि आलोचनं प्राप्यते। लौकिकसाहित्ये प्रथमः कविः खलु वाल्मीकिः। स एव रसस्य आदिः स्रष्टा। व्याधशराघातेन क्रौञ्चवियोगघटनां संदर्श्य तस्य मनसि शोकाभाव उत्पन्नः। अस्माकं मनसि स्थायीभावरूपेण ये खलु भावाः सन्ति तेषु शोकाभावोऽन्यतमः। तद्भाववशात् तेन अकस्मादेव उच्चारितः श्लोकोऽयं- 'मा निषाद प्रतिष्ठां त्वमगमः' –इत्यादि। तत्र दृष्टो लौकिककाव्यस्य प्रथमो रसः – करुणः रस इति। तस्मादेव रामायणे शृङ्गारादिरसानामपि प्रादुर्भावः परिलक्ष्यते। रसस्वरूपविषये लक्षणव्याख्यादीनामुद्भवः अलङ्कारशास्त्रग्रन्थेषु दृश्यते।

तदालोचनविषये पथिकृद् भरतः। शारदातनयरचिते 'भावप्रकाशे' उक्तं यद् –'एवं हि नाट्यवेदेऽस्मिन् भरतेनोच्यते रसः' इति। यद्यपि राजशेखरस्तस्य 'काव्यमीमांसा' इति ग्रन्थे एवमुक्तवान् यत् रूपकानां स्रष्टा भरतस्तथा च रूपकशरीरोपादानविशेषस्य रसस्य आद्युद्गाता नन्दिकेशरः –'रूपकनिरूपणीयं भरतः, रसाधिकारिकं नन्दिकेशरः' इति।

[1] तैत्तिरीयोपनिषत् -7/2

* Assistant Teacher in Sanskrit, Chandravag Srikrishna Girls High School, Chandravag, Bagnan, Howrah

• **रसशब्दस्य व्युत्पत्तिः -** इदानीं रसशब्दस्य व्युत्पत्तिविषये किञ्चिदालोच्यते। रस्-धातोः 'अच्'-प्रत्ययेन 'घ' इति प्रत्ययेन वा रसशब्दो निष्पन्नः। पाणिनीयधातुपाठे –'रस आस्वादनस्नेहयोः' इत्युक्ते आस्वादनार्थे रस्-धातोः ग्रहणं क्रियते। सुखानन्दकृते शब्दार्थचिन्तामणिग्रन्थे रसशब्दस्य व्युत्पत्तित्रयमुच्यते- रसः .....रसयति, आस्वाद्यते। रस आस्वादने चुरादिरदन्तः। .....रस्यते, आस्वाद्यते अनेन वा। कर्मणि घञ्। अत्र सारल्येन विभागा एवं प्रदर्शयितुं शक्यन्ते –

1. रसयतीति रसः।
2. रस्यते इति रसः।
3. रस्यते अनेनेति रसः।

विश्वनाथेन साहित्यदर्पणे एवं विचारितं यत्–'रस्यते इति रसः' इति व्युत्पत्तियोगाद् भावतदाभासादयोऽपि गृह्यन्ते [2] । अर्थात् 'रस्यते इति रसः' इति व्युत्पत्त्यानुसारं – रस-भाव-रसाभास-भावाभास-भावशान्ति-भावोदय-भावसन्धि-इत्यादयः सर्वे रससंज्ञामाप्नुवन्ति। आनन्दवर्धनोऽपि असंलक्ष्यक्रमव्यङ्ग्यनामकध्वनिविशेषे एतेषां ग्रहणं कृतवान्। -

"रसभावतदाभासतत्प्रशान्त्यादिरक्रमः।
ध्वनेरात्माङ्गिभावेन भासमानो व्यवस्थितः॥"[3] इति।

काव्यप्रकाशेऽपि अनुरूपोक्तिर्लभ्यते –

"रसभावतदाभासतत्प्रशान्त्यादिरक्रमः।
भिन्नो रसाद्यलङ्कारादलङ्कार्यतया स्थितः॥"[4] इति।

तथा च साहित्यदर्पणे –

"रसभावौ तदाभासौ भावस्य प्रशमोदयौ।
सन्धिः शवलता चेति सर्वेऽपि रसनाद्रसाः॥"[5] इति।

• **रसानां संख्या** –भरतस्तस्य नाट्यशास्त्रे रत्यादिकमष्टप्रकारं स्थायीभावं स्वीकरोति –

"रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्त्तिता॥"[6] इति।

अष्टप्रकारस्थायीभावाद् अष्टप्रकाररसानां प्रादुर्भावो भवति इत्येवं मतं भरतस्य –

"शृङ्गारहास्यकरुणा रौद्रवीरभयानकाः।
वीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः॥"[7] इति।

---

[2] साहित्यदर्पणः -1/3, वृत्तिभागे।
[3] ध्वन्यालोकः -2/3.
[4] काव्यप्रकाशः -4/3.
[5] साहित्यदर्पणः -3/16.
[6] नाट्यशास्त्रम् -6/17.
[7] नाट्यशास्त्रम् -6/18.

भरतः अष्टप्रकाररसप्रसङ्गे तेषां वर्णदेवतादिविषयमपि आलोचितवान्। शृङ्गाररसस्य देवता विष्णुः, वर्णः श्यामः। हास्यरसस्य देवता प्रमथः, वर्णः श्वेतः। करुणरसस्य देवता यमः, वर्णः कपोतः। रौद्ररसस्य देवता रुद्रः, वर्णो लोहितः। वीररसस्य देवता इन्द्रः, वर्णो गौरः। भयानकरसस्य देवता कालः, वर्णः कृष्णः। वीभत्सरसस्य देवता महाकालः, वर्णो नीलः। अद्भुतरसस्य देवता ब्रह्मा, वर्णः पीतः –

" अथ वर्णाः –

श्यामो भवति शृङ्गारः, सितो हास्यः प्रकीर्तितः।
कपोतः करुणश्चैव रक्तो रौद्रः प्रकीर्तितः॥
गौरो वीरस्तु विज्ञेयः कृष्णश्चैव भयानकः।
नीलवर्णस्तु वीभत्सः पीतश्चैवाद्भुतः स्मृतः॥"[8] इति।

अथ दैवतानि –

"शृङ्गारो विष्णुदेवत्यो हास्यः प्रथमदैवतः।
रौद्रो रुद्राधिदैवत्यः करुणो यमदैवतः॥
वीभत्सस्य महाकालः कालदेवो भयानकः।
वीरो महेन्द्रदेवः स्याद्भूतो ब्रह्मदैवतः॥"[9] इति।

अभिनवगुप्तो धर्मादि-पुरुषार्थचतुष्टयेन सह रसानां सम्बन्धं प्रतिपादयति। तन्मते शृङ्गार-हास्य-रसद्वयं शृङ्गारप्रधानम्, रौद्र-करुणरसद्वयम् अर्थप्रधानम्। वीभत्स-भयानक-वीराद्भूतरसचतुष्टयं धर्मप्रधानम्। एतद्व्यतिरेकेण सः शान्तरसनामकं नवतरं रसमेकं स्वीकृतवान्। तदेव मोक्षप्रधानमिति स्वीक्रियते तेन। शान्तरसस्य स्थायीभावः शमो निर्वेदो वा। अयं रसो निवृत्तिमूलकः।

आलङ्कारिकः उद्भटोऽपि नवसंख्यकरसान् एव स्वीकृतवान् –

"शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
वीभत्साद्भुतशान्ताश्च नव नाट्ये रसाः स्मृताः॥" इति।

• **रूपस्वरूपविवेचनम्** – एतद्विषयकस्यालोचनस्य प्रारम्भो भवति भरतप्रणीते रससूत्रे। यत्र भरतेनोक्तम् –"तत्र विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" इति। यद्यपि सूत्रेऽस्मिन् रसनिष्पत्तिविषयका आलोचना दृश्यते तथापि एतत् कथितुं शक्यते यत् सूत्रमिदं रसस्वरूपविषयकम्। अभिनवगुप्तः सूत्रमिदं रसलक्षणविषयमिति कथितवान् –'...रसविषयं लक्षणसूत्रमाह' इति।

रसस्वरूपविषये नाट्यशास्त्रे भरतेन विचारितम् –'यथा नानाव्यञ्जनौषधिद्रव्यसंयोगाद्रसनिष्पत्तिर्भवति, तथा नानाभावोपगमाद्रसनिष्पत्तिः। यथा हि गुडादिभिर्द्रव्यैर्व्यञ्जनैरोषधीभिश्च षड् रसा निवर्तन्ते, एवं नानाभावोपहिता अपि स्थायिनो भावा रसत्वमाप्नुवन्तीति। अत्राह रस इति कः पदार्थः। उच्यते। आस्वादयत्वात्। कथमास्वाद्यते रसः अत्रोच्यते यथा हि नानाव्यञ्जनसंस्कृतमन्नं भुञ्जाना रसानास्वादयन्ति सुमनसः पुरुषाः हर्षादींश्चाधिगच्छन्ति तथा

[8] नाट्यशास्त्रम् -6/42-43.

[9] तत्रैव -6/44-45.

नानाभावाभिनयव्यञ्जितान् वागङ्गसत्त्वोपेतान् स्थायिभावानास्वादयन्ति सुमनसः प्रेक्षका हर्षादींश्चाधिगच्छन्ति। तस्मात् नाट्यरसा इत्यभिव्याख्याताः' [10] इति।

अत्रायं प्रश्नो रस इति संज्ञायाः प्रयोजनीयता का। तदुत्तरेण एवं कथितुं शक्यते यत् – यः आस्वाद्यधर्मयुक्तः स एव रसः। यथा नानाव्यञ्जनेन सहितमन्नम् उपभोगितुं शक्यते, तथा च रसास्वादनमपि कर्तुं शक्यते। तद्वत् रङ्गालये प्रेक्षकोऽपि वाचिकादि अभिनयसंयुक्तेन उपस्थापितं नाटकं संन्दर्श्य मनसि हर्षादिकं प्राप्नोति। हर्षादेर्जनको रसः।

अभिनवगुप्तोऽपि रसस्वरूपमेवं वर्णयति – 'शब्दसमर्प्यमाण-हृदयसंवाद-सुन्दर-विभावानुभाव-समुचितप्राग्विनिविष्टर त्यादिवासनानुरागसुकुमारस्वसंविदानन्दचर्वणाव्यपार-रसनीयरूपो रसः' इति।

आनन्दवर्धनः कथयति – नाट्यं तथा काव्यमिति कविप्रणीतविषयद्वयस्य जीवनं रसादिकं –'वृत्तयो हि रसादितात्पर्येण संनिवेशिताः। कामपि नाट्यस्य काव्यस्य च छायामावहन्ति। रसादयो हि द्वयोरपि तयोर्जीवभूताः' इति।

काव्यप्रकाशे रसस्वरूपमेवं वर्णितं –

"कारणान्यथ कार्याणि सहकारीणि यानि च।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः॥
विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः।
व्यक्तः स तैः विभावाद्यैः स्थायी भावो रसः स्मृतः॥" [11] इति।

काव्यालङ्कारसूत्रवृत्तौ वामनाचार्यो रसं काव्यगुणरूपेण स्वीकृतवान्। अस्य गुणविशेषस्य नाम कान्तिः –'दीप्तरसत्वं कान्ति' [12] इति।

साहित्यतर्पणे विश्वनाथेन ब्रह्मास्वादो हि रसास्वाद इति कथितं –

"सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः॥
लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभिः।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः॥"[13] इति।

अभिनवगुप्तः अभिनवभारत्यां नाट्यरसेन साकं काव्यरसस्याभिन्नतां प्रतिपादितवान् –'नाट्यात् समुदायरूपाद् रसा यदि वा नाट्यमेव रसाः, रससमुदयो हि नाट्यम्। न नाट्ये एव च रसाः, काव्येऽपि, नाट्यायमाने एव रसः, काव्यार्थविषये हि प्रत्यक्षकल्पसंवेदनोदये रसोदय इत्युपाध्यायाः। यदाहुः काव्यकौतुके –

"प्रयोगत्वमनापन्ने काव्येनास्वादसम्भवः इति।
वर्णनोत्कलिकाभोगप्रोढोक्त्या सम्यगर्पिताः।
उद्यानकान्ताचन्द्राद्या भावाः प्रत्यक्षवत्स्फुटाः॥" इति।

---

[10] रसविकल्पाध्यायः, नाट्यशास्त्रम्.

[11] काव्यप्रकाशः -4/4-5.

[12] काव्यालङ्कारसूत्रवृत्तिः -3/2/15.

[13] साहित्यदर्पणः -3/2-3.

अन्ये तु काव्येऽपि गुणालङ्कारसौन्दर्यातिशयकृतं रसचर्वणमाहुः। वयं तु ब्रुमः काव्यं तावन् मुख्यतो दशरूपकात्मकमेव। तत्र हि उचितैर्भाषावृत्तिकाकुनैपथ्यप्रभृतिभिः पूर्यते च रसवत्ता। सर्गबन्धादौ हि नायिकाया अपि संस्कृता एव उक्तिरित्यादि बहुतरमनुचितं केवलं शक्तिरहितत्वाद् व्यावर्ण्यते, तावतीव हृदमिति न्यायेन अनौचित्यं न प्रतिभाति। तत एव उच्यते सन्दर्भेषु दशरूपकमिति। ये स्वभावतो निर्मलमुकुरहृदयास्ते एव संसारोचितक्रोध-मोहाभिलाषपरवशमनसो न भवन्ति। तेषां तथाविधदशरूपककाकर्णनसमये साधारणरसनात्मकचर्वणग्राह्येरससञ्चयनाट्यलक्षणस्फुट एव। ये तु अतथाभूतास्तेषां प्रत्यक्षोचिततथाविधचर्वणलाभाय नटादिप्रक्रिया, स्वगतक्रोधशोकादिसङ्कट-हृदयग्रन्थिभञ्जनाय गीतादि प्रक्रिया च मुनिना विरचिता। सर्वानुग्राहकं हि शास्त्रमिति न्यायात् तेन नाट्ये एव रसा न लोके इत्यर्थः। काव्यं च नाट्यमेव'[14] इति।

अनेन संक्षिप्तरसस्वरूपविवेचनस्य निष्कर्षः सुकविनिर्मितस्य काव्यस्य नाटकस्य वा श्रवणप्रेक्षणद्वारेण सहृदयस्य भावकस्य वा मनसि (चित्ते) यत् अलौकिकानन्दस्य उत्पत्तिर्भवति तत्तु रस इति संज्ञां लभते इति मतं साहित्याचार्यैः। रसानन्द अलौकिकः इति कथ्यते। यतः अयमानन्दः इन्द्रियग्राह्येभ्यो लौकिकानन्देभ्य भिन्नतरः आत्मानन्दविशेषः। रसानुभवसमये अनुभवकर्तुर्व्यक्तिगतरागद्वेषादिविचारा दूरीभवन्ति तथा देहगतसंकीर्णताया विसर्जनेन भूमानन्द उपलभ्यते इति शम्।

**Bibliography**


अभिनवगुप्तः. अभिनवभारती. विश्वेश्वरकृतहिन्दीटीकोपेतम्. दिल्ली : दिल्लीविश्वविद्यालयः, 1996 (प्रथमसंस्करणम्).
मम्मटः. काव्यप्रकाशः. विश्वेश्वरकृतहिन्दीटीकासहितम्. वाराणसी : ज्ञानमण्डललिमिटेड्, 1960.
मम्मटः. काव्यप्रकाशः. सम्पा. हरिदत्तशास्त्री. मेरठ-2 : साहित्यभाण्डार, 1977.
दण्डी. काव्यादर्शः. वाराणसी : चौखाम्बा विद्याभवन, 1958.
भामहः. काव्यालङ्कारः. पाटना : विहारराष्ट्रभाषा परिषद्, 1962.
उद्भटः. काव्यालङ्कारसारसंग्रहः. इन्दुराजरचितलघुवृत्तिटीकोपेतः. पुणा : भाण्डारकर ओरियेण्टाल रिसार्च इन्स्टिटिउट, 1925.
वामनः. काव्यालङ्कारसूत्रवृत्तिः. वाराणसी : चौखाम्बा संस्कृत संस्थानम्, 2033(विक्रमसम्बत्).
धनञ्जयः. दशरूपकम्. सम्पा. भोलाशङ्करव्यासः. वेनारस : चौखाम्बा विद्याभवन, 1955.
आनन्दवर्धनः. ध्वन्यालोकः. सम्पा. विश्वेश्वरः. वाराणसी : ज्ञानमण्डललिमिटेड, 2028(विक्रमसम्बत्).
अभिनवगुप्तः. ध्वन्यालोकलोचन. सम्पा. जगन्नाथपाठकः. वाराणसी : चौखाम्बा विद्याभवन, 1979.
सागरनन्दी. नाटकलक्षणरत्नकोशः, वाराणसी : चौखाम्बा संस्कृत सीरीज अफिस, 1972.
सुखनन्दनाथ. शब्दार्थचिन्तामणि (चतुर्थभागः). उदयपुर : संज्ञानयन्त्रालय, 1985.
भरतः, नाट्यशास्त्रम्. सम्पा. वटुकानाथवलदेवोपाध्यायौ. वेनारस : चौखाम्बा संस्कृत सीरीज अफिस, 1929.
शारदातनयः. भावप्रकाशन. वडोदा : ओरियेण्टाल इन्स्टिटिउट, 1930.
जगन्नाथः. रसगङ्गाधरः. सम्पा. मधुसूदनशास्त्री. वेनारस हिन्दु इउनिभार्सिटि, 2020 (विक्रमसम्बत्).
कुन्तकः. वक्रोक्तिजीवितम्. वाराणसी : चौखाम्बा संस्कृत संस्थान, 2030 (विक्रमसम्बत्).
विश्वनाथः. साहित्यदर्पणः. वाराणसी : मोतिलाल वेनारसीदास, 1977.
De, Sushil Kumar. History of Sanskrit Poetics. Calcutta : Firma K.L. Mukhopadyay, 1960.
V. Raghavan. The Number of Rasas. Adyar (Madras) : Adyar Library, 1940.
Bishwanath. The Sahityadarpan. Ed.P.V. Kane. Bombay : 1951 3rd Edition.


[14] अभिनवभारती, नाट्यशास्त्रम्-6/36.

Received on 09. 06. 2017 Accepted on 24. 07. 2017

# POET DEVAMUNI:
# AS REVEALED THROUGH ARAṆYĀNĪ HYMN (RS 10.146)

**PUBALI CHAKRABORTY ***

**Abstract:**

*Literature is not mere a representation of the world created by the poet, it also explores the entity, identity and originality of the poet. The hymn to Araṇyānī is one of the poetically enriched hymns of Ṛksaṃhitā. This lovely, evocative hymn comprising only six mantras has been much interpreted and translated. This paper, seeks to explore the psyche of seer Devamuni through an analysis of his hymn being reconstructed through a comparative study of various commentaries, translations and analysis of different scholars like Yāska, Veṅkaṭa Mādhava, Sāyaṇa, R.T.H. Griffith, H.H. Wilson, Jamison & Brereton, T.G. Mainkar and Sukumari Bhattacharjee, Gouri Dharmapal and S.G. Kantawala.*

**Key Words:** Poet, Devamuni, Araṇyānī, Goddess of Wood, Hymn, Psyche.

## Introduction:

Literature is not mere a representation of the world created by the poet, it also explores the entity, identity and originality of the poet. The Vedic poets, entitled as *ṛṣi* traditionally, were not exceptional in this regard.

## Literature Reviewed

The hymn to Araṇyānī (RS 10.146) is one of the poetically enriched hymns of Ṛksaṃhitā. This lovely, evocative hymn comprising only six *mantra*s has been much interpreted and translated. Among the traditional interpreters we get Yāska's comment on the first *mantra* of this hymn. Veṅkaṭa Mādhava and Sāyaṇa have interpreted the entire hymn. The former's comments are very brief in comparison to the latter's. This hymn has been translated into English from past to present time by different translators like R.T.H. Griffith, H.H. Wilson and Jamison & Brereton. Veteran Indoligists like T.G. Mainkar and Sukumari Bhattacharji and Gouri Dharmapal have analysed this hymn from different perspectives. S.G. Kantawala has examined the different renderings of this hymn belonging to RS and TB and made a comparative study between the commentaries of traditional interpreters.

*Assistant Professor in Sanskrit, Serampore College

## The Purpose and Scheme of the Article

All reviewed literatures have dealt with the meaning of the hymn. No research has been done regarding the poet of this hymn yet so far. So, in this paper, an attempt has been made to trace out the psyche of seer Devamuni as reflected in this hymn through its analysis. Our discussion will proceed under the following heads:

A. Theme of the hymn
B. Hymn reconstructed
C. The psyche of seer Devamuni through the study of the reconstructed hymn
D. Conclusion

## A. Theme of the hymn

The theme of the hymn is going to be discussed after the interpretation of Sāyaṇa whose commentary is indispensable for the study of the Veda.

i) O! The Goddess of the Wood! You have now reached the forest for protection. Why don't you ask for the village? Does not the fear seize you, indeed?

ii) The Goddess of the Wood is magnified, when the Ciccika responds with its hoarse *cīcī* sound to the singing insect named Vṛṣarava, like a singer slurring the seven tunes on the Kāṇḍavīṇā.

iii) The animals like *gavaya* graze in the forest. The creeper and shrubs appears like houses. In the evening the Goddess of the Wood lets loose now the carts which had gone to fetch wood etc. or the Goddess of the Wood appears to let the carts.

iv) O the Goddess of the Wood! Someone residing in the forest summons a cow, someone other cuts the wood. One residing in the forest at night apprehends the sounds of several birds and animals as the screaming of thief out of fear.

v) The Goddess of the Wood does not kill anyone who resides therein unless the thieves and beasts attack him. Having eaten the luscious fruits, one can take rest there according to his will.

vi) I have praised the Goddess of the Wood who has the fragrance of musk, who is fragrant, possessed of fruit though untilled and the mother of the beasts.

## B. Hymn Reconstructed

To trace out the psyche of poet Devamuni the hymn is now going to be reconstructed here on the basis of a comparative study of various commentaries, translations and analysis of different scholars mentioned above.

In that period the Aryan settlements were encircled by deep and dense forests. People

ventured into them in daytime: the woodcutter for wood, the cowherd to pasturing of cows.[1] With the decaying rays of the setting sun all the people depart who have entered the forest in daylight.

From the psychic background of the poet the hymn seems to be started with the first two feet of the fourth verse. Before departing the cowherd summons his cows, the woodcutter collects the fuel quickly and loads them in the carts. In other days the poet also accomplishes his business in the forest before departing. But, in that particular day, darkness engulfs the entire forest before the poet departs. So, he becomes confined in the wood.

Next, comes up the third verse. The poet desirous to return home fancies that the cows are grazing here and there. The creeper and shrubs appears like home before him. He has missed the last cart. So, fancying himself as the wood he apprehends that the forest seems to dismiss the carts.

The third verse is followed by the remaining part of the fourth verse. Being compelled to dwell in the forest in the evening the poet apprehends the sounds of several birds and animals as the screaming of thief out of fear.

Thereafter, personifying the wood the poet takes her as his companion. So, on the basis of the mental journey of the poet, we place the second verse after it. In the fade light, the forest is more heard than seen. The Goddess of the forest seems to reply through the sound of *ciccika*. The different sounds in the wood appear to be the notes of music coming out from the tinkling bells of Araṇyānī[2] or to be the sounds of cymbals of Araṇyānī.[3]

To remove his loneliness he starts conversation with the Goddess of the Wood. So, the first verse containing the conversation of the poet with the Goddess of the Wood follows. He asks, O! The Goddess of the Wood! You seem to disappear from the sight. Why don't you inquire of the village? Does not fear assail you? The forest with its dark, silent mysteries and with its unintelligible night-noises has, indeed, puzzled the poet.

But, at last, the poet finds out his affectionate mother in Araṇyānī. The fifth and the sixth verse respectively comprise the concluding part of the hymn. He realises that the forest-mother never slays anybody unless some murderous enemies from outside approach the forest. The sweet-scented, redolent forest-mother untilled but enriched in food nourishes all the sylvan beings with savoury fruits and gives them shelter in her abode of peace.

1 Bhattacharji 1984: p.53.
2 Griffith (Vol II) 2004: p.590
3 Wilson (Vol VI) 1990: p.468-469.

### C. Poet's Psyche

Now, we have come to the stage to analyse the poet's psyche as reflected in different aspects of the reconstructed hymn.

At first, taking the background inspiration in our consideration we can definitely say that this poem is purely revealed out of despair, fear and peace gradually engendered in the mind of the poet after being confined in a dense, desolate forest at night.

None can adopt refined, rhetoric language on account of fear and despair. Poet Devamuni is not at all exceptional in this regard. Recalling the picture of last-minute promptness of the intruders in forest before departure in a simple language and manner and by employing the poetic figure Svabhāvokti [4] the poet successfully expresses his despair for missing the last departing cart to return village. The poetic fancies of the grazing cows, of giving farewell of the carts by him as the dismissal of the carts from forest and of the creeper and shrubs as home[5] clearly suggest the intense desire of the poet to go back home as well as his despair for not being at home. The simple touch of Utprekṣā and especially the employment of the household objects as *upamāna*, here, beautifully indicate the mental distress and despair of the poet.

The darkness gradually engulfs the whole forest and fear gradually engulfs the poet's mind. Assuming the sounds of different birds and animals as the screaming of a frightened thief [6] by means of Utprekṣā the poet clearly suggests his fear. The *upamāna* is also noteworthy here. May be he a thief but is a human being. Imagining the existence of another man in this desolate forest the poet tries to be relived from anxiety and fear.

When he cannot find out the existence of any other human being he takes the animals and insects as his companion. After that, instead of being afraid of he imagines their sounds as the music of the forest.[7] When the horrible sounds of the wild beasts and insects appear as the musical notes of the forest we can definitely assume that the poet is overcoming his fear. As the fear disappears gradually from his mind, the expressions are becoming more and more rhetoric.

Personifying the forest ultimately, the poet imagines the entity of a human being in her. With a feeling of intimate relationship the poet calls Araṇyānī and this love

4 gāmaṅgaiṣa ā hvayati dārvaṅgaiṣo apāvadhīt (RS 10.146.4.I-II)

5 uta gāva ivādantyuta veśmeva dṛśyate uto araṇyāniḥ sāyaṃ śakaṭīriva sarjati (RS 10.146.3)

6 vasannaraṇyānyāṃ sāyamakrukṣaditi manyate (RS 10.146.4.III-IV)

7 vṛṣāravāya vadate yadupāvati ciccikaḥ āghāṭīriva dhāvayannaraṇyānirmahīyate (RS 10.146.2)

is reflected in the repetition "*araṇyāni araṇyāni*".[8] The poet starts the conversation with the Goddess of the Wood in a very simple, cordial and colloquial style to build up an intimate relationship with her.[9] With a very friendly concern he asks "Does not fear possess you?"[10] In the questions addressed to the Goddess of the Wood, he superimposes his desire to return home and fear for dwelling in this unknown place upon the forest again with the employment of Utprekṣā.[11]

Two conclusive verses of this hymn clearly indicate a different mental state of the poet. The forest which had initially appeared in a terrible image before him finally comes down as the sweet-scented, redolent and benevolent mother.[12] The selection of melodious, sweet words like '*āñjanagandhim*', '*surabhim*', '*mātaram*' here also suggests the peace of mind of the poet in the abode of peace of forest-mother. Moreover, in the first four verses, we have noticed excessive employment of Utprekṣā which, undoubtedly, indicates the poet's initial fear, helplessness and indecisiveness caused by darkness. Surprisingly, in the conclusive two verses we cannot trace out any application of this poetic figure. The huge contrariety in language, theme and in employing of poetic figure in the initial and the conclusive parts of the hymn unfailingly implies that after removal of the dark cloud of fear and despair the illuminating light of hope and peace pervades in the mental sky of poet Devamuni.

**Conclusion**

In this paper, we have tried to explore the mental journey of poet Devamuni from fear to peace through his poem. Our exploration definitely leads us to draw the conclusion the spontaneous outburst of the poet's own emotion revealing the poet's inner world makes the hymn a lyrical one. Moreover, the splendid poetic figures, fascinating imageries and stunning suggestions successfully produce supernatural aesthetic delight in the mind of connoisseur and elevate the poet in a high order.

8 RS 10.146.1

9 araṇyānyaraṇyānyasau yā preva naśyasi kathā grāmaṃ na pṛcchasi na tvā bhīriva vindatī (RS 10.146.1)

10 Mainkar 1977: p.33.

11 asau yā preva naśyasi (RS 10.146.1)
na tvā bhīriva vindatī (RS 10.146.1)

12 na vā araṇyānirhantyanyaścennābhigacchati svādoḥ phalasya jagdhvāya yathākāmaṃ ni padyate (RS 10.146.5)
āñjanagandhiṃ surabhiṃ bahvannāmakṛṣīvalām
prāhaṃ mṛgāṇāṃ mātaramaraṇyānirmahīyate (RS 10.146.6)

## List of Abbriviations:

RS: Ṛksaṃhitā

TB: Taittirīya Brāhmaṇa

## Select Bibliography:


1. Anirvan. 1975(1961), 1976, 1978. *Veda Mīmāṃsā* Vol. I, II, III (in Bengali). Calcutta: Sanskrit College.
2. Bhattacharji, Sukumari. 1984. *Literature in the Vedic Age* Vol I. Calcutta: K.P. Bagchi & Company.
3. Bhattacharya, Bhabani Prasad. 2006. Schools of *Vedic Interpretation: Eastern and Western.* Kolkata: School of Vedic Studies, Rabindra Bharati University.
4. Dharmapal, Gouri. 1999. *Veder Bhāshā o Chanda* (in Bengali). Calcutta: Pashchimbanga Rajya Pustak Parshad.
5. ----,----. 2003. *Puronotun Veder Kavitā* (in Bengali). Kolkata: Ṛtam.
6. Elizarenkova, T.J. 1995. *Language and Style of the Vedic Ṛṣis. Albany*: State University of New York Press.
7. Griffith, R.T.H. 1896(2004). *The Hymns of the Ṛgveda* Vol. I & II. Delhi: Low Price Publications.
8. Guha, Ranajit. 2009. *Kabir Nam o Sarbanam* (in Bengali). Kolkata: Talpata.
9. Kantawala, S.G. 1970. The Hymn to Araṇyānī - A Study. *Journal of the Oriental Institute*, 20 (1), 1-11.
10. Mainkar, T.G. 1966. *Some Poetical Aspects of the Ṛgvedic Repetitions.* Poona: University of Poona.
11. Rahurkar, V.G. 1964. *The Seers of the Ṛgveda.* Poona: University of Poona.
12. Sarup, Lakshman. 1967. *The Nighaṇṭu and The Nirukta*. Delhi: Motilal Banarasidass Publishers Private Limited.
13. Sontakke, N.S (ed). 1995, 2001, 2005, 2014, 2005, *Ṛgvedasaṁhitā* with the Commentary of Sāyaṇācārya, Vol. I, II, III, IV &V. Pune: Vaidika Saṁśodhana Maṇḍala.
14. Varma , Mahendra Kumar. 1963. *Poetic Beauty of the Rigveda*. Damoh: S.S. Rai Varma.
15. Wilson, H.H. 1990(1977 in 6Volumes). *Ṛgvedasaṁhitā* in 7 Volumes. Delhi: Nag Publishers.
16. Winternitz, M. 1962. *A History of Indian Literature* (Vol. I Part I). Calcutta: University of Calcutta.



Received on 25. 04. 2017 Accepted on 24. 07. 2017

# चमस्किनिरूक्तभाषाधिगमनतत्त्वस्य श्रौतत्वविचारः

**DR. DEBNATH PAL ***

**शोधसारः-** *भाषाविज्ञानं हि बहुप्रसिद्धमेकं शास्त्रम्। तस्य विषयस्य शास्त्रत्वेन प्रादुर्भावो यद्यपि पाश्चात्त्ये अभूत् तथापि बहुपूर्वकालादेव तद्विषयकालोचनं निगूढं चिन्तनं भूयशः प्राच्यशास्त्रेषु दरीदृश्यते। एवं काले पाश्चात्त्यभाषाविज्ञानशास्त्रं यथा नवनवचिन्तनेन वैबृद्धिमलभत परन्तु प्राच्यशास्त्रेषु तद्विषयकचिन्तनेन सह तुलनात्मकमध्ययनं तथा न विबृद्धं जातम्। किञ्च विषयेऽस्मिन् यद्यपि तुलनात्मकाध्ययनं किञ्चित् जातं तथापि एकस्य दृष्ट्या अपरस्य समीक्षणं तथा न दृग्गोचरं भवति। प्रस्तुते अस्मिन शोधबन्धे मया तादृशः कश्चित् प्रयासः व्यधायि। प्रस्तुते बन्धे मया पाश्चात्त्यभाषातात्त्विकचमस्किनिरूक्तस्य भाषाधिगमनतत्त्वस्य प्राच्यशास्त्रदिशा पर्यालोचनमकारि ।*

**कुञ्चीशब्दाः-** *चमस्किः, भाषाधिगमनतत्त्वम्, म्यानफ्रेड्महोदयः, पूर्वप्रज्ञा, विद्याकर्मणी, प्रतिभा इत्यादयः।*

साम्प्रतं भाषाविज्ञानवियति भास्वानिव भासतेतराम् नोयाम-चमस्किमहोदयः। नोयाम-चमस्किमहोदयस्य भाषाशिक्षणविषयिणी मनस्तात्त्विकी भावनापि विश्वस्मिन् सुप्रसिद्धा। तदुदितेषु तत्त्वेषु अन्यतमतां धत्ते प्रथमभाषाधिगमनतत्त्वम्। तन्मतानुसारेण भाषाधिगमनप्रक्रिया न खलु काचित् यान्त्रीकी प्रक्रिया,परन्तु सृजनमूलिका मानसव्यापारात्मिका । तदर्थं तदीयमिदं तत्त्वं मनस्तत्त्वप्रधानतत्त्वमित्युच्यते(Mentalistic Theory) । तथाहि उक्तं तेन तदीये 'Aspects of the Theory of Syntax'इत्याख्ये ग्रन्थे –"-----one of the qualities that all languages have in common is their 'creative'aspect…..The grammar of a particular language, then, is to be supplemented by a universal grammar that accaommodates the creative aspect of language use."`[1] इति।

तथाहि भाषाशिक्षणप्रक्रियां वर्णयता तेनागादि यत् कश्चित् शिशुः यदा भुवौ पदं करोति तदा स केनचित् भाषाधिगमनमानससामर्थ्येण(Language Acqusition Device) पदं करोति। तत्फलतया तेन स्वसहजातेन भाषाधिगमनमानससामर्थ्येणैव स शिशुःप्रकरणभेदेन भिन्नभिन्नानि वाक्यान्यवगन्तुं तथा निर्मातुमलं भवति। वस्तुतस्तन्मते जन्मनःप्रभृति आजीवनं कश्चित् पुमान् असंख्यानि वाक्यानि यथाकर्णयति तथा वदत्यपि। ध्वनिमुद्रिकावत् न कोऽपि तावत् स्मृतौ श्रूतानि तानि वाक्यानि यथाकालं यथाकामं प्रकाशयितुमलम्। तर्हि कथं स्वमनोगतभावं कथमभिव्यनक्त्यसाविति चेदत्रेदं वक्तव्यं यत् स्वसहजातेन भाषाधिगमनमानससामर्थ्येणैव नवनववाक्यान्यधिगन्तुं तथा प्रयोक्तुं भवत्यलम्। तत्त्वस्यास्य तात्पर्यं सम्यक्तया प्रतिपादयता प्रोक्तं अर्वाचीनभाषातात्त्विकेन म्यानफ्रेड्महोदयेन तदीये 'Modern Linguistics' इत्याख्ये ग्रन्थे—"The theory centers on the following simple but essential observation. Whoever speaks a natural languages does not simply carry around in his head a long list of words or sentences which he has stored , but is able to form new sentences and to understand utterances he has never heard

1. Aspects of the Theory of Syntax, P-6

*Assistant Professor, Department of Sanskrit, Serampore College.

before .The command of language is thus a productive capacity , not nearly the knowledge of an extensive nomenclature….the is ,then ,mainly concerned with accounting for how sentences are generated ,and is appropriately called 'generative' grammar."[2] इति।

परिशेषे उल्लेख्यं यत् चमस्कि-महोदयोक्तं प्रथमभाषाधिगमनतत्त्वं खलु शब्दार्थदर्शनवियति मौलिकं तथाद्वितीयं तत्त्वम् । न केवलमेतत् तदभ्युपगतः 'Language Acqusition Device ' इत्यभिधेयकः सहजातभाषाधिगमनमानसव्यापारो मन्मते पाच्यशास्त्रस्वीकृतव्याकरणादिशक्तिग्रहोपायानामुपायकल्प्य एव। कथमिति चेदत्रेदं वक्तव्यं यत् वस्तुतः सहजातभाषाधिगमनमानससामर्थ्यं द्वारीकृत्यैव कश्चित् व्युत्पित्सुर्बालो व्याकरणादिशक्तिग्राहकेन स्वबुभुत्सितार्थे शक्तिं निर्धारयति।

किञ्च चमस्किमहाभागनिरुक्तं भाषाधिगमनतत्त्वं खलु श्रुतिमूलम् अपि। कथमिति चेदत्तेदं वक्तव्यं यत् बृहदारण्यकोपनिषदाम्नाता 'तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चे'[3] ति पङ्क्तिरेव प्रमाणपदवीमध्यास्ते। जीवस्य देहान्तकाले निखिलेषु इन्द्रियेषु विनष्टेष्वपि विद्याकर्मपूर्वप्रज्ञानां विनाशो न जायते। परन्तु तत् त्रितयं परलोकगामिनं जीवमनुवर्तते।

ननूक्तेषु तत्त्वेषु किंस्वरूपा तावत् पूर्वप्रज्ञेति जिज्ञासायामुक्तं शङ्करभगवत्पादेन तदीये भाष्ये तत्पदतात्पर्यं प्रतिपादयता – "पूर्वप्रज्ञा च पूर्वानुभूतविषया प्रज्ञा पूर्वप्रज्ञा अतीतकर्मफलानुभववासनेत्यर्थः। सा च वासना अपूर्वकर्मारम्भे कर्मविपाके चाङ्गं भवति, तेनासावपि अन्वारभते , न हि तया वासनया विना कर्म कर्तुं फलञ्चोपभोक्तुं शक्यते, न हि अनभ्यस्ते विषये कौशलमिन्द्रियाणां भवति , पूर्वानुभववासनाप्रवृत्तानां तु इन्द्रियाणामिहाभ्यासमन्तरेण कौशलमुत्पद्यते । दृश्यते च केषाञ्चित् कासुचित् क्रियासु चित्रकर्मादिलक्षणासु विनैवेहाभ्यासेन जन्मत एव कौशलम्। कासुचिदत्यन्तसौकर्ययुक्तास्वपि अकौशलं केषाञ्चित्। तथा विषयोपभोगेषु स्वभावत एव केषाञ्चित् कौशलाकौशले दृश्येते। तच्चैतत् सर्वं पूर्वप्रज्ञोद्भवानुद्भवनिमित्तम्, तेन पूर्वप्रज्ञया विना कर्मणि वा फलोपभोगे वा न कस्यचित् प्रवृत्तिरुत्पद्यते"[4] इति।

अत्रेदमुल्लेख्यं यत् मन्मते पूर्वजन्मार्जितपूर्वप्रज्ञावलात् कश्चित् पुमान् तादृशभाषाधिगमनमानससामर्थ्यवान् जायते जातमात्रमेव । तत्फलतया कश्चित् शिशुरनायासेनैव मातृभाषामधिगच्छति। एवं क्रमेण तेनासौ स्वसहजातेन भाषाधिगमनमानससामर्थ्येणैव प्रकरणभेदेन भिन्नभिन्नानि वाक्यान्यवगन्तुं तथा निर्मातुमलं भवति। तस्मात्तत्त्वमिदं श्रुतिमूलमिति निर्विवादम्।

किञ्च मन्मते भर्तृहरिस्वीकृतप्रतिभातत्वं चमस्किमहोदयनिरुक्तसहजातभाषाधिगमनमानससामर्थ्यतत्त्वेन खलु तुलामुपयाति। कथमिति चेदत्रेदं वक्तव्यं यत् हरिमते प्रतिभावलादेव मनुजाः वाक्यार्थावबोधे भवन्ति शक्ताः। न केवलेतत् तन्मते सा पुनः सर्वव्यवहारदीपिन्यपि ।

ननु केयं प्रतिभेति चेदत्रेदं वक्तव्यं यत् प्रत्यात्मवृत्तिरपीयं इदमित्थमित्यनिर्धारितस्वरूपा तथासमाख्येया। किञ्च वह्निनिष्ठदाहानुकूलाशक्तिरिव असंसृष्टानां पदार्थानामुपश्लेषं संसर्गमियमेव बोधयति।किञ्चाभिव्यञ्जकत्वेन प्रतिभानिष्ठा एव पदार्थाः साफल्यं भजन्ते। तदुक्तं तत्रैव तेन

2 Modern Linguistics, PP-45-46,

3 बृहदारण्यकोपनिषद्-पृ-(४/४/२)

4 शाङ्करभाष्यम्, बृहदारण्यकोपनिषद्(४/४/२)

इदं तदिति सान्येषामनाख्येया कथञ्चन।
प्रत्यात्मवृत्तिसिद्धा सा कर्त्रापि न निरूप्यते॥
उपश्लेषमिवार्थानां सा करोत्यविचारिता।
सार्वरूप्यमिवापन्ना विषयत्वेन वर्तते॥ [5] इति।

किञ्चेयं प्रतिभा पुनःसर्वव्यवहारनिदानरूपा।न केवलमेतदियं पुन हरिमते जन्मान्तराभ्यासहेतुकापि।तदुक्तं तेन तत्रैव

स्वरवृत्तिं विकुरुते मधौ पुंस्कोकिलस्य कः।
जन्त्वादयःकुलायादिकरणे केन शिक्षिताः॥[6] इति।

अस्येदमेव तात्पर्यं यत् मधुमासे पुंस्कोकिलः स्वप्रतिभामाहात्म्यादेव पञ्चमस्वररावी भवति, न तु तत्र शिक्षारूपो यत्नोऽपेक्ष्यते। एवं लूताजन्तूनां कुलायरचना पुनः प्रतिभामाहात्म्यादेव दृश्यते।किञ्चेयं प्रतिभा पुन जन्मान्तराभ्यासहेतुकत्वात् न श्रुत्याम्नातपूर्वप्रज्ञातो विलक्षणा।तस्मात् सा चमस्किमहोदयनिरुक्त सहजात भाषाधिगमनमानस सामर्थ्यसदृशा इत्यपि वक्तुं शक्यम्।

एवमुपर्युक्तालोचनेन एतदवसीयते यत् भर्तृहरिस्वीकृतप्रतिभातत्वं चमस्किमहोदयनिरुक्तसहजातभाषाधिगमनमानससामर्थ्यतत्त्वेन अनेकत्र साम्यं धत्ते। तथापि एतदवश्यमभ्युपेयं यत् चमस्किमहोदयेन यथा मनस्तात्त्विकविश्लेषणेन जीवनविज्ञानविश्लेषणेन च सह भाषाधिगमनमानससामर्थ्यतत्त्वं प्रत्यपादि न तथा प्रत्यपादि भर्तृहरिणा।तेन दार्शिनिकदृशा तदीयं तत्त्वं प्रत्यपादि,यत् पुन चमस्किनिरूक्ते मते नोपलभ्यते। तस्मात् मन्मते चमस्किमहोदयनिरुक्तं मतं मनस्तत्त्वविज्ञानजीवनविज्ञानभित्तिकत्त्वात् तथा श्रुतिमूलत्त्वाच्च सर्वैः सादरं प्राच्यपाश्चात्त्याविशेषैरभ्युपेयम्।

नन्वत्र प्रश्नस्तु स्वाभाविको यत् शोधेस्मिन् किं प्रतिपाद्यमिति चेदत्रेदं वक्तव्यं यत् प्राच्यदिशा पाश्चात्त्यमतसमीक्षणमेव प्रतिपाद्यम्। वस्तुतः शक्तिग्रहविषयमाधारीकृत्य प्राच्यशास्त्रेषु यथा बहुविधानि मतानि उपलभ्यन्ते तथैवोपलभ्यन्ते पाश्चात्त्यशास्त्रेषु अपि। लक्ष्यभेदात् उभयेषां मतप्रतिपादनशैली अपि मिथो बेभिद्यते। तत्फलतया तयोर्साम्यप्रतिपादनमपि दुष्करम्। परन्तु मन्मते तन्नासम्भवम्। तस्मात् प्रस्तुते बन्धे मया प्राच्यदर्शनदिशा पाश्चात्त्यमतं पर्यालोचितम्।

परिशेषे उल्लेख्यं यत् शोधबन्धेऽस्मिन् ये सिद्धान्ताः प्रदत्ताः ते त्वन्तिमा इति मे मतिर्न।किञ्च नवीनानां सिद्धान्तानामुपरि निरपेक्षदृशा विदुषां पुनः पुनः विचारः आवश्यकः।तेन शक्तिग्रहविषयिणी चर्चा अव्याहता सती स्वकलेवरं वर्धयन्ती विराजतेतमात् इति शम्।

---

[5] वाक्यपदीयम्, का-१४४,१४५

[6] तत्रैव, का-१४९

**परिशीलितग्रन्थसूची**


1) *बृहदारण्यकोपनिषत्(शाङ्करभाष्यसमेतम्),गीताप्रेस,गोरक्षपुर,२०१४।*

2) *वाक्यपदीयम् (तृतीयकाण्डात्मकम्), के. सुब्रह्मण्य ऐयर्-सम्पादितम्, डेक्कन कलेज, पोष्टग्रेजुयेट् एण्ड रिसर्च इन्स्टीट्यूट्, पूना, १८७३।*

3) *वाक्यपदीयम् (तृतीयकाण्डात्मकम्), रघुनाथशर्मसम्पादितम्, संपूर्णानन्दसंस्कृतविश्वविद्यालयः, द्वितीयसंस्करणम्, १९९१।*

4) *Chomsky,Noam, Aspects of the Theory of Syntax,The M.I.TPress,Massachusetts,1976.*

5) *Bierwisch,Manfred, Modern Linguistics,The Hague,Paris,1971.*

6) শ, রামেশ্বর, সাধারণ ভাষাবিজ্ঞান ও বাংলা ভাষা, পুস্তকবিপণি, কোলকাতা,১৯৯৬।



Received on 25. 04. 2017 Accepted on 24. 07. 2017

# Defending the Validity of Pramana : An Introduction

**Dr Sankar Chatterjee ***

**Abstract**

*Philosophy may not be developed without a basic theory of Pramana. The fact of Pramana is very much recognized by the different systems of Indian Philosophy. But Gautama, writer of Nyayasutra, has recorded many objections in this regard . Therefore possibility and validity of pramana is very much necessary. In fact a Pramana indicates an object to be of a specific nature and of a particular kind. An object is known with the aid of a Pramana. In this regards an object is known with the aid of a pramana only, On the other hand, it is to be admitted that a pramana is something distinct from a pseudo-pramana . Gautama has explained the Pranmana elaborately in his Nyaya-Sutra. Vatsyayana also proposes to defend the validity of Pramana according to Gautama.*

**Key Words:**

Gautama, Pramāṇa, Nāṭyasūtra, Vātsāyana, Pramāṇābhāsa.

The importance and indispensability of pramana in a system of logic and philosophy can hardly be over emphasized . It is almost inconceivable that a true system of logic or philosophy may not be developed without a basic theory of pramana. The fact is very much recognized by the different systems of Indian Philosophy, one of the most generally accepted principles is “manadhina meyasiddhih”. Accordingly, it is found that different systems develop their own concept of pramana including its classification .

It is, however, not to be assumed that there is, in Indian Philosophy , no opposition to pramana. Although the supremacy of pramana is accepted by the greater majority, there is also a strong antagonism, in both early and late periods , to the very concept of pramana and its capability of yielding true knowledge.For example, in the Nyayasutra, possibly the earliest extant text on Indian logic, the author has recorded many objections in this regard devoting a whole section to the problem . The main

* Assistant Professor and Officer-in-Charge, Government General Degree College at Kalna-I

concern of the famous Buddhist philosopher , Nagarjuna, is , as he himself calls it, pramana–vidhvamsana or the absolute demolition of pramana. The tradition is continued, with much sophistication, though from a different standpoint, by the later scholastic philosophers like Sriharsa and Citsukha (1) .

In view of all this, it becomes necessary for the believers in pramana to defend first the possibility and validity of pramana itself . However, it is also a fact that of all the systems of Indian Philosophy the Nyaya of Gautama alone concerns itself with the problem with great seriousness. This is because pramana is one of the major topics that constitute the unique subject-matter of the Nyaya .The Nyayasutra opens with the statement that the highest good is to be attained through the right understanding of the nature of sixteen special categories (padartha ), which in fact is the primary aim sought to be achieved by the composition of the work . In the list of categories pramana occupies the first and foremost position (2) .

Following his general plan for the discussion of the categories , Gautame critically examines pramana in a separate section , like most of the other categories , in the second chapter of his of his work . Vatsyayana , the author of the Bhasya , however , starts with the very defence of Pramana , with an introduction , offering his own arguments , before entering into the actual explanation of the of the sutras. So we shall first try to understand briefly the position of Vatsyayana and also note subsequently the objections and the answers as given by Gautama .

Vatsyayana says that successful activity results when an object (artha) is cognized by a pramana ; as such , pramana must be connected with the object (arthavat ) .An object is not rightly known without a pramana and without the right knowledge of an object , there is no successful activity either . A person cognizes an object with the aid of a pramana alone and then becomes desirous of either obtaining or voiding that object.The specific effort on the part of that of person who is promoted to action because of either a desire to obtain the object or a desire to avoid the object is called activity (pravrtti). Success of an activity means its actual connection with the result (phala) aimed at. A person who thus exerts himself either obtains or avoids the object .

These remarks of Vatsyayana are in fact directed against an opponent.The objection presupposed here is that the right knowledge of the categories (which according to Gautama leads to highest good) is impossible.The categories, if rightly known at all, can be known with the aid of pramana only. Such a right knowledge of the

categories, however, presupposes the right knowledge of pramana itself. But the right knowledge of pramana is impossible because there is no way to ascertain it's validity. It cannot be claimed that whatever yields awareness is a pramana , for in that case the sources of errors also would have to be considered a pramana . It may be pointed out that pramana is the instrument , not of awareness as such, but of right awareness only .But even after an awareness in respect of an object has been produced , there is nothing by means of which it can be concluded for certain that this awareness is valid.Therefore,it is not possible to ascertain validity or pramanya which constitutes the very essence of pramana .

As against the above, Vatsyayana contends that it is not impossible to ascertain the validity of pramana . It can in fact be ascertained by an inference . In his very first statement, Vatsyayana gives us the inference, namely "pravrttisamarthyat arthavat pramanam" . The expression arthavat is derived from the term artha with the addition of the suffix matup in the sence of constant connection (nitya-yoga). Here constant connection with an object means non-deviation (avyabhicarita ), and thus the word arthavat comes to mean what is non-deviating in respect of an object. A pramana indicates an object to be of a specific nature and of a particular kind . The object to be of a specific nature and of a particular kind ; the object , in reality also , is exactly of the same nature and of the same kind , there being no exception to this , and this is what is meant by the non-deviation of a pramana in respect of an object . In other words, the probandum (sadhya) of the infrence –the property sought to be inferred in relation to pramana , is the said non-deviation in respect of an object .

Indicating the probans establishing the probandum.Vatsyayana says : "pravrtti-samarthyat". Vacaspati Misra, the author of the Tatparyatika, explains its meaning as : "samartha pravrttijanakatvat". That is, since a pramana gives rise to successful activity , it must be non-deviating in respect of the object it indicates . success of an activity means connection with the result , that is, fruitfulness. Thus ,successful activity (samartha-pravrtti) finally means a 'fruitfull activity '(saphala pravrtti). But a pramana does not give rise to a fruitful activity directly. Vatsyayana , therefore adds before hand : "pramanatorthapratipattau" . That is the awareness of an object , becomes desirous of either obtaining or avoiding it , one's activity concerning either the obtainment or the avoidance of that object becomes fruitful, for in such a case the object indicated by the pramana exists in reality in the same manner (as has been pointed out by the pramana ). However , with the aid of what is not really

a pramana –but what only simulates a pramana and is accordingly known as a pramanabhasa (pseudopramana) -one acquires nothing but an illusory cognition and as such, the thing which stands for the object of such a cognition does not actually exist there . For instance , when one perceives a piece of rope as a snake , the object of that illusory perception , the snake , not being there in reality , one's activity concerning either the obtainment or the avoidance of the snake does not become fruitful .

In short, the main point is that only when an object is known with the aid of a pramana, the said forms of activity concerning that object become fruitful. Therefore, latter, with the help of the inference mentioned above it is established that a pramana is non deviating in respect of its object. If it were deviating (vyabhicarin) in respect of its object , it would not have given rise to fruitful activity, just like a pramanabhasa , for instance. In this way, with the aid of a 'negative instance (vystireki-drstanta), it is established by a 'negative probans' (vyatireki-hetu) that a pramana has constant 'connection with an object' (arthavattva).This constant connection with an object,constitutes its validity (pramanya ) or the 'unique property '(asadharna –dharma) of a pramana .

It is naturally be asked , how would it be possible to ascertain the validity of that particular inference itself on the basis of which Vatsyayana claims to establish the validity of pramana in general ? It can not be said to be valid by itself. In that case , this very inference would be useless, because all the sources of the knowledge may similarly be considered valid by themselves .If, on the other hand, a further inference is pointed to for the purpose, what would then establish the validity of second inference ? In this way , there would result doubt regarding the validity of each and every subsequent inference , with the result that due to infinite regress it would not be possible to prove validity of the very first inference .

In reply to the above ,it has been pointed out that a doubt concerning validity is not necessarily produced in the case of each and every inference . Time is inferred with the help of a watch and following it , innumerable acts are performed everywhere . So many conclusions are arrived at by inferences proceeding on the basis of mathematical calculations and experiments are carried out in accordance with them. So many facts of the remote past are inferentially doter mined by studying the ancient inscriptions etc. But in these cases ,in each and every inference invariably ten contested by a doubt concerning its validity .

Moreover , even if one admits the possibility of a doubt in each and every case , one has also got to cite some cause for such a doubt . but the moment one goes on to explain the ground for the production of a doubt , one has also got to admit the validity of some inference at least. If the cause of doubt cited by one is not established by a valid ground , it should be considered as non-existing. Thus, it is impossible to deny that there may be cases of inference concerning the validity of which no doubt ever arises, and on the basis of which the daily activities of the general people are carried on. It would be absurd to claim that everywhere the activities and practices of the general people proceed only on the basis of conjectural knowledge (sambhavanatmaka–jnana) and no one is ever led to activity on the basis of definite knowledge (niscayatmaka-jnana).Even the skeptic himself cannot deny this fact , for he himself engages in activities in the same manner . It is true that in many cases the definite knowledge arrived at by a person suffering from an illusion turns out to be false ; still , such a false cognition even does not represent any form of doubt .

Besides, if anybody is ever confronted with a doubt that (in the inference) put forward by Vatsyayana (for proving the validity of pramana in general) the probans may be deviating, he may remove it by a reductio (tarka) in the form : if the capability of production fruitful activity be deviating in respect of having connection with the object . In other words, if the capability of producing fruitful activity be present even in what is not non deviating, but is really deviating, in respect of the object let such capability be present even in a pseudo-pramana . That is, let even a pseudo–pramana which is only the cause of illusory knowledge give rise to fruitful activity. With the help of a reductio in the form of such an absurdity, it is determined that the probans that a pramana is non deviating in respect of the object it indicates .Because it is known for certain that a pseudo –pramana does not give rise to fruitful activity . Therefore , it is to be admitted that a pramana is something distinct from a pseudo-pramana .The distinctive feature of a pramana is its non-deviation in respect of the object indicated, which may therefore be said to constitute its validity (pramanya ,literally pramana-hood ) .

Gautama proposes to defend the validity of Pramana . Vatsyayana also discuss this matter according to Nyayasutra of Gautama .

## Notes

1. For example , Vaidalyasutra,Khandanakhandakhadya, Yattvapradipika etc.

2. Nyayasuta 1.1.1.

## Bibliography

1. Dasgupta Surendranath, 1975, *A History of Indian Philosophy*, Delhi, Motilal Banarsidass

2. Chattopadhya Debiprasad and Gangopadhyaya Mrinalkanti, 1967-1976, *Nyaya Philosophy,* Calcutta, Indian Studies :Past and Present

3. Vidyabhushana Satis Chandra, 1949, *A History of Indian Logic,* Delhi, Motilal Banarsidass

Received on 09. 06. 2017 Accepted on 24. 07. 2017

# प्रातिशाख्यानां शिक्षास्वरूपत्वनिर्णयः

**Mrinal Chandra das***

विषयसारः-

इदमनस्वीकार्यं यत् वेदस्वरूपरक्षणाय शिक्षाव्याकरणादीनां यावद् माहात्म्यं विद्यते प्रातिशाख्यानां न किञ्चिदपि न्यूनम्। 'शिक्षयति या सा शिक्षा'- इत्येव शिक्षायाः व्युत्पत्तिः। उच्चारणभिन्नत्ववशात् वेदशब्दोच्चारणे पार्थक्यं परिलक्ष्यते। तस्मात् पूर्वकाले (वैदिकयुगे) बहुसम्प्रदायविशेषाणां प्रादुर्भाव अभवत्। शिक्षाग्रन्थे उच्चारणतत्त्वस्य ध्वनितत्त्वस्य वा सामान्यरूपं परिलक्ष्यते। किन्तु प्रातिशाख्येषु शाखानुसारं ध्वनितत्त्वानुशीलनं प्रदर्श्यते। प्रातिशाख्यग्रन्थानां नामान्तराण्यपि प्राप्यन्ते- पार्षदसूत्रम्, चरणग्रन्थः चेति। शिक्षाव्याकरणादयः वेदसामान्याध्ययनविषयकाः, प्रातिशाख्यानि वेदशाखाविशेषाध्ययनविषयकानि। प्रातिशाख्येषु शाखाविशेषमधिकृत्य तत्सम्पर्कितानि यानि आलोचनानि प्राप्यन्ते तत्तु शिक्षाव्याकरणादिषु न प्राप्यन्ते। अतः कथयितुं शक्यते यत् प्रातिशाख्यग्रन्थाः व्याकरणादिवेदाङ्गशास्त्रेभ्योऽपि वेदस्यान्तरङ्गाः। तस्मात् वेदोस्योपकारित्वं परिलक्ष्य तेषां वेदाङ्गत्वमवश्यमेव स्वीकरणीयम्।विष्णुमित्रेण कथितं यत्- शिक्षाशास्त्रोपदेशार्थं शौनकेन ऋग्वेदप्रातिशाख्यस्य रचना कृता। अतः वाजसनेयि-तैत्तिरीय-सामतन्त्रादिग्रन्थाः प्रातिशाख्यरूपेण स्वीक्रियन्ते चेत्, तर्हि तेषामपि शिक्षाविषयत्वनिश्चये न कोऽपि सन्देहावकाशः।

Keywords: - अध्यनभेद एव शाखाभेदनिदानम्, Siksa general phonetics, Pratisakhya applied phonetics, शाकलवास्कलकात्मकशाखाद्वयविषयं प्रातिशाख्यं प्रसिद्धम्, पार्षदसूत्रम्, चरणग्रन्थः, व्याकरणप्रधानत्वात् प्रातिशाख्यस्य।

प्रातिशाख्यानां शिक्षास्वरूपत्वविषये विविधं मतपार्थक्यं विद्यते।केचन मन्यन्ते यत् – शिक्षावेदाङ्गे प्रातिशाख्यानां ग्रहणं न कर्तव्यम्। यतः षड्वेदाङ्गेषु प्रातिशाख्यशब्दस्योल्लेखः न विद्यते इति कृत्वा तन्न वेदाङ्गेषु ग्रहीतव्यम्। किन्तु, इदमनस्वीकार्यं यत् वेदस्वरूपरक्षणाय शिक्षाव्याकरणादीनां यावद् माहात्म्यं विद्यते प्रातिशाख्यानां न किञ्चिदपि न्यूनम्।

'शिक्षयति या सा शिक्षा'-इत्येव शिक्षायाः व्युत्पत्तिः। पाणिनीयशिक्षायाः पञ्जिकाव्याख्यायाम् एतदुच्यते यत् – 'शिक्ष्यतेऽनया वर्णोच्चारणमिति शिक्षा'[1] इति। आपस्तम्बधर्मसूत्रस्य व्याख्यायां 'उज्ज्वलावृत्तौ' हरदत्तेन कथितं – 'शीक्षा वर्णानां स्थानप्रयत्नादिकमध्ययनकाले कर्माणि च मन्त्राणामुच्चारणप्रकारं शिक्षयतीति,

1 पञ्जिका, पाणिनीय शिक्षा – 1।

*Assistant Professor, Department of Sanskrit, Gaurbanga University

पृषोदरादित्वाद् दीर्घः' इति।[2] शुक्रनीतौ तल्लक्षणेन कथितं यत् –'स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः सवनाद्यैश्च सा शिक्षा वर्णानां पाठशिक्षणात्'[3] इति। विन्तारनित्स्महोदयेण शिक्षाशब्दस्यार्थविषये एतदुक्तं यत्- 'Siksa actually means "Instruction, then the particular instruction is reciting , i.e., in correct pronunciation, accentuation etc. of the samhita texts."[4] इति।

उच्चारणभिन्नत्ववशात् वेदशब्दोच्चारणे पार्थक्यं परिलक्ष्यते। तस्मात् पूर्वकाले (वैदिकयुगे) बहुसम्प्रदायविशेषाणां प्रादुर्भाव अभवत्। तद्विषये 'ऐतरेयालोचनम्' इति एतन्नामके संस्कृतग्रन्थे सत्यव्रतमहोदयेनोक्तं यत्-

'अध्यनभेद एव शाखाभेदनिदानं न तु ग्रन्थभेद इति। एकैकवेदस्य अनेकशाखात्वेऽपि तात्त्विकभेदाभावात्'।

शिक्षाग्रन्थे उच्चारणतत्त्वस्य ध्वनितत्त्वस्य वा सामान्यरूपं परिलक्ष्यते। किन्तु प्रातिशाख्येषु शाखानुसारं ध्वनितत्त्वानुशीलनं प्रदर्श्यते। एतद्विषयः सिद्धेश्वरभर्मा-महोदयेनापि तदीये ग्रन्थे उल्लिखितः –" The Scope of Siksa was further developed into general phonetics. We find the term used in this sense in the Vaj. Prat., which speaks of the sounds prescribed by the Siksa, and further specifies those sounds as treated in the Vaj. School. As will be presently shown, Siksa implied general phonetics while Pratisakhya signified applied phonetics. In the second stage, then, Siksa emerged from a school master's vocation to those general principles of phonetics which were further applied by the pratisakhyas to the various vedic texts with which they were concerned. "[5] इति। प्रातिशाख्यसंज्ञां प्रदाय सायणेन कथितं – 'प्रतिशाखायां भवं प्रातिशाख्यम्' इति। वैदिकाभरणभाष्ये भाष्यकारेण गोपालयज्वामहोदयेनोक्तं यत्-'नन्वेवमनेकशाखाविषयत्वे प्रातिशाख्यमिति ग्रन्थस्य आख्या विरुद्ध्यते। नैतदस्ति। द्वित्रिशाखाविषयत्वेऽपि तदसाधारणतया उपपत्तेः। तथा बह्वृचानां शाकलवास्कलकात्मकशाखाद्वयविषयं प्रातिशाख्यं प्रसिद्धम्'[6] इति। अनन्तभट्टेन शुक्लयजुर्वेद प्रातिशाख्यभूमिकायां स्वव्याख्यायां एवमुक्तं यत् 'शाखायां शाखायां प्रति प्रतिशाख्यम्, प्रतिशाख्यं भवम् इति प्रातिशाख्यम् इति समख्यया समपादाहरणलाभेन च माध्यन्दिनीयशाखीयमेवेदं प्रातिशाख्यमिति गम्यते'[7]। निरुक्तग्रन्थस्य दुर्गाचार्यवृत्तौ एतद् कथितं यत् – 'शाखेव शाख्यः, शाखादिभ्यो यः (पा. 5/3/200) इति इवार्थे यः। शाख्यं शाख्यं प्रति इति प्रतिशाखम्, वीप्सायां अव्ययं विभक्ति...... इत्यादिना अव्ययीभावः। तदधिकृत्य कृतं प्रातिशाख्यम्। अधिकृत्य कृते ग्रन्थे..... (पा. 4/3/87)इत्यर्थे शैशिकोऽण् इति। प्रातिशाख्य + अण् – प्रातिशाख्य इति'।

प्रातिशाख्यग्रन्थानां नामान्तराण्यपि प्राप्यन्ते- पार्षदसूत्रम्, चरणग्रन्थः चेति। स्कन्दस्वामिना कथितं –

2 उज्ज्वलावृत्तिः, आपस्तम्बधर्मसूत्रम् – 11/8/2 ।

3 शुक्रनीतिः – 82-81/4/4 ।

4 M. Winternitz, History of Indian Literature – Vol. I, page. 282.

5 Siddheswar Varma, Critical Studies in the Phonetics Observations of Indian Grammarians, Page. 5.

6 तैत्तिरीयप्रातिशाख्यम्- 11/4 सूत्रस्थं वैदिकाभरणम्।

7 वाजसनोयि-प्रातिशाख्यम्- 1/1. सूत्रस्थ मनन्तभट्टभाष्यम्।

‘पार्षदानि स्वस्यां स्वस्यां पर्षदि भवानि पार्षदानि प्रातिशाख्यान्युच्यन्ते’[8] इति। चरणशब्दस्य व्याख्यायां दुर्गाचार्येण कथितं – ‘चरणान्यत्र शाखाः’[9] इति। अतः एतद् स्पष्टं यत् – शिक्षाव्याकरणादयः वेदसामान्याध्ययनविषयकाः, प्रातिशाख्यानि वेदशाखाविशेषाध्ययनविषयकानि। प्रातिशाख्येषु शाखाविशेषमधिकृत्य तत्सम्पर्कितानि यानि आलोचनानि प्राप्यन्ते तत्तु शिक्षाव्याकरणादिषु न प्राप्यन्ते। अतः कथयितुं शक्यते यत् प्रातिशाख्यग्रन्थाः व्याकरणादिवेदाङ्गशास्त्रेभ्योऽपि वेदस्यान्तरङ्गाः। अतः वेदोस्योपकारित्वं परिलक्ष्य तेषां वेदाङ्गत्वमवश्यमेव स्वीकरणीयम्।

वाजसनेयिप्रातिशाख्ये प्राप्तस्य ‘वृद्धं वृद्धिः’[10] इति सूत्रस्य व्याख्यायां भाष्यकारेणोवटेनोक्तं यत्- ‘वृद्धमिदं शास्त्रमन्यानि शास्त्राण्यपेक्ष्य , शिक्षाविहितं चास्मिन् शास्त्रे उभयं यतः प्रक्रियते। अत एव हेतोः शिक्षाणामेतच्छास्त्रश्राविणां वृद्धिर्भवति’[11] इति। तैत्तिरीयप्रातिशाख्यस्य वैदिकाभरणव्याख्यायां प्रातिशाख्यानां व्याकरणस्यापरपर्यायत्वं सूच्यते- ‘शीक्षाव्याकरणानां यदयं विवरणात्मकः। ग्रन्थस्ततोऽत्र नातीवशब्दसङ्कोच ईष्यते’[12] इति। ‘व्याकरणप्रधानं ह्येतच्छास्त्रम्’[13] इति।

‘व्याकरणप्रधानत्वात् प्रातिशाख्यस्य’[14] इति च।

वाजसनेयिप्रातिशाख्यस्य भाष्यकारेण उवटेनोक्तं- प्रातिशाख्येषु शिक्षाव्याकरणयोः उभयोरेव विषयः प्रतिपाद्यते। किन्तु तैत्तिरीयप्रातिशाख्यस्य वैदिकाभरणभाष्ये तु प्रातिशाख्यानां केवलं शिक्षाविषयत्वमेव स्वीकृतम्। विषयेऽस्मिन् अस्माभिः मन्यते यत् – प्रातिशाख्यग्रन्थानां मूलप्रतिपाद्यविषयः ध्वनितत्त्वमेव। वर्ण-स्वर-सन्धि-णत्व-षत्व-छन्दः-प्रभृतिविषयालोचनसमये प्रसङ्गक्रमेण क्वचिद् क्वचिद् शब्दानुशासनालोचनदर्शनेऽपि तत्र उच्चारणप्रधानध्वनितत्त्वालोचनमेव प्राधान्यमाप्नोति। अतः प्रातिशाख्यग्रन्थानां गणनं ध्वनिशास्त्रप्रधाने शिक्षाशास्त्रे एव कर्तव्यम्। तत्समर्थनं तु ऋग्वेदप्रातिशाख्यभूमिकायां वर्गद्वयवृत्तौ प्राप्यते। तत्र भूमिकांशे ‘वाक्प्राणयोर्यश्च होमः’[15] इत्यत्र सूत्रव्याख्याकाले वृत्तिकारेण विष्णुमित्रेण कथितं यत् – अर्थवाद-ब्राह्मणग्रन्थानतिक्रम्य केवलं शिक्षाशास्त्रविषयकालोचनार्थं शौनकेनोक्तं रचितञ्च ऋग्वेदप्रातिशाख्यम्।[16] ऋग्वेदप्रातिशाख्यग्रन्थः अपरेषु प्रातिशाख्येषु शिक्षाग्रन्थेषु च वृहत्तमः महत्तमश्च। अतः विषयपर्यालोचनात् यदि अस्य शिक्षात्वम् अस्माभिः स्वीक्रियते तदा वाजसनेयि-तैत्तिरीयादीनां प्रातिशाख्यानामपि शिक्षात्वस्वीकारे नास्ति असंगतिः इति ममाशयः।

---

8 स्कन्दस्वामिकृतभाष्यम्, निरुक्तम्- 5/6/3/1.

9 तत्रैव, दुर्गाचार्यवृत्तिः।

10 वाजसनेयि-प्रातिशाख्यम्- 169/1।

11 उवटभाष्यम्, वाजसनेयि-प्रातिशाख्यम्- 169/1।

12 तैत्तिरीयप्रातिशाख्यम् – 1/21 सूत्रस्थं वैदिकाभरणम्।

13 तैत्तिरायप्रातिशाख्यम् 5/19- सूत्रस्थं वैदिकाभरणम्।

14 तैत्तिरीयप्रातिशाख्यम् – 24/4 सूत्रस्थं वैदिकाभरणम्।

15 ऋगेवेदप्रातिशाख्यम् 4- (भूमिकांशे प्राप्तं सूत्रम्)।

16 ‘अतःअचार्यो भगवाञ्छौनको वेदार्थविद् सुहृद् भूत्वा ब्राह्मणेभ्योऽर्थवादानुत्सृज्य विधिं समाहृत्य पुरुषहितार्थमृगवेदस्य शिक्षाशास्त्रं कृतवानिति प्रदर्शनार्थं वर्णयन्ति’ -

## ग्रन्थपञ्जी (Bibliography)


1. Adhikari, Taraknath, Saunakakrta Rgveda- Pratisakhya, Samskrita Book Dipot, Kolkata, 2006 (In Bengali)
2. Allen, W.S., Phonetics in ancient India, London, 1953.
3. Bhattacharya, Tapan Sankar (Editor), Astadhyayi of Panini, Samskrita Book Dipot, Kolkata, 2004. (In Bengali).
4. Chakrabarti, Sukla, A Critical Linguistic Study of the Pratisakhyas, Punthi-Pustak, Kolkata, 1996.
5. Dharmapal, Gouri, Veder Bhasa O Chanda (in Bengali), West Bengal State Book Board, Kolkata, 1999.
6. Fatak, Madhukar, Paniniyasiksaya Siksantarahi Saha Samiksa, Varanasi, 1972. (In Sanskrit).
7. Indra, Pratisakhyome Prayukt Parivasik Sabdo ka Alochanatmaka Adhyayan (in Hindi), Chowkhamba Vidyabhahan, Varanasi, 1991.
8. Jha, Naresh, Yajnavalkya-Siksa (In Hindi), Chowkhamba Surabharati Prakashan, Varanasi, 2003
9. Kaundinnyayana, Sivraj (Editor), Paniniya-Siksa (in Hindi) Chowkhamba Vidyabhahan, Varanasi, 2004.
10. Macdonell, A. A., Vedic Mythology, Indological Book House, 1963.
11. Kulkarni, N. K., Vedic Studies, Bharatiya Kala Prakashan, Delhi, 2006.
12. Majumdar, Paresh Chandra, Sanskrita O Prakrita Bhasar Kramavikash (in Bengali), Dey's Publishing, Kolkata, 2000.
13. Mishra, Rajendralal, Taittiriya-Pratisakhyam (with Tribhasyaratna-Vasyam), Asiatic Society, Kolkata, 1872.
14. Mishra, Vidhata, ACritical Study of Sanskrit Phonetics, Chowkhamba Publication, Varanasi, 1972.
15. Pandea, S. R., RK- Tantra (Ek Parishilan) (in Hindi), Parimal Publication, Delhi, 1992.
16. Sharma, Giridhar and Sharma, P. Rameswarananda (Editors), Vaiyakarana-Siddhantakaumudi (in four Vol.), Motilal Banarsidass, Delhi, 2002.
17. Thakur, Amareswar, Niruktam (Yaska) (in Bengali) (in four Vol.), Calcutta University, 1963.
18. Tripathi, Ramprasad (Editor), Siksasamgrah, Sampurnanand Sanskrit University, Varanasi, 1989.
19. Varma, Siddheswar, Critical Studies in the Phonetic Observations of Indian Grammarians, Delhi 1961.
20. Varma, V. K. (Editor), Rgveda- Pratisakhyam (Ek Parishilan) (in Hindi), Benaras Hindu University, Varanasi, 1972.
21. Varma, V. K. (Editor), Rgveda- Pratisakhyam (Uvatabhasyasahitam), Chowkhamba Sanskrit Pratisthan, Delhi, 2001.
22. Whitney, W. D. (Editor), Atharva-Pratisakhya, Chowkhamba Sanskrit Series, Benaras, 1962.
23. Winternitz, M, A History of Indian Literature, Vol. 1 (Eng.Tr. by S. Ketkar), Calcutta. 1927.



Received on 09. 06. 2017 Accepted on 24. 07. 2017

# धर्मशास्त्रानुसारिणी शिक्षाव्यवस्था

**Surajit Banerjee***

***प्रबन्धसारः*** *-धर्मशास्त्रनिर्दिष्टायाः शिक्षाव्यवस्थाया मुख्यमुद्देश्यन्तु वैयक्तिकाभ्युदय आत्मोपलब्धिद्वारेण। प्रातिस्विकशाखाचरणानुरोधेन स्वशाखाया अध्ययनमेवाध्येतृणाम् अवश्यकर्तव्यतयोपदिष्टम्। अध्ययनन्तु सदैव प्राक्षोभिकोन्नयनेन चरितोन्नयनं संसाधयति। ततो मन्वर्थमुक्तावल्याम् आटीकितं – 'वेदाध्ययनदानयज्ञनियम-तपांसि स्रगादिविषयसेवासंकल्पशीलिनो न कदाचित् फलसिद्धये प्रभवन्ति'[1] इति। शास्वतिकमूल्यानामुद्भावनेन शृङ्खलात्मकनियमनेन चेयं जीवनकेन्द्रिकी शिक्षा निःश्रेयसेन साकमभ्युदयं साधयति। प्राक्षोभिकोन्नयनेन न हि कदापि वैयक्तिकाभ्युदयो भवति। स सम्भवति केवलं मूल्याश्रिताचाराणामात्तीकरणे-नानुचरणेनैव वा। यत इयं शिक्षा अज्ञानमुक्तेरुपायरूपा एका निरवच्छिन्ना प्रक्रिया ततः सर्वजनीनदृष्ट्या शिक्षायाः प्रयोजनीयत्वं तु धर्मशास्त्रविद्भिरङ्गीकृम्। आजन्मनो मनुष्या देवादिभिस्त्रिभिः ऋणैः संयुक्ता वर्तन्ते। तत्र यथा यज्ञैर्मनुष्यो देवान् प्रीणाति पुत्रैः श्राद्धैश्च पितॄन् प्रीणाति तद्वत् स्वाध्यायतपसा च ऋषीन् प्रीणाति। वस्तुतस्तु न केवलं सुतजननद्वारेण अपि चाध्ययनद्वारेणैव पितृपितामहेभ्यो नानृण्यं भवत्येकस्य जनस्य। शिक्षा एव भवति तादृशम् अत्यावश्यकम् अनुशीलनं येन मनुष्या भाविप्रजन्मेषु अधिगतानां विद्यानां प्रवहनद्वारेण ऋणत्रयात् विमुच्यन्ते। शिक्षा तु वैयक्तिकताया विकाशनार्थमेका निरवच्छिन्ना मानसिकी तथा जैविकी प्रक्रिया। मनुष्यस्यात्मनः जीवनसंघटनार्थं नीतेरुपयोगद्वारेण शास्त्रविहितकर्तव्यकर्मणाम् अनुष्ठानमेव शिक्षाया मुख्यमुद्देश्यम्। शिक्षाविहीनो जनः किं कर्तव्यम्, किमकर्तव्यमिति निश्चेतुं न शक्नोति। शिक्षितो जनो व्यक्तित्वस्य उद्वर्तनद्वारेण वैयक्तिकस्थितेरनुसारम् आवश्यकस्य चानुरोधेन आत्मानं तत्परकं विद्ध्यात्। अतः शिक्षा भवति तादृशं सामर्थ्यं यद् व्यक्तेः प्रसन्नतां आपादयति, पक्षान्तरे वैयक्तिकम् अभ्युदयञ्च साधयति।*

**कुञ्चीशब्दाः-** अभ्युदयः, निश्रेयससिद्धिः, नीतिः, संस्कारः, विनयः, सामाजिकता, प्रातिष्ठानिकशिक्षा, प्रतिष्ठानानियन्त्रिता शिक्षा।

## 1. • मूल्याश्रिता शिक्षा

संस्कृतवाङ्मये शिक्षाया मूल्यनिरूपणार्थं शिक्षाशास्त्रिभिः यानि मतानि स्वीकृतानि तत्रादौ भवति आत्मोपलब्धिद्वारेण ब्रह्मणः साक्षात्करणं येन मनुष्यो जननमरणचक्राद् विमुच्यते। अतो विद्या भवति विमुक्तिसाधिका। मुक्तिः मनुष्यम् अज्ञानदूरीकरणदिशा बन्धनमुक्तं करोति। निःश्रेयससिद्धिस्वरूपेयं मुक्तिः वैयक्तिकमभ्युदयं साधयति। द्वितीयं तावत् मूल्यं भवति सद्गुणानामाधारेण अमृतत्वसाधनम्। मनुष्याणां दिव्यत्वप्राप्तये उपयोगि इदम् अमृतत्वं सर्वदा चिरायतं

1 कुल्लूकभट्टः. *मन्वर्थमुक्तावली*. मनुसंहिता- 2.97.

* Assistant Professor in Sanskrit, Kalna College

फलं प्रसवति। अतो मुक्तिः अमृतत्वञ्चेति द्वयं मनुष्याणां पारलौकिकविकाशाय साधनं भवति। परन्तु तृतीयं तावत् मूल्यं भवति नैतिकमानोन्नयनं यत् चतुर्भिर्वर्णाश्रमधर्मैः सर्वैरेवाङ्गीकृतं। ततो मनुष्यस्य ऐहिकविकाशनार्थं साधनं भवति। नीतिशिक्षाया मूलमेव भवति विद्याप्रसूतो विनयो, यः सामाजिकदृष्ट्या मनुष्याणां वैयक्तिकमभ्युदयं साधयति। विनयो भवति शीलचरित्रादीनां सर्वेषां सद्गुणानामाधारः। यावत्पर्यन्तं शीलचरित्रादीनां गुणानामाधारेण मनुष्यस्य वैयक्तिकमुद्वर्त्तनं, यत् मनुष्यस्य प्रसन्नताया हेतुभूतं वर्तते तन्न स्यात्, तावत् पर्यन्तं विनयशिक्षाया लक्ष्यं नैव साफल्यं विभृयात्। सुखं भवति स्वाधीनतालभ्यो मनसो विकाशः यदभ्युदयदृष्ट्या मनुष्याणां सार्विकविकशनायालम्। गुणप्रकर्षो हि विनयादवाप्यते। गुणाधिके पुंसि जनोऽनुरज्यते। जनानुरागप्रभवा हि सम्पदः। समाजस्य नैतिकनियमस्य पालनमेव विनयशिक्षाया अङ्गभूतं वर्तते। विनयो भवति इन्द्रियजयाय हेतुभूतः। कर्णत्वगक्षिजिह्वाघ्राणेन्द्रियाणां शब्दस्पर्शरूपरसगन्धेषु अविप्रतिपत्तिना प्रवर्त्तननिवर्त्तनरूपं प्रयत्नं संसाधयति अयं विनयः। ततः प्रजापालकानां कृतेऽपि चेयं विनयशिक्षा अत्यावश्यिकीति धर्मशास्त्रकृतामभिप्रायः[2]। कुशलतासम्पृक्ता नीतिः सामाजिकतां सृजति। ततः सामाजिकसदस्यानामभ्युन्नतये च विनयः प्रयोगार्हो भवति। अभ्युदयकामिनः कृते विनयाधानस्य फलं कदापि न विनश्यति। अत इयं नीतिशिक्षा मनुष्यजीवनस्य विनिर्माणेन दिव्यजीवनरूपकं महाफलमवाप्नोति। नीतिशिक्षाभावात् कर्तव्याकर्तव्यानि विनिश्चितुमसमर्थो मनुष्यः स्वीययौवनस्य स्वीयधनप्राचुर्यस्य स्वीयप्रभुत्वस्य स्वीयविवेकस्य च दुरुपयोगं साधयति, तस्य मनुष्यत्वञ्च तदैव नष्टं भवति। विद्याविनीतो जनो हि सम्पत्स्वरूपो भूत्वा सम्पदो यथार्थव्यवहारेण च समाजस्य नैतिकधारणां परिभावयति[3]।

**2• शिक्षासंस्कारः**

**2.i.** प्रप्रथमायाः शिक्षायाः शुभारम्भो भवति परिवारे एव, यत्र संस्कृतेः परिचायकानि नैतिकमूल्यानि एव भवन्ति आरोपितानि शिशवे। अतो मातापितृकृतानुशीलनमेव नीतिशिक्षायां पुत्रस्य गुणवतां सम्पादयन् तस्य चरितोन्नयनं साधयति। सैव माता स एव पिता वा शत्रुर्भवति येन बालो न पाठितो भवति। अपरतः पितृपैतामहधनेषु पित्रार्जितेषु धनेषु वा जन्मन एव पुत्रस्याधिकारो वर्तते। परन्तु विद्याधनन्तु भवति स्वार्जितमेव। भारतीयजीवनदर्शने अनुष्ठितेषु विविधेषु संस्कारेषु सर्वत्रैव कर्तव्यकर्मणां नियमस्वरूपो धर्मः आवश्यकाङ्गत्वेन परिगणितोऽस्ति। विद्यासंस्कारस्तु तत्र न व्यतिक्रमः। यावद् विद्याग्रहणविषये शिशोः योग्यता उपपद्यते तावदेव विद्यासंस्कारस्य प्रयोजनीयता नितरामनुभूयते। वयं तु जानीमः संस्कारो नाम स भवति यस्मिन् जाते पदार्थो भवति योग्यः कस्यचिदर्थस्योपलब्धये इति। संस्कारादिषु उपनयनमेव विद्यासंस्कारत्वेनोल्लिखितं समर्थितञ्च धर्मशास्त्रकृद्भिः। परन्तु यावद् वैदिकमन्त्रोच्चारणेन साकं सव्याकरणं लेखनस्यापि प्रयोजनीयता अनुभूयते तावदेव उपनयसंस्कारात् प्राक् विद्यारम्भ इति एकः संस्कार आवर्त्तितः[4]।

---

2 तेभ्योऽधिगच्छेद् विनयं विनीतात्मापि नित्यशः।
विनीतात्मा हि नृपतिर्न विनश्यति कर्हिचित्॥ - मनुसंहिता – 39/7.

3 B. K, Swain. *Smṛtimīmāmsā*. Delhi: Akshay Prakashan, 2006. pp. – 189-198.

4 A.S. Altekar. *Education in Ancient India.* Banaras : Nand Kishor and Bros Educational Publication, 1951 (4th ed.). p.-268.

**2.ii. विद्यारम्भः** - प्राप्ते तृतीये वर्षे बालस्य चौलसंस्कारो विधीयते। ततः उपनयनसंस्कारो भवति अष्टमे वर्षे। ततस्तृतीयवर्षमारभ्य अष्टमवर्षपर्यन्तं किं करणीयमिति विषये गृह्यसूत्रेषु धर्मशास्त्रेषु च कुत्रापि न किमपि आलोचितम्। एतावत् कालं बाला न कदापि विद्यारहिताः स्युः। ततः उपनयनादनन्तरं वेदादीनां शिक्षणं गुरुगृहे एव भवति। तस्यामेव शिक्षाव्यवस्थायां प्रवेशनार्थं योग्यतामादधाति अयं विद्यारम्भसंस्कारः[5]। अयं संस्कारः अक्षरारम्भः अक्षरवीकरणम् अक्षरलेखनमित्यादिभिश्च अभिधानैरभिहितो भवति। प्राथमिकशिक्षायाः शुभारम्भो भवति विद्यारम्भसंस्कारेणैव। उपनयनसंस्कारात् प्राक् अस्य संस्कारस्य अनुष्ठानमवश्यमेव कर्त्तव्यम् उपनयनसंस्कारोपकारकत्वात्। अस्यैव संस्कारस्य आनुष्ठिकतामेव अस्य उपयोगं प्रदर्शयति। अर्थशास्त्रेऽपि प्रदर्शितं यत् चौलसंस्कारादनन्तरं राजपुत्रो विद्यालाभार्थं तथा अक्षरादीनां ज्ञातार्थञ्च विद्यारम्भसंस्कारम् उपयुञ्जीत[6]। उपनयनादनन्तरं चतुर्विधेषु विद्यास्थानेषु एव तस्य प्रवृत्तिरुपजायते। प्राप्ते पञ्चमे वर्षे हरिं लक्ष्मीं देवीं चैव सरस्वतीं सम्पूज्य ब्राह्मणादीन् यथासम्मानपुरःसरां दक्षिणां प्रदाय च विद्यारम्भसंस्कारं कारयेत्[7]। दक्षिणादिभिः संपूजिता ब्राह्मणाः तत्र भवति शिशोः प्रथमोऽध्यापकः प्रथमं शिशुम् अध्यापयेत[8]।

**2.iii. उपनयनम्** - वेदाध्ययनाय आचार्यसमीपं नयनमेव उपनयनमिति। उपनयनाद् अनन्तरं क्रियमाणेन स्वाध्यायेन वेदत्रयाध्ययनार्थं गुरुकुलवासेन च तनुः ब्रह्मप्राप्तियोग्या भवति। वस्तुतः उपनयनादिसंस्कारैः कस्यचिद् अपि बालकस्य सामाजिकता उपपद्यते। प्रागुपनयनात् कोऽपि बालः परिवारसंबद्धः परिवारनियन्त्रितश्च सन् पारिवारिकमूल्यानि एव केवलं सृजति। परन्तु उपनयनाद् अनन्तरं स भवति द्विजः। अनुपनीतस्य जनस्य सर्वेषु शास्त्रनिर्दिष्टेषु अग्निहोत्रादिकर्मसु प्रवेशाधिकारो नोपजायते। अत उपनयनसंस्कार एव भवति सुविशालशास्त्रविस्तरे प्रवेशद्वारः। उपनयनसंस्कारेण एव यतो भवति बालकस्य द्विजत्वं, ततः अध्ययनाद् एव तस्मिन् विप्रत्वम् उपजायते। अनेनैव बालकस्य स्वशाखाध्ययननिष्ठे कर्मानुशीलने सामर्थ्यम् उपपद्यते। अतः अत्रतः एतत्तु स्पष्टं यत् आनुष्ठानिकता एव कर्त्तव्यकर्मणाम् आचरणविषये योग्यतामुद्भावयति। अनुपनीतस्तु गार्हस्थ्याश्रमप्रवेशनाय नालम्। उपनयनद्वारेणैव व्यक्तेः व्यक्तित्वस्य विकाशदृष्ट्या सामाजिकाभ्युदयो भवति। अस्यैव संस्कारस्य भित्तिः भवति आनुष्ठानिकता लक्ष्यन्तु तावद् भवति कर्त्तव्यकर्मणाम् अनुशीलनेन व्यक्तेः सामाजिकी प्रतिष्ठा[9]।

व्युत्पत्त्यनुसारं उपनयनशब्दस्य अर्थस्तु द्विविधो भवति। प्रथमन्तु तावद् उप समीपे आचार्यादीनां नयनं नाम प्रापणम् इति उपनयनम्। करणव्युत्पत्त्या तु येन संस्कारेण आचार्यादीनां समीपे बालको नीयते तदेव उपनयनपदवाच्यं भवति। अतो विद्यावनतस्य कृते उपनयनसंस्कारः अनुष्ठीयते[10]। उपनीतस्य ब्रह्मचारिणो जीवनन्तु दीर्घसत्रमिव प्रतिभाति। अतः सत्रादिषु प्रज्वलिताग्निरिव ज्ञानोत्कर्षतये उपनीतो जन आत्माहुतिरिव विधिपूर्वकमात्मनो नियमनदृष्ट्या अनुशीलनं

---

5 ‘द्वितीयजन्मनः पूर्वमारभेताक्षरासुन्धीः’ –वीरमित्रोदयसंस्कारप्रकाशः as quoted in ibid. p.-266.

6 अर्थशास्त्रम्- 1.5.

‘निर्वृत्तचौलकर्मणोश्च तयोस्त्रयीवर्जमितरास्तिस्रो विद्याः सावधानेन मनसा परिनिष्ठापिताः’। -उत्तररामचरितम्, Act-II.

7 अपरार्कः pp-30-31.

8 ‘यथर्षि शिक्षां विदधाति’ –आश्वलायनगृह्यसूत्रम्6/16-.

9 H. Spencer. “Principles of Sociology” as quoted in R. Pandey. *Hindu Samskāras*. Delhi : MLBD, 2006 (rpt.). 1969 (2nd rev.ed.). p. -111.

10 ‘संस्कारस्य तदर्थत्वात् विद्यायां पुरुषश्रुतिः’ –जैमिनिः 35/1/6-.

कुर्यात्। अतो यज्ञाग्नौ प्रप्रथमतया यदा समिधः अर्प्यते स एव भवति उपनयनसंस्कारः। अपरतस्तस्यैव आत्माहुते अन्तिमं चरणं भवति समावर्तनम्। अत आजीवनं ज्ञानरूपं फलं भुङ्क्ते विद्यया विनीतो जनः[11]। उपनयनसंस्कारेण संस्कृतः ब्राह्मणः स्वशाखाध्यायनेन यदि तदभिलषितं कार्यं कुर्यात् तर्हि स पतितो न भवति। ततो वेदोपनिर्दिष्टं यथाशाखाध्ययनं हि उपनयनसंस्कारस्य मुख्यमुद्देश्यम्। अतः गुरुः महाव्याहृतिपूर्वकं शिष्यम् उपनयीत वेदमध्यापयेत् शौचाचारांश्च शिक्षयेदिति याज्ञवल्क्यमतम्[12]। अत आपस्तम्बधर्मसूत्रे एव उक्तं यद् उपनयनं तावद् विद्यार्थस्य श्रुतितः संस्कारः। सर्वेभ्यो देवेभ्यः सावित्र्यनुच्यत इति हि ब्राह्मणम्[13]। अन्तेवासी एव भवति स यः गुरुगृहम् अध्युष्य दीर्घसत्रं नाम ब्रह्मचर्यमुपैति। अन्तेवासिनस्तु आचार्यं तस्य गृहं पशुरादिकं धनञ्च संरक्षन्ति येन तेभ्यस्तस्यापसारणं माभूदिति भावः[14]। केषाञ्चन शास्त्रविदां नये तु उपनयनं नाम सावित्रीवदनम्। सावित्र्या साकम् अध्येतुर्मेलनं यद् अध्यापकेनैव संसाधितं तदेव उपनयनम्। ततो मौञ्जीबन्धनचिह्नितं यद् ब्रह्मजन्म तस्य माता भवति सावित्री पिता च आचार्य इति। ब्रह्मप्राप्तिफलकत्वाद् उपनयनपूर्वकं यज्जन्म सावित्र्यनुवचनेन भवति उत्पादितं तज्जन्म जरामरणवर्जितम्[15]।

धर्मशास्त्रादिषु प्रतिपादितेयं शिक्षा प्रधानत एव गुरुमुखी। तत्र गुरुणा साकं शिष्यस्य सहसम्पर्कः, गुरुनिर्दिष्टाया नीतेर्यथायथं पालनं गुरोरुपदिष्टेषु मार्गेषु शिष्यस्यायनमेव च परिलक्ष्यन्ते। गुरुरेव भवति स यः संस्कारादीनामनुष्ठानं करोति, ततोऽध्येतारं परिपालयति ज्ञानान्नदानैश्च शिष्यस्य परिपुष्टिं साधयति। जीवनस्य वास्तविकघटनया स्थित्या च नीतेरभ्यासं कारयित्वा अध्येतुर्धारणया वृत्या च सह नैतिकशिक्षा दीयेत, यथा चरितोन्नयनं भवति, यत् पक्षान्तरे अभ्युदयसाधनसहायकं भवति।

गुरोर्विभागद्वारेणाध्ययनप्रक्रियायाविभागःस्वीकार्यतेअस्माभिः।उपनयनात्परमुपाध्याय-गृहमध्युष्योपाध्यायसकाशाद् या शिक्षा सा एव प्रातिष्ठानिकी शिक्षेति नाम्नाभिधीयते। उपनयनाद् यस्य शिक्षाश्रमस्यारम्भो भवति समावर्तनस्नानेनैव भवति अवसानमस्य आश्रमस्य। अपरतःप्रागुपनयनसंस्कारात् स्वगृहे एव मातुः, पितुः, गुरोः सकाशाद्वा या आचरणभित्तिकी शिक्षा सा प्रतिष्ठानविवर्जिता शिक्षा भवति। ननु अध्ययनक्रियाया भागद्वयमधुना आलोचयिष्यते।

## 3. • प्रातिष्ठानिकी शिक्षा

**3.i.** उपनयनसंस्कारादनन्तरमत्राध्ययनार्थं शिष्यो ब्रजति गुरुगृहम्। ब्रह्मचारी एव भवति प्रातिस्विकशाखा-नामध्ययनाधिकारी। गुरुगृहमध्युष्य गुरुनिर्दिष्टेन उपायेनात्मानमनुशास्ति, तद्वचनमेव हृदि निधाय स्वीयकर्तव्यकर्मसु एति। श्रेष्ठस्य गुरोः आचरणमभिलक्ष्य सदाचारपथि प्रयाति च। प्रातिष्ठानिकशिक्षायाः पर्यालोचनावसरे आदौ तु अस्या उपादानानामालोचनमावश्यकम्, यान्युपादानानि शिक्षाव्यवस्थायामस्यां पूर्वत एव नियमितानि स्युः।

---

11 शतपथब्राह्मणम् 2/3/3/11-

12 "उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम्।
वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत्।।" -याज्ञवल्क्यसंहिता 15/1-.

13 आपस्तम्बधर्मसूत्रम्10-9/1/1-.

14 शतपथब्राह्मणम् 15/2/6/3-.

15 "आचार्यस्त्वस्य यां जातिं विधिवद्वेदपारगः।
उत्पादयति सावित्र्या सा सत्या साजरामरा।।" –मनुसंहिता 148/2-
अपरार्कः on याज्ञवल्क्यसंहिता 14/1-.

बाह्यिकान्युद्दीपकान्यत्र भवन्ति नियमितानि शृङ्खलनिगडेन च संरुद्धानि यैर्नियन्त्रितशिक्षा एव प्रसरति। अत्र शिक्षका अध्येतारश्च निरवच्छिन्नतया नियन्त्रितेन परिवेशेन निर्दिष्टेन पाठक्रमेण परस्परभावनद्वारेण च पाठकार्यं संचालयन्ति। अतः शिक्षाप्रक्रियाया अस्या उपादानानामालोचनकाले प्रप्राथम्येनायात्यध्येता।

**3.ii. अध्येता** - ब्राह्मणक्षत्रियविशां क्रमेणाष्टैकादशद्वादशवर्षाण्येव भवन्ति उपनयनकाला इति धर्मशास्त्रसम्मतो नियमः। तत एव भवति तेषां ब्रह्मचर्याश्रमः प्रातिष्ठानिकशिक्षारम्भो वा। यद्यपि त्रिवर्षतः अष्टमवर्षपर्यन्तं यदा चौलसंस्कारो भवत्यनुष्ठितः, तदा एव भवति विद्यारम्भस्य प्रशस्तकालः। तदा वृत्तचौलकर्म्मा लिपिं संख्यानं चौपयुञ्जीत। वृत्तोपन यनस्त्रयीमान्विक्षिकीञ्च शिष्टेभ्योऽध्यक्षेभ्यो दण्डनीतिं वक्तृप्रवक्तृभ्यश्चोपयुञ्जीत[16]। ततो द्वादशवत्सरं यावद् गुरुगृहे गुरुमुखात् न केवलं प्रातिस्विकशाखानामध्ययनमपि च आचरणभित्तिक-शिक्षायाश्चानुशीलनं भवतः।

विद्याग्रहणार्थम् अध्येतृणां कापि योग्यता तदानीमासीद् अपरिहार्या। विद्याधिष्ठात्री देवी सर्वदा योग्यतमं जनमेव वरयति, तस्य हृदि पदं च करोति। परन्तु य आत्मनियमनाक्षमः अजितेन्द्रियः असूयायुक्तश्च भवति विद्या तं सयत्नेन विजहाति। अतः अध्यापकानां कृते अयमेव उपदिष्टो यत् नियतेन्द्रियाय प्रमादशून्याय विद्यारूप-निधिरक्षकाय चैव शिक्षादानं करणीयं, नान्यस्मै कस्मैरपि[17]। अग्निहोत्रादिकर्मसु प्रयुङ्क्तः बाह्याभ्यन्तरशुचिः धार्मिकः विद्याग्रहणधारणसमर्थश्च जन एव अध्ययनार्थमधिकारी भवति। अतो यस्मिन् शिष्ये अध्यापिते अध्ययनानुकुशला शुश्रुषा धर्मार्थौ च न भवतः तत्र विद्या न अर्पणीया। उषरक्षेत्रे उप्तं वीजं यथा निस्कलं भवेत् तद्वत् अनधिकारिणे अर्पिता विद्या तु निष्फला भवति, कदापि वा विपरीतं फलमपि प्रसवति[18]। ब्रह्मचारी गुरुकुले एव निवसन् इन्द्रियनियमनम् आत्मगतादृष्टवृद्ध्यर्थं यथानियमम् अध्ययनञ्चानुतिष्ठेत्। यतो वेदाध्ययनं भवति पवित्रं कर्म ततः स्नानादिभिः शरीरशुद्धिकर्मभिः बहिःशौचं च संसाधयेद् उपनीतो ब्रह्मचारी। ततो बाह्यान्तरशुचिर्नरो देवर्षिपितृभ्यः अन्नोदकदानादिना तर्पयेत्। आपातसुखकराणि तथा परिणामे दुःखदायकानि कामजव्यसनानि तथा क्रोधजव्यसनानि सर्वाणि कार्याणि एव सयत्नेन परिवर्जयेद् अयं ब्रह्मचारी। माक्षिकमांसमाल्यस्त्रीप्राणिहिंसादीनि कार्याणि एव च सयत्नेन वर्जयेत्। मनसः उद्वेगकरं कट्वम्लतिक्तोद्रिक्तरसाः खाद्या यथाप्रयत्नैः परिहरणीयाः विद्याधनाभिलाषिभिः अन्तेवासिभिः। यतो विद्या तु मनसः ऐकान्तिकनियमनेन लभ्या ततस्तद्विरोधिनं स्त्रीसंसर्गं मैथुनं कामवशात् रेतसः स्कन्दनञ्च निषिद्धानि ब्रह्मचारिणः कृते। एवंविधैः कार्यैः तस्य व्रतहानिर्भवेत्। व्रतं हिनस्त्यतः पुनरूपनयनमेव कार्यम्[19]। स्वप्नो भवति निद्रितावस्थायाम् अवचेतनमनसि दैनन्दिनकार्याणां प्रतिभासदृष्ट्या प्रतिफलनम्। अतो यदि कस्यचिदपि ब्रह्मचारिणः अबुद्धिपूर्वम् अकामतो वा स्वप्ने

---

16 P.V. Kane. *History of Dharmaśāstra*. Vol. II. Part – I. Pune: Bhandarkar Oriental Research Institute, 1997 (3rd Ed.). Page – 266.

17 'असूकायानृजवेऽयताय न मा ब्रूया वीर्यवती तथा स्याम्।
यमेव विद्याः शुचिप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नम्।
यस्ते न द्रुह्येत्कतमच्चनाह तस्मै व्रुया निधिपाय ब्रह्मन्॥' –निरुक्तम् 4/2-.
मनुसंहिता 115-114/2-.
आपस्तम्बधर्मसूत्रम् 24-11/3/1-.

18 'धर्मार्थौ यत्र न स्यातां शुश्रुषा वापि तद्विधा।
तत्र विद्या न वप्तव्या शुभं वीजमिवोषरे॥' –मनुसंहिता112/2-.

19 मनुसंहिता 180-177/2-.

रेतस्खलनमभूत् तर्हि प्रायश्चित्तरूपेण सः सकृत् कृतस्नानचन्दनाद्यनुलेपनपुष्पधूपादिभिः विवस्वतं साक्षादभ्यर्च्य पुनर्मामेति ऋचं त्रिर्जपेत्[20]। उपनीतो ब्रह्मचारी तु अग्निहोत्रादिवैदिककर्मसु अहीनानां स्वकीयकर्तव्यकर्मसु दक्षाणां तुष्टानाञ्च गृहस्थानां गृहेभ्यः प्रत्यहं भिक्षासमूहमाहरेत्। उपनीतानां ब्रह्मचारिणां कृते आवश्यककर्मतयाभिहितमिदं भैक्षकर्म तु मूल्याश्रितम्। सत्स्वपि उच्चनीचकुलसमुद्भूतेषु उपनयनादनन्तरं गुरुगृहमागता ब्रह्मचारिणः परस्परानुभावनेन परस्पराश्रयणेन च समाजस्य यत् पारम्परिकम् ऐतिह्यं तस्य एव उपलब्धये अलम्। इदं कर्म ब्रह्मचारिणं विनयिनं करोति, अपि च आत्मनो जीवनधारणार्थं कर्तव्यकर्मणः किञ्चिद् अनुशीलनं च संसाधयति। यतः अध्ययनमेव समाजस्य भित्तिस्वरूपं ततः सामाजिकानामेव दायित्वं वर्तते भाविप्रजन्मस्य भाविसामाजिकानाञ्च प्रतिपालनमेव। अन्येषाम् आश्रमत्रयाणां संवर्धनात् संरक्षणाच्च गार्हस्थ्याश्रम श्रेष्ठ इव प्रतिभाति। ततो गृहस्थस्य सामाजिकः शास्त्रीयश्च दायो वर्तते ब्रह्मचर्याश्रमं यथास्नेहसमादरपूर्वकमन्नदानादिना संरक्षणं प्रतिपालनञ्चेति। समाजस्य अग्रगतिरेव नैव सम्भवति यदि सर्वे आश्रमाः परस्परभावयिता न स्युः। अतः पक्वान्नादीनां दानैः उपनीतानां ब्रह्मचारिणां पालनमेव गृहस्थस्य आवश्यिकं कर्तव्यमिति शास्त्रकृन्मतम्। यदि कश्चन गृहस्थः अस्मिन्नेव कर्तव्यकर्मणि अविसन्नो भवेत्तर्हि स दोषेण युज्यते। पापभाच्च भवति स जनः[21]।अध्येतृणां कृते तु इदं भैक्षकर्म शास्त्रनिर्दिष्टम् आवश्यिकं कर्म भवति। यद्यपि एतद्भवति आवश्यिकं तथापि केवलं प्रयोजनदृष्ट्या भिक्षणीयम्। प्रयोजनमतिरिच्य यदि भैक्षकर्म क्रियते तर्हि स ब्रह्मचारी चौरपदवाच्यो भवति[22]। आहारमतिरिच्य यदि धनमाहार्य्यादिकं भैक्षं द्रव्यम् अधिकं लभेत् तर्हि तत् गुरवे एव समर्पणीयं दक्षिणा इति विविच्य[23]। यावदेव समावर्तनं जातं तावदेव समावृत्तस्य जनस्य भिक्षा भवति अशुचिकरा। समावर्तनस्नानादनन्तरं स्नातको ब्रह्मचारी गुरुदक्षिणां प्रदाय गुरोरुपदेशं गार्हस्थाश्रमप्रवेशनिमित्तञ्च स्वीकृत्य न पुनः भिक्षावृत्तिमाश्रयेत्। गृहस्थस्य एव अन्नवस्त्रदानादिभिः ब्रह्मचर्याश्रमिनां संरक्षणरूपो सामाजिको दायो वर्तते। परन्तु स्नातकः गार्हस्थाश्रमप्रवेशोद्यतो जनः अर्जितया विद्यया आत्मनः संरक्षणाय पालनाय च समर्थो भवेदित्याशा।

उपनीतो ब्रह्मचारी पूर्वजानाम् आचार्याणां मातुः पितुश्च श्रद्धापूर्वकं समादारं कुर्यात्। पारिवारिके जीवने तथा विद्याक्षेत्रे दृष्टावदानत्वात् ते कदापि नावमन्तव्या भवन्ति। अत आचार्यस्य प्रीत्यर्थं सततं प्रयत्नो नेयो यस्मात् तेषु एव प्रीतेषु तपसः फलं प्राप्यते। सर्वतपःफलप्राप्त्यर्थं मातापित्राचार्याणां परिचर्या सततं मनोवचनकर्मभिः संसाधनीया। अतो मनोवचनकर्मभिः सुश्रुषिता एते त्रयः साक्षात् पुरुषार्थसाधका भवन्ति[24]। शिष्टाचारन्तु पारिवारिकजीवनं सामाजिकजीवनञ्च सुस्थिरीकरोति। अतः पूर्वजेषु गुरुषु सम्मानार्हेषु श्रद्धाप्रदर्शनं तथा यथासम्मानपुरःसरम् अभिवादनं प्रत्यभिवादनञ्च सामाजिकमूल्यानाम् उद्वर्तदकानि भवन्ति। ब्रह्म नाम वेदाध्ययनस्य आरम्भे अवसाने च गुरोः पादौ सदा हस्तावध्येयं वन्द्यनीयम्[25]। यतः आजन्मनः शरीरमात्रावलम्बी मनुष्यः केवलम् आत्मनः शरीरयात्रां

20 ‘पुनर्मामैत्विन्द्रियं पुनरायुः पुनर्भगः।
पुनर्द्रविणमैतु मां पुनर्ब्राह्मणमैतु माम्।।’ –बृहदारण्यकोपनिषत् 5/4/6-.

21 ‘तस्माद् ह वै ब्रह्मचारिसंघं चरन्तं न प्रत्याचक्षीत।’ -बौधायनधर्मसूत्रम् 25/3/1-.

22 ‘आहारादधिकं वर्णी न क्वचिद्भैक्षमाचरेत्।
युज्यते स्तेयदोषेण कामतोऽधिकमाहरन्।।’ –वीरमित्रोदयसंस्कारप्रकाशः, पृ486-.

23 ‘यदन्यानि द्रव्याणि यथालाभमुपहरति दक्षिणा एव ताः’ –आपस्तम्बधर्मसूत्रम् 3/3/1-.

24 मनुसंहिता 225,228,229,236,237/2-.

25 ‘ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा।

मनुष्येतरप्राणीवत् निर्वाहयितुमलं परन्तु गुणग्रामादीनामर्जनेन तस्य मनुष्यत्वम् अभ्युदयश्च साधयति इयं विद्या। नानुपनीतस्य हृदि विद्या न स्थास्यति, ततः विद्यालाभार्थं गुरुगृहं गत्वा गुरुप्रसादात् यथाशास्त्राध्ययनं कर्तव्यम्। यतो गुरुर्भवति शिक्षाया आधारस्ततः अस्मादेव शिक्षालाभार्थं तमभिलक्ष्य प्रणामपूर्वकं सम्मानादिकं प्रदर्शनीयम्। एतेन न समागतस्य विद्यालाभार्थं बालकस्य हीनत्वं सूचितम्। पक्षान्तरे गुरोर्वन्दनादिकार्यैः श्रेष्ठस्य गुरोः विद्यावत्ताया एव कीर्त्तनं कीर्त्तितम्। वृद्धाभिवादनशीलस्य वृद्धसेविनश्च जनस्य आयुप्रज्ञायशोबलानि चत्वारि सम्यक् प्रकर्षेण वर्धन्ते इति मनुमतम्[26]।

अभिवादनविषयेऽपि उपनीतेन तथा यत्नो नेतव्यो येन वयोवृद्धानां ज्ञानवृद्धानाञ्च सम्मानहानिर्न स्यादिति ब्रह्मचारीधर्मविषये धर्मशास्त्रकारा गुरुत्वमारोपन्ति। अतोऽवर्त्तमानेऽपि आचार्ये तस्य नामोच्चारणं सम्मानवर्धकमुपपदं परपदञ्च विना नैव कर्तव्यम्। ततः अभिवादनसमये सर्वदा शालीनताया आश्रयणं नेतव्यम्। अत्रेदं वक्तुमेतच्छक्यते पाणिनिसूत्रेऽपि दीर्घस्वरान्तनामधेयानां स्त्रीणां सम्बोधनकाले च ह्रस्वस्य एव प्रयोगः लक्षितः। एतेन स्वभावकोमलानां स्त्रीणां मर्यादा भवति रक्षिता। अनूढां कन्यकामपि कुमार्यायुस्मतीत्यादीभिरभिवादनैरभिवादनं कर्तव्यम्। अनेनैव योग्यतमस्य उद्वर्तनं भवति अस्मिन् संसारे येन सामाजिकस्थितिश्च भवति सुदृढा[27]। श्रेयस्कामो जनो गुर्वादीनां नामोच्चारणं नैव कुर्यादिति भावः[28]। अत्र आत्मनामोच्चारणवर्जनादिना उपनीतस्य ब्रह्मचारिणः कृते स्वार्थं सततमेव परित्यज्यमिति अभिप्रेतम्। अहम् अहमिति मन्यमानो जनो न कदापि अन्यस्य गुणस्य समादरं कर्तुं नैव शक्नोति। तत्कृते गुरोरुपदेशो व्यर्थ एव प्रतिभाति। अपरतः स्तुत्यादिभिः वाक्यैः न कदापि प्रभावितो भवेत्। प्रायश एव दृश्यते यत् ये खलु जनाः स्तावकाश्च स्तुतिं कुर्वन्ति तेषाम् अभिप्रायो भवति आनुकुल्यलाभः। अतः स्तुतिरियं कदापि आत्मनिवेदनं सम्मानप्रदर्शनञ्चेति भवितुमर्हति परन्तु सर्वदा एवंविधस्य स्तुतिकृतः प्रशंसा हृदि नैव अवधार्या, सयत्नेन च परिहरणीया इति उन्नतिकामिनां कृते मनोरेव सावधानं निर्देशनम्[29]। अतः श्रेयस्कामस्तु समादरे प्रीतिं न कुर्याद् अवमाने परेण कृतेऽपि खेदं न कुर्यात्। वस्तुतो मानावमानद्वन्द्वसहिष्णुत्वमनेनैव विधीयते। अतो ब्रह्मचारिधर्मव्याख्यानप्रसङ्गे अध्येतुः कर्तव्यकर्माणि तु व्याख्यातानि धर्मशास्त्रकृद्भिः।

स एव शिक्षाश्रमाधिकारी, यः खलु भवति असूयाशून्यो जितेन्द्रियः, शुद्धः, मनोयोगी बुद्धिमान् विद्यासम्पदः संरक्षणार्हश्च। अध्येता सदैव भवेदध्यापकनिर्भरः, अध्यापकनियन्त्रितो वा। स्वतन्त्रे आचार्ये शिष्यस्यास्वातन्त्र्यमेव

---

संहत्य हस्तावध्येयं स हि ब्रह्माञ्जलिः स्मृतः॥' –मनुसंहिता 71/2-.

26 'अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि संप्रवर्धन्ते आयुर्विद्यायशो बलम्॥' –मनुसंहिता 121/2-.

27 मनुसंहिता 129-128/2-,
हरदत्तः on गौतमधर्मसूत्रम् 29/2-,
महाभारतस्य शान्तिपर्वः 25/193-,
गौतमधर्मसूत्रम्28-24/2-.

28 'आत्मनाम गुरोर्नाम यन्नाम कृपणस्य च।
श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः॥' –मदनपारिजातम्, पृ27-.

29 'संमानाद्ब्राह्मणो नित्यमुद्विजेत विषादिव।
अमृतस्यैव चाकाङ्क्षेदवमानस्य सर्वदा॥' –मनुसंहिता162/2-.

वर्तते[30]। गुरोराचरणमभिलक्ष्य तस्य जीवनादर्शञ्चानुसृत्य यथाकर्तव्यकर्मणि आत्मानं परिचालयति सोऽध्येता।

**3.iii. शिक्षकः** - शिक्षाप्रक्रियायाम् अविच्छेद्याङ्गत्वेन यस्योपस्थितिः सततमनुभूयते, यं विना शिक्षाप्रक्रिया च भवति निष्फला, स एव भवति शिक्षकः। यावत् मूण्डकाः शब्दं कुर्वन्त एकैकमेव अनुसरन्ति, तद्वत् अध्येतुः कर्तव्यं भवति केवलं गुरोरुपदेशस्य निर्देशस्य वा यथानुसारणात्मकम् अनुशीलनम्। प्रागुपनयनात् परिवारमध्ये स्थितो बालकः पितृतः मातृतः वयसि ज्येष्ठतो वा शिक्षां लभेत, या शिक्षा मूल्यानामुद्वर्तका सती पारिवारिकम् अभ्युदयं सृजति। परन्तु सैव शिक्षा न स्वयंसम्पूर्णा समाजसम्बन्धहीनत्वात्। अतः सामाजिकाभ्युदयाय प्रातिष्ठानिकशिक्षा भवति योग्यतास्वरूपा। प्रातिष्ठानिकशिक्षाव्यवस्थायां शिक्षको भवति स्वयमेव एकं प्रतिष्ठानं यस्यादर्शमेवानुसृत्य अध्येता सामाजिकमूल्यं सृजति। पक्षान्तरे जीवनचर्यायामियमेव शिक्षा भवत्युपकारिणी। अतः शिक्षकस्य मुख्यं कर्तव्यन्तु अज्ञानान्धकारं दूरीकृत्य बालकस्य ज्ञानालोकप्रज्वालनम्[31]। अत आचार्यो भवति स यस्माद् धर्मान् आचिनोति उपनीतो ब्रह्मचारी।

उपनयनादनन्तरं कोऽपि ब्रह्मचारी द्विज इति आख्ययाख्यातो भवति। द्वाभ्यां जायते इति द्विजः। प्रथमं जन्म तु भवति शारीरिकजन्मः यो मातृपितृसकाशाद् भवति सम्भवः। शरीरमेव मातापितरौ जनयतः। द्वितीयन्तु तावत् विद्याजन्म। उपनयनसमये सावित्र्यां ब्रह्मप्राप्तियोग्यां तनुं तनोति आचार्यः। तदेव जन्म भवति श्रेष्ठः[32]। वशिष्ठधर्मसूत्रेऽपि विषयमेतत् स्पष्टीकृतं यत् पुरुषस्य ब्राह्मणस्य नाभेरुर्द्धं नाभेरधस्ताच्च रेतद्वयं वर्तते। अत आचार्यः शिष्यम् उपनयति तम् अध्यापयति तं साधूकरोति च नाभेरूर्ध्वरेतप्रभावात्। अपरतः नाभेरधस्ताद् विद्यमानात् रेतसः औरसपुत्रो जायते[33]। अत आचार्यो शिष्यस्य आध्यात्मिकाभ्युन्नतिं मेधसो विकशनेन साधयित्वा भवति पितृतुल्यः। अतः श्रोत्रियो ब्राह्मणो न कदापि अपुत्रको भवति, उपनयनद्वारा पुत्रोत्पत्तिसम्भवात्[34]। यत उपनयनस्य मुख्यमुद्देश्यं तु तावद् यथा शाखानामध्ययनेन आत्तीकरणेन च चरितोन्नयनं येन वैयक्तिकाभ्युदयो भवति साधितः। तर्हि तदर्थमेव गुरोर्योग्यता च विचारणीया। यथा अन्धमनुसृत्य यो जनो गच्छति स अन्ध इव प्रतिभाति, तद्वद् यद्यपि शिक्षाया मुख्यमुद्देश्यं ज्ञानालोकेन अज्ञानान्धकारापकरणं तथा अविद्वतामुपनीतो जनः तमसो वा अतितामसलोकमेव प्रविशति। सोऽपि भवति अविद्वान्[35]। अत स एव भवितुमर्हति अध्यापको यः स्वयमेव भवेद् वेदादिशास्त्राभिज्ञो विनीतः अभिजनश्च।

30 आपस्तम्बधर्मसूत्रम् – 1.2.19

31 ‘यथा घटप्रतिच्छन्ना रत्नराजा महाप्रभाः।
अकिञ्चित्करतां प्राप्तास्तद्विद्याश्चतुर्दश।।’ –अपरार्कः on याज्ञवल्क्यस्मृतिः 212/1-.

32 आपस्तम्बधर्मसूत्रम् 18-14/1/1-.

33 द्वयमुह वै पुरुषस्य रेतो ब्राह्मणास्योर्ध्वं नाभेरधस्तादवाचीनमन्यत्तद्यदूर्ध्वं नाभेस्तेन हैतत् प्रजा जायते यद्ब्राह्मणमुपनयति यदध्यापयति यद्याजयति यत् साधुकरोति। अथ यदवाचीनं नाभेस्तेनेहास्यौरसी प्रजा जायते – वशिष्ठधर्मसूत्रम् – 5/2

34 ‘आचार्य उपनयनमानो ब्रह्मचारिणं कृणुते गर्भमन्तः’ – (अथर्ववेदः – 3/5/11)
See also
वशिष्ठधर्मसूत्रम् – 9/38/28
गौतमधर्मसूत्रम् – 10/1/1
मनुसंहिता – 170/2
बौधायनधर्मसूत्रम् – 48/2/1

35 आपस्तम्बधर्मसूत्रम् – 11/1/1.

शास्त्रविहितेषु कर्तव्यकर्मसु वृत्तिहीनं तपसा पूतञ्च जनं नैव गुरुमिति वृणुयात्। यमस्तु जगाद यदाचार्य एव भवति स यो भवेत् सत्यवादी, आस्तिकः, वेदनिरतः, वृत्तिमान्, विजितेन्द्रियः, दक्षश्च[36]। अतो यावदयं गुरुर्भवति श्रेष्ठस्तावत् श्रेष्ठस्य आचरणमभिलक्ष्य तत्तदेवाचरणाय प्रयतेत शिष्यः। अतः शिक्षकः आत्मानुचर्यया वृत्त्या जीवनशैल्या च शिष्यं प्रभवति। ततो न केवलं निर्देशकः अपि तु आदर्शस्थानीय एव भवति सः। श्रेष्ठं ज्ञानवन्तं कर्तव्यकर्मणां यथानुशीलनक्षमं जनमेव अनुसरति इतरो जनः[37]। अध्यापकस्य पाण्डित्यमेव अध्येतुः चरितोन्नयने सहायकं भवति। छात्रं विनयनाय स्वयमध्यापकोऽपि विनयी भवेदित्याशा। निर्देशकात्मकानुदाहरणात् श्रेयस्तु भवति उदाहरणम्। ततः अध्यापको न केवलं शिष्यमुपदिशेदपि तु तत्सविधे स्वयं स्वोपदेशस्य दृष्टान्तस्वरूपो भवेत्। एतादृशस्थितौ अध्यापकस्य व्यक्तित्वं सर्वदा अपरिहार्यम्। तस्य वैयक्तिकप्रभावेण प्रभावितः शिष्यः स्वत आदरपात्रं भवेत्तस्य इति मन्यते। मातृसकाशात् स्नेहः पितृसकाशाद् अनुशासनं मित्रसकाशाच्च विश्वासमिति गुणत्रयमाकल्य एकमभिनवं व्यक्तित्वं सृजति अयमध्यापकः, येन शिष्यः तस्य व्यक्तित्वं भयकेन्द्रिकीं भक्तिञ्च आत्मनि संस्थापयति। एतादृशी भक्तिः सहानुभूतिमनुग्रहञ्च जनयति। अनया सहानुभूत्या अध्यापकः शिक्षार्थिनां प्रयोजनानां सम्पूरणाय भवत्यलम्। अस्यैव विनयिनः अध्यापकस्य शीलमेव संनिरीक्ष्य शिष्यः स्वजीवने अस्य विनियोगं कर्तुं यतते। पारस्परिकी सेवा सहयोगिता धार्मिकभावना समाजसंस्कारश्चेत्यादिषु अध्यापकस्य संलग्नता छात्रे विनयोद्रेकं करोति[38]। छात्रं विनयिनं कर्तुमध्यापकः कौतुहलोद्दीपकं पाठं प्रदद्यात् येन तस्य ज्ञानवृद्धिर्भवेदिति। ततः शिष्यस्य बाह्यविनयेन सह आन्तरिकविनयप्राप्तिसमर्था एकाग्रता स्वत एव आयाति। इयं नैतिकशिक्षा जीवनस्य वास्तविकघटनया स्थित्या च नीतेरभ्यासं कारयित्वा तस्य धारणया वृत्त्या च सह दीयेत। अनया नीत्या तस्य चरितोन्नयनं भवेद् येन तस्मिन्नेव सामाजिकता उपपद्येत।

अत्र तु एक विषय एवावधार्यो यत् यद्यपि शिक्षक इति पदग्रहणेन हि गुरुः अध्यापक आचार्यश्चेत्येतेषामन्तर्भावो दृश्यते परन्तु कार्यभेदात् गौरवाद् वा एतत्त्रयेषु किञ्चिदान्तर्यं विद्यते। यो ब्राह्मणः शिष्यं यथाविधि उपनीय कल्परहस्यसहितां वेदशाखाम् अध्यापयेत् स एव भवति आचार्यः। अपरतो यो जीवनधारणार्थं वृत्त्यर्थञ्च मन्त्रब्राह्मणात्मकवेदस्यैकदेशं शिक्षादिवेदाङ्गषट्कं वा अध्यापयति स एव भवति उपाध्यायः। गुरुर्भवति एव स यः गर्भाधानादीनां निषेकादिसंस्कारकर्मणामनुष्ठानं यथाशास्त्रम् अन्नदानादिना च संवर्धनं साधयति[39]। वस्तुतः कर्मविभागद्वारेणैव एतेषां विभागः सृष्टः। उपनयनद्वारेण तनोः ब्रह्मयोग्यतामुपादयन्नयमाचार्योऽत्र प्रकृष्ट इव प्रतिभाति। अतो यद्वा भवतु वैभेद्यं सहयोगबुद्ध्या सदैव छात्रं विनयिनं कर्तव्यं श्रेयस्कामेन शिक्षकेण। विद्यालाभाय तथा आत्मनः अभ्युदयसिद्धये शिष्यस्य आचार्यपारतन्त्र्यमेव सर्वदावलोक्यते। उपनयनादनन्तरम् उपनीतो ब्रह्मचारी भवति

---

36 सत्यवाक् धृतिमान् दक्षः सर्वभूतदयापरः।
आस्तिको वेदनिरतः शुचिराचार्य उच्यते॥
वेदाध्ययनसम्पन्नो वृत्तिमान् विजितेन्द्रियः।
दक्षोत्साही यथावृत्तः जीवनेऽस्तु वृत्तिमान्॥ यमः, as quoted in R. Pandey. *Hindu Samskāras.* Delhi : MLBD, 2006 (rpt.). 1969 (2nd ed.). P. 126.

37 'यद्यदाचरति श्रेष्ठस्तदेवेतरो जनः' - श्रीमद्भगवद्गीता – 21/3.

38 Cf. B.K. Swain. Smṛtimimāmsā. pp. 191-198.

39 मनुसंहिता – 142-140/2.

अस्वतन्त्रः। स्वातन्त्र्यं तु विद्यया भवति प्रसूतम्। अत आचार्यो भवति स्वतन्त्रः[40]। अत्राध्यापकस्तु भवति निर्देशकः। अध्ययनमपि अधीतवेदेनावश्यकर्तव्यतया उपदिष्टम्, न केवलं वृत्यर्थम्। यो हि विद्यामधीत्यार्थिने न ब्रूयात्स कर्म्महा स्याच्छ्रेयसो द्वारमपावृणुयात्। स खलु पितृतुल्यः सन् शिष्यस्य हितं सदैव चिन्तयेत्। शिष्यहितमभिलक्ष्य यदि वा तं ताडयेत् दण्डयेद्वा तथापि दण्डप्रणयने स भवति मानविकः। कर्तव्योचितं किमपि विषयं शिष्यान्न गोपयेत्, अपि तु कर्तव्यकर्मणि तं निर्दिशेत् प्रचोदयेद्वा। विपरीते तु स न शिक्षकपदवाच्यः[41]। अध्ययनार्थेन यं चोदयेन्न चैनं प्रत्याचक्षीत। न चास्मिन् दोषं पश्येत्। यः खलु संवत्सरोषिते शिष्येऽनिर्दिशन् ज्ञानं वितनोति स खलु तस्य शिष्यस्य दुष्कृतमेव हरते। अतः शिक्षक एव स्वकीयाचरणैरनुप्रेरयत्यध्येतारमात्मोचितकर्तव्यसम्पादनाय।

**4. • शिक्षापद्धतिः**

**4.i.** पूर्वमेवोक्तमस्मद्विवेषकेण यद् धर्मशास्त्रकालिनी शिक्षापरम्परा शिक्षककेन्द्रिकतायामासीत् प्रतिस्थापिता। शिक्षार्थी कुटुम्बवद् गुरुगृहमुषित्वा गुरोः निर्देशनञ्च आधारीकृत्यात्मानम् अनुशासनपाशेन बध्नाति। शिक्षाव्यवस्थाया अस्याः प्रधाना भित्तिस्तु आसीन्मौखिकी निर्देशना। अत्र पारिभाषिकताया उपरि गुरुत्वमारोपितम्। स्मृतिनिर्भरेयं शिक्षा शिक्षार्थिनां बौद्धिकमननाय तथा प्राक्षोभिकविकाशाय चालम्। यतो धर्मशास्त्रकारा आश्रमेतरेषु पालकभूतस्याश्रमत्रयस्य गार्हस्थ्याश्रमस्य श्रेष्ठत्वमुद्धोषयन्ति ततः शिक्षाश्रमोऽयं भवति द्वारस्वरूपो गार्हस्थ्याश्रमप्रवेशनाय। अतो यथा शिक्षार्थिनो गार्हस्थ्याश्रमं प्रविश्य व्यष्टिभूतस्य परिवारस्य समष्टिभूतस्य समाजस्य राष्ट्रस्य चाभ्युन्नतये भविष्यन्ति समर्थास्तथा ते आश्रमेऽस्मिन् गुरुणा आचरणभित्तिकशिक्षणद्वारेण मूल्यबोधभित्तिकशिक्षणद्वारेण चोपदिश्यन्ते। नियमानुवर्तित्वम् आत्मसंयमः, शृङ्खला इत्यादीनां वैयक्तिकानां मूल्यानाम् आश्रयणेनाध्येतारो भवन्ति सामाजिकाः।

**4.ii.** यथा शिक्षा भवति कस्यचन शिक्षितस्य जनस्य दायो यः खलु विद्यावंशप्रसूतः। यथा अपुत्रको जनो पुत्रोत्पत्तेरसम्भवात् पितृपैतामहादागतं जन्मवंशं नाशयति, पापभाक् च भवति, तद्वत् अर्जितायाः विद्यायाः पात्र्यन्तरासम्प्रसारणात् कोऽपि पण्डितः विद्यावंशस्य नाशको भवति। अतो न केवलमधीतवेदेन वृत्त्यर्थमवश्यमध्यापनं कर्तव्यमपि तु विद्यावंशरक्षणाय एव च प्रयत्नः करणीयः। अतो वेदार्थमुपनयमानः शिष्यस्तु कदापि न वञ्चनीयो वेदाध्ययनात्। कार्याकार्यमजानतः दुष्कृतेषु कर्मसु अवलिप्तस्य गुरोः परित्याग एव सर्वदा करणीयः श्रेयस्कामेन अध्येत्रा[42]। अनुशीलनात्मकं निदर्शनमेव अस्याः शिक्षाव्यवस्थायाः भित्तिस्वरूपा भवति। एतत् करणीयं एतत्तु न करणीयमिति रीत्या प्रदत्तं निर्देशनं न नैतिकमानोन्नयनं साधयति। शिक्षको यदि स्वजीवने एव तेषां कर्तव्यकर्मणाम् अनुशीलनं करोति तर्हि शिक्षार्थिनः स्वत एव विनयिनः सन्तः विषयस्यापि तात्पर्यं सम्यक्तया विज्ञाय स्वहृदि अवस्थापयन्ति। अपि च, तेषां कर्तव्यकर्मणां स्वतः अनुशीलनेन मनसि बुद्धौ आत्मनि च शुद्धतां प्रकाशयन्ति। वयं तु जानीमो यत् विद्या तु गुरुशुश्रूषया लभ्या। अतो गुरोर्हृदयस्थां विद्याम् अधिगन्तुं शिष्यः सदैव गुरोरानुकूल्यम् अभजत। आनुकूल्यमिदं सेवारूपेण पर्यवसितम्। अतः शिष्यः कायमनोवाक्यैः गुरुसेवनैः न केवलं बाह्याचरणेन अपि तु मनसा हृदयेन च विनयी भवति।

---

40 अस्वतन्त्रः स्मृतः शिष्य आचार्ये तु स्वतन्त्रता – नारदस्मृतिः – 33/1/4.

41 'A teacher becomes no teacher if he avoids giving instruction.' – P.V. Kane. *History of Dharmaśāstra*. Vol, II. Part – I. Pune: Bhandarkar Oriental Research Institute, 1997 (3rd Ed.). P. – 329.

42 गौतमधर्मसूत्रम् – 12/21, महाभारतस्य उद्योगपर्व 48/178.

**4.iii.** यद्यपि अस्याः शिक्षाव्यवस्थायाः प्रधाना भित्तिस्तु आसीत् मौखिकी निर्देशना इति पूर्वमेवोक्ता, तथापि एतत्तु अत्र न विस्मर्तव्यं यत् मौखिकनिर्देशनेन विनयो न प्राप्यते, न च दीयते। मौखिकशिक्षणेन केवलं यथाश्रुतं विद्यार्जनं भवितुमर्हति, परन्तु मूल्याश्रिता विनयशिक्षा कर्तव्यकर्मणाम् अनुशीलनेन वैयक्तिकमभ्युदयं साधयति। अतश्छात्रेभ्यः समधिका स्वतन्त्रता प्रदातव्या यया छात्राः आत्मविकाशार्थं शिक्षेरन्। इयं स्वतन्त्रता आभ्यन्तरप्रेषणारूपेण विद्यां प्रति छात्राणां रुचिवर्धका भवति। एतदप्यत्र न विस्मर्तव्यं यत् स्वातन्त्र्यं न भवति स्वच्छन्दाचरणं गुरोरेवावमाननञ्चेति। अतः केषुचित् स्थलेषु च बाह्यिकं नियमनम् आवश्यकं वर्तते। किन्तु अधिकं नियमनन्तु शिष्यस्य वैयक्तिकाभ्युदयाय प्रतिबन्धको भवति। अतो विनयशिक्षया एव बन्धनरज्जुश्लथनमेव आवश्यकं वर्तते। छात्रेभ्यः संयमपूर्वकं शिष्टाचारं दीयेत येन वैयक्तिकस्वातन्त्र्यानुशीलनेन ते सामाजिकप्रतिष्ठां लभन्ते। वैयक्तिकस्वातन्त्र्यानुशीलनसमये यदि कस्यचन शिष्यस्य अज्ञानवशादपि दोषः समुत्पद्यते तर्हि शिक्षकः तत्कृतेष्वपराधेषु सततमुपालभेत[43]। विषयेऽस्मिन् एतदपि स्मर्तव्यं यत् अपराधप्रशमनार्थं कदापि वा यदि दण्डस्योपयोगः स्वीक्रियते परन्तु तद् भवति केवलं यथाकृतमपराधमभिलक्ष्यैव। अतः अनया भयमिश्रितश्रद्धया आचार्यस्य अप्रत्यक्षश्रेष्ठत्वं स्वीकुर्वन्ति शिष्याः, यत् खलु भवति विनयशिक्षायां प्रथमं सोपानम्। श्रद्धधानाः शिष्या एव ज्ञानलाभे अधिकारी भवति। आत्मनियमनद्वारेण यत् श्रद्धापूर्वकमनुशीलनं तदेव विद्यालाभाय हेतुभूतं भवति[44]। सश्रद्धः शिष्यः अनुभवात्मैकान्तिकानुशीलनेन विनयशिक्षां लभते। एतत्तु अत्र न विस्मर्तव्यं यद् वारं वारं निर्देशनप्रदानमेव ज्ञानमार्गप्रापणायान्तरायो भवति। भूयः निर्देशनमेव अध्यापकस्य अक्षमतां सूचयति। अतो नापृष्टः अन्यायेन च पृच्छतः सन्नपि निर्देशनं न देयम्। यदि वा दीयते तर्हि तन्निर्देशनं भवति व्यर्थम्। अतो जडवद् वारं वारं निर्देशनं तु परित्यज्यम्। अनुशीलनात्मकोऽनुभव एव मानवीयस्वभावस्योपलब्धये सहायको भवति। अतः तत्परः संयतेन्द्रियो जनः शुश्रुषया विनयशिक्षा लभते, या खलु वैयक्तिकमूल्यानाम् उपयोगद्वारेण सामाजिकतां सृजति।

**4.iv.** वस्तुतो विद्यारम्भसंस्काराद् आरभ्य गार्हस्थ्याश्रमप्रवेशनात् प्रागनुष्ठितं समावर्तनसंस्कारपर्यन्तम् इयं शिक्षाव्यवस्था त्रिधा विभज्यते। प्रप्राथमिकतया परिवाराभ्यन्तरे भवति बालकस्य भाषाशिक्षणम्। तदानीमेव विद्यारम्भसंस्कारो भवति, यदनन्तरं बालकाय मूल्यबोधशिक्षा दीयेत। तावन्नास्ति अस्य वेदशाखाध्ययनाधिकारः। उपनयनाद् अनन्तरं गुरुगृहम् उपनीतो ब्रह्मचारी सुविस्तृते गहनज्ञानारण्ये प्रविशति। तत्र तु भवति वेदस्य स्वशाखाध्ययनं गुरोर्निर्देशनात्मकम् अनुशीलनम्। तदा एव न केवलं श्रोत्रियप्रशिक्षणमपि तु विनयशिक्षा दीयते। अपरतः समावर्तनसंस्कारादनन्तरं गार्हस्थ्याश्रमप्रवेशनोद्यतं विद्यावनतं विनीतं शिष्यं गुरुः संसारोपयोगिनं व्यवहारिकशिक्षणं प्रददाति। गार्हस्थ्याश्रमविहितानां कर्तव्यकर्मणाम् आचरणं कीदृशं भवति केनोपायेन च तत् साधनीयमिति विषयान् सविस्तारम् उपदिशति गुरुः। अतः समावर्तनसंस्कारः अधिगताया विद्याया व्यवहारिकतामेव सूचयति। अतः कथने एतन्न कोऽपि दोषः समुत्पद्यते यत् समावर्तनस्नानमेव व्यक्तेः सामाजिकतायाः प्रवेशद्वारस्वरूपमिव। अतः संक्षेपेण वक्तुमेतत् शक्यते यत् प्रागुपनयनात् श्रोत्रप्रशिक्षणादिना भाषाशिक्षणम्, उपनयनादनन्तरं स्वाध्यायाध्ययनं गुरुनिर्दिष्टेषु मार्गेषु अयनं गुरोर्निर्देशनेन गुरुशुश्रूषया च विनयशिक्षणम्, समावर्तनस्नानादनन्तरञ्च गार्हस्थ्याश्रमोपयोगिनं व्यवहारिकशिक्षणमिति च रीत्यनुसारं धर्मशास्त्रानुसारिणी शिक्षणव्यवस्था त्रिधा विभज्यते।

43 अपराधेषु चैनं सततमुपालभेत – आपस्तम्बधर्मसूत्रम् – 28/8/1.

44 ‘श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः’ – श्रीमद्भगवद्गीता – 39/2.

## 5. • प्रतिष्ठानानियन्त्रिता शिक्षा

**5.i.** धर्मशास्त्रयुगे शिक्षणप्रक्रियेयं तथा प्रसिद्धा नासीत् यथा आसीत् प्रातिष्ठानिकी शिक्षा। परन्तु धर्मशास्त्रकाराः शिक्षणप्रक्रियामिमामपि स्वीकृतवन्तः। प्रागुपनयनात् कामचारः, कामवादः, कामभक्ष्यः[45]- इति गौतमवचनस्यार्थस्तु यदुपनयनकालो निर्दिष्टः शास्त्रकृद्भिः तत्पूर्वमुपनीतस्यजनस्य यथेप्सितेषु आचरणेषु वचनेषु अशनेषु च नास्ति कोऽपि प्रातिष्ठानिकनियमः। परन्तु अत्र ईप्सितमित्यनेन न यथेच्छाचरणमिति हरदत्तस्याभिप्रायः। अनुपनीतस्यापि इन्द्रियनियमनमावश्यकं येन तस्य ब्रह्मचर्यविषये योग्यता चोपपद्येत।

**5.ii.** जन्मनः परं कोऽपि बालकः परिवाराभ्यन्तरे परिवारसदस्यानभिलक्ष्य स्वतस्फूर्तम् अनुकरणं करोति। परिवारसदस्येषु यः आन्तर्वैयक्तिकसम्बन्ध उपपद्यते तेन वैयक्तिकाभ्युदयस्तस्य भवति साधितः। शरीरसम्बन्धत्वात् परिवारसदस्या एव भवन्ति शिशोः मानसिकीं तथा प्राक्षोभिकाकाङ्क्षाञ्च अवबोद्धुमलम्। परिवार एव भवति तादृशं प्रतिष्ठानम्, यत्र शिशोः व्यक्तित्वस्य स्वाभाविकोन्मेषो भवति साधितः, यः खलु प्रत्ययात्मकं चरितनिर्माणं करोति। जन्मनः परं परिवारस्थः शिशुः स्वात्माभ्युदयाय प्राक्षोभिकीं निरापत्तामेव अभिलषति। परिवार एव भवति स यः तस्यैव निरापत्तां निश्चिनोति। अतः परिवारसदस्यानां कर्तव्यकर्मणाम् अनुकरणं तथा तेषां पर्यवेक्षणमेव परिवारे अस्य सदस्यत्वं सृजति। परिवारानुशीलिताचाराणामेव आत्मीकरणेन ते जन्मवंशस्योद्वहनं कुर्वन्ति। परिवारे एव बालकेभ्यः शिक्षाविषये स्वातन्त्र्यं दीयेत। परन्तु तत्रापि मूल्यबोधस्य अन्तर्भावः सततमेव दृश्यते। मूल्यबोधरहितं स्वातन्त्र्यन्तु कार्यहानेः नामान्तरमेव। बाह्यप्रकृत्या साकं सम्पृक्तः शिशुः प्रकृतेरनुवर्तनेन एव आत्मप्रकृतेरनुशीलनं करोति। श्रोत्रप्रशिक्षणेन भाषाशिक्षणमेव भवति शिशोः तदा। परिवारमध्ये तेभ्यः नीतिशिक्षा दीयेत येन तेषां मनुष्यजीवनं भवति निर्मितम्। अस्या मूल्यबोधशिक्षायाः अभावेन मनुष्या भाविनि काले स्वीययौवनस्य स्वीयधनप्राचुर्यस्य स्वीयप्रभुत्वस्य स्वीयविवेकस्यापि च दुरुपयोगं साधयति। यतः बाल्यावस्थायां शिशोः मनः भवति निर्मलं नैतिकशिक्षा-ग्रहणोपयोगसमर्थञ्च ततः अयमेव समयः यदा परिवाराभ्यन्तरे एव तेषु नैतिकशिक्षाणाम् अन्तर्भावः भवति। नितान्तनिर्मलस्वान्तचेतसा एव आहृतं शिक्षणं न कदापि भवति विस्मृतम्। अतो गर्भाधानसंस्काराद् अनन्तरम् उपनयनपर्यन्तं शिशोः जीवनं भवति सम्भावनामयम्। सम्भावनात्मकस्यास्य जीवनस्य स्वतः विकशनार्थमेव बाह्यिकं नियन्त्रणमेव निषिध्यते। सम्भावना यदि भवति निर्देशनेन केवलं निगडिता, तर्हि तस्याः सम्भावनायाः विकाशस्तावदेव न भवति सम्भवः। अतः स्वतन्त्रसत्ताया उन्मोचनेन हि तस्येयं सम्भावना अभ्युदयरूपेण फलेन पर्यवसिता भवति। अतः प्रतिष्ठाननियमेन बालकं न सन्निरुध्य यदि तस्मै कर्तव्यकर्माणि उत्तरदायित्वानि च आरोप्यन्ते तर्हि तस्य दैहिकमानसिकविकाशः स्वत एव भवति सम्भवः। अतो नियमात्मकं निर्देशनं विहाय तेभ्यः प्रेषणा एव संजननीया, यया एव उद्बुद्धाः सन्तः शिशवः स्वातन्त्र्येण मूल्याश्रितकर्तव्यकर्मणां जनका भवितुम् अर्हन्ति। परिवारसदस्यैरेव केवलं तेषां स्वतन्त्रकर्मणां मूल्याश्रितं पर्यालोचनं भवेत्, येन मूल्याश्रितानि एतानि कर्तव्यकर्माणि सामाजिकाभ्युदयसाध्यानि च भवेयुरिति।

**5.iii.** शिक्षाया उपादानानि यानि मयालोचितानि पूर्वं तानि भवन्ति बाह्यिकनियन्त्रणरहितानि। शिक्षार्थिनामत्र पर्यवेक्षणात्मानुशीलनैरुपायैः शिक्षणं भवति सुसम्पन्नम्। अतो वचनमेतत् सार्थकं यदीयं शिक्षणप्रक्रिया

---

45 गौतमधर्मसूत्रम् – 2.1.

शिक्षार्थिकेन्द्रिकी। शिक्षार्थिनो यौक्तिकाभिज्ञया तथा सक्रियानुशीलनद्वारेण प्रवृत्तिमार्गमपाकृत्य निवृत्तिमार्गं व्रजन्ति। अतः स्वाभाविकेन परिवेशेन सह सहबन्धनेन स्वतःस्फूर्तशिक्षाप्रक्रिया भवति संघटिता। मूल्याश्रितशिक्षाया बीजमत्र भवत्युप्तम्। परिवाराभिज्ञैः सामाजिकैः सदस्यैर्भवति सततं तेषां मूल्यायनम्। चित्रमाध्यमेन विषयोऽयमत्रोपन्यस्तः।




## सहायकग्रन्थसूची

Altekar, A.S. *Education in Ancient India*. Banaras: Nand Kishore & Bros., 1951 (4th Ed.), 1944 (1st Ed.).

Āpastamba. *Āpastambadharmasūtram.* Ed. U. Pandeya. Varanasi: Chaukhambha Sanskrit Sansthan, 2016.

Auboyer, J. *Daily Life in Ancient India.* New Delhi: Munshiram Manoharlal Publishers Pvt. Ltd., 1994, 1961 (1st ed.).

Ayer, P.S.S. *Evolution of Hindu Moral Ideals*. Delhi: Nag Publishers, 1976. Reprint, 1935.(1st Ed.).

Banerjee, S.C. *Dharma-sūtras- A study in their Origin and Development.* Calcutta: Puthi Pustak, 1962.

Creel, A.B. *Dharma in Hindu Ethics.* Calcutta: Firma KLM, 1977.

Gambhirananda, S. (Ed.). *Upaniṣad granthāvalī.*Vol.1. Kolkata: Udbodhan Karyalaya, 2009 (33rd Reprint), 1941 (1st Ed.).

Gautama. *Gautamadharmasūtram*. Ed. U.C.Pandey. Varanasi: Chaukhambha Sanskrit Sansthan, 2000.

Hiriyanna, M. *Indian Conception of Value.* Mysore: Kavyalaya Prakashan, 1975(Reprint).

Kane, P.V. *History of Dharmaśāstra*. Vol. II. Part 1. Pune: Bhandarkar Oriental Research Institute, 1997 (3rd Ed.), 1941 (1st Ed.).

Kapani, L. *The Philosophical Concept of Saṃskāra.* Delhi: Motilal Banarsidass Publishers Private Limited, 2013.

Keay, F.E*. Ancient Indian Education- An enquiry into its origin, development, and ideas.*New Delhi: Cosmo Publications, 1960.

Krishnamurti, J. *Education and the Significance of Life.* California: Krishnamurti Foundation of America, 1953 (e-book).

Mitra, P. *Indian Culture and Society in the Vedas.* Calcutta: Sanskrit Pustak Bhandar, 1985.

Mitra, S.K. *The Ethics of The Hindus.* Kolkata: University of Calcutta, 2013 (Reprint).

Mookerji, R.K. *Ancient Indian Education- Brahmanical and Buddhist.* Delhi: Motilal Banarsidass Publishers Private Limited, 2003 (2nd Ed. Reprint), 1947 (1st Ed.).

Mukherjee, D.P. *Value Education- The Indian Tradition.* Mumbai: Bharatiya Vidya Bhavan, 2004.

Olivelle, P. *The Āśrama System: The History and Hermeneutics of a Religious Institution.* New Delhi: Munshiram Manoharlal Publishers Pvt. Ltd., 2004.

Pande, G.C. *Mūlyamīmāṃsā.* Allahabad: Raka Prakashan, 2005 (2nd ed.).

Pandey, R. *Hindu Saṃskāras- Socio Religious study of the Hindu Sacraments.*Delhi: Motilal Banarsidass Publishers Private Limited, 1969 (2nd Revised Ed.), 1949 (1st Ed.).

Rajput, J.S.(Ed.). *Value Education in Indian Schools- Experiences and Strategies of Implementation.* New Delhi: National Council of Educational Research and Training, 2003.

Swain, B.K. *Smṛtimīmāṃsā.* Delhi: Akshaya Prakashan, 2006.

Received on 10. 02. 2017 Accepted on 24. 07. 2017

# प्राक् धर्मशास्त्रेण अधुना वृक्षसंरक्षणम्

**Arpita Dey***

**सारसंक्षेप:**

*'আয় আমাদের অঙ্গনে অতিথিবালক তরুদল*
*মানবের স্নেহ সঙ্গনে, চল আমাদের ঘরে চল্।*

*तरव: अस्माकं प्रतिवेशी। अस्माकमात्मनामात्मीय:। मानवसम्प्रदायस्य आगमनात् प्राक् तरुकुल: हि धराधामेऽस्मिन् अवतीर्प मानवानां क्षुधानिवारणार्थं खाद्यादानम्, आक्ष्रयार्थं शीतलछायाप्रदानम् इत्यादि कार्यं समाप्य मानवानामागमनाय प्रतीक्षारत: आसीत्। अत: सृष्टे: आदिल्गनात् अस्मिन् भुवने अरण्यानी मानवानां परमामित्ररूपिनी। किन्तु कालक्रमेण सामयिकसुखप्रात्प्यर्थ आधुनिकविश्वस्य उन्नतप्रयुक्तिविज्ञानप्रथावात् उत्पन्नेन यन्त्रदानवात्याचरेण वयमस्माकमात्मनामास्मीयस्वरुपान् वृक्षान् हन्म:। परशुरामस्य तुल्य: कुठारं धारयित्वा मानवा: भुवनमिमं वृक्षहीनं कर्त्तुं उद्योगिना: भवन्ति। किन्तु अयं काल: समागत: यदा वृक्षन्छेदनेन परिवेशदूषणं जलदूषणं वयुदूषणं भूमिदूषणञ्च संघटितम्। अत: अरण्यहननेन आत्महननम् सुप्रशस्तम् इति मानवा: अधुना उपलभ्यन्ते। न हि अयं ध्वंसलीला संघटते तदर्थं अस्माकं देशे पुराकाले मनु: याज्ञवल्व्य: पराशरश्च इत्यादि शास्त्रकारा: विविधानि विधानानि विरचितानि। तेषां सन्देश: सम्थवत: वयं कोऽपि न जनीम: आधुनिकविश्वे। संस्कृतसाहित्याकाशे घर्मशात्रस्य इतिहासे विशंति शास्त्रकतारा: वर्तन्ते.। अत: अहं मम अस्मिन् पत्रे प्राचीनशास्त्रप्रणेतानां एतानि नवचिन्ताचित्रानि अङ्कितार्थं चेष्टे।*

**मूलशव्दगुच्छ:** प्राचीनभारते शास्त्रकाराणां विधाने आधुनिककालस्य उद्भिदविद्याया: स्पर्शमनुभूतम्।

**भूमिका :**

वर्तमानस्य परिवेशसचेतनाया: वास्तुतन्त्रस्य भारसाम्यरक्षाया: विश्वस्य उष्णतानियन्त्र णस्य च तुल्य: वहुचर्चितानि विषयानि आविष्कृतानि किन्तु तत् प्रागेव आस्माकं देशे इदं मुणीनां मस्तिष्कप्रसूत:- इतिअहं स्वीकरोमि। वयमात्मनां देशजकृतित्वं प्रति उदासीना: भूत्वा पाश्चात्याविज्ञाणिनां जयगीतं गायाम:। आदर्शनाागरिक स्वरूपार्थ अहं तत् गीपनकृतित्वं प्रकाशकर्तु प्रचेष्टे। मनुसहिता इति ग्रन्थ: अस्मिन् विषपे आकरग्रन्थस्वरुप:। उद्मिदविद्याया: नानातथ्यानि अत्र परिवेशितानि।

**वृक्षाणां संज्ञास्तित्वम्:**

मनुष्यस्य तुल्य: उद्मिदेषु अपि प्राणवायु: वर्त्तते इति मतवाद: विज्ञानी जगदीशचन्द्रवसुमहोदयेन आाविष्कृतेऽ पि सहस्रवर्षात् प्राक् मनुसंहितायां इत्याभासं प्राप्यते।

**तमसा वहुरूपेण वेष्टिता: कर्महेतुना**
**अन्त:संज्ञा भवन्त्येत सुरवदु:खसमन्विता:।। १**

---

* *सहकारी अध्यापिका, वेथुन महाविद्यालय:*

उक्तग्रन्थेपु कुल्लुकभट्टस्य टीकापामुक्तम् *''एते वृक्षादयस्तमोगुणेन विचित्रदुःरवफलेनाधर्म्मकर्म्महेतुकेन व्याप्त्याः अन्तश्चैतन्या भवन्ति यद्यपि सर्वे चान्तरेव चेतयन्ते तथापि वहिर्व्यापाराहिकार्यविरहात्तेथाव्यपदिश्यन्ते।''*२

**वृक्षाणां भेदाः**

मनुमतानुसारेण तरवः स्थावराः ते च द्विधा। केचिद्वीजादेव जायन्ते केचित् काण्डात् शाखा एव रोपिता वृक्षतां यान्ति। उषध्योव्रीहियवादयः फलपकेर्नैव नश्पन्ति वहुपुष्पफलयुक्ताश्च भवन्ति। मनुना उक्तम्-

**उद्भिज्जाः स्थावराः सर्वे वीजकाण्डप्ररोहिणः।**

**उषध्यः फलपाकान्ता वहुपुष्पफलोपगाः।।** ३

अतः टीकायामुक्तम् '' *ये वनस्पतयस्तेषां पुष्पमन्तरेनैव फलजन्म। इत्यरेभ्यस्तु पुष्पाणि जायन्ते तेभ्यः फलानीति। एवं वृक्षाः उथयरुपाः प्रथमान्तात्तसि।।''*४ मनुना उक्तम्-

**अपुष्पाः फलवन्तो येते वनस्पतयः स्मृताः।**

**पुष्पिणः फलिनश्चैव वृक्षास्तुभयतः स्मृताः।।** ५

अतः गुच्छगुल्मयोः भेदाः उल्लिखिताः। यस्मात् मुलात् अनेकाः शाखा जाताः न तु काण्ड भवति ते गुच्छाः। पुनः यस्मात् एकस्मात् मूलात् वहवः अङ्कुराः उद्गताः तेगुल्माः यथा शरेक्षुप्रभृतयः। प्रतानास्तन्तुयुक्तस्त्रयापुषालावु प्रभृतयः।

पुनरपि टीकापामुक्तम्- *''वल्लयो गुडुच्याजयः या भूमेर्वृक्षमारोहन्ति एतान्यपि वीजकाण्डरुहाणि।''* ६ मनुसमहितापामुक्तम्-

**गुच्छगुल्मं तु विविधं तथैव तृणजातयः।**

**वीजकाण्डहायेव प्रताना वल्ल्य एव च।।** ७

अधुना उद्भिदविज्ञाने नवरूपेन विज्ञानिना उक्तम् यद् तद् सहस्रवर्षात् प्राक् भगवता मनुना तस्य ग्रन्थे उल्लिखितम्। सामाजिक अर्थनैतिक-घर्मोय राजनैतिक प्रशासनिक सांस्कृतिक च इति विषये: सह उद्भिदविज्ञाने प्राणीविज्ञाने चिकित्साविज्ञाने च मनोः आवाधविचरणम् इति विष्मयम् उद्भावयति ।

**वृक्षाणां समाजधर्मेयकार्येषूपयोगिताः**

कौशलम वलम्व्य मनुना धर्योय द्रव्यनिर्मिणे देनन्दिनसामग्रीव्यवहारे च निर्द्दिष्टस्य वृक्षस्प नामोल्लिखितम्। तथा धर्मभीरुमानवाः शास्त्रवचनरक्षार्थं तानि वृक्षानि परिपालितानि। अतः वृक्षसृजनं वृक्षरोपनमपि च द्वे उद्देश्ये संघटिते। परिवेशपालनाय एतदपि शास्त्रकाराणां महदुद्दश्यं साधितम्। एतेन वास्तुतन्त्रस्प भारसम्पमपि रक्षितम्। प्राचीनथारते आयुर्वेद शास्त्रवर्णितवृक्षैः मानवानां रोगनिरामयकार्य संघटिम्।

धर्मीयकार्ये व्राह्मणः क्षत्रियः वैश्यः च इति वर्णानां व्रह्मचारिणः तेषा दण्डः यथाक्रमेण विल्वपलाशकाष्टेन, वटखदिरकाष्ठेन, पीलूदुम्वरकाष्ठेन च इति निर्मिताः

**व्रह्मणोवैल्वपलाशौ क्षत्रियोवाटखादिरौ।**

**पौलवौडुम्वरौ वैश्यौ दण्डानर्हन्तिघर्म्मतः।।** ८

पुनः दैनन्दिनकार्ये भूमिसीमारक्षणाना विषये कुल्लुकभट्टेन उक्तम् '' *न्यग्रोधादीन् वृक्षान् क्षीरिणउडु*

*म्वरादीन् चिरस्थायित्वात् सीमालिङ्गभूतान् कुर्वीत"*९ मनुना उक्तम्–

**सीमावृक्षांश्च कुर्वीत न्यग्रोधाश्वत्थ किंशुकान्।**

**शल्मलीन् शलातालांश्च क्षीरिणश्चैव पादपान्।।**

**गुल्मान् वेपुश्च विविधान् शमीवल्लीस्थलानिच।**

**शरान् कुब्जकगुल्मांश्च तथा सीमा न नश्यति।** १०

अस्मिन् ग्रन्थे विविधानि फलानि पुष्पाणि उल्लिखितानि। वस्त्रपरिष्करणार्थ फलस्पोपरि निर्भरता अत्र उल्लिखिता। यथा

**कौषेयाविकयोरूषैः कुतपानामरिष्टकैः**

**श्रीफलैरंशुपहानां क्षौमणां गौरसर्षपैः।।** ११

हारीतसंहितायाम् उक्त म् करञ्जः खदिरः कदम्वः कुरवः सप्तपणी पश्निपणी, जम्वुः निम्वः अपामार्गः, विल्वः अर्कः उडुम्वरः च इति वृक्षाणां काष्टेन दन्तघावनकार्यः प्रशस्तः।

**करञ्जं खदिरं वापि कदम्व कुरवं तथा**

**सप्तयर्पपृश्निपर्णोजम्वुनिम्वं तथैव च।**

**अपमार्गञ्च विल्वञ्चार्कञ्चोडुम्वरमेव च।।**

**एते प्रशस्ता कथिता दन्त घावानकर्म्मणि।१२**

अनेन वृक्षस्पोपयोगिता प्रतिपादिता। अरण्यविहीनस्य भुवनस्य भयावहतां विचिन्त्य अरण्यनां मूल्यवत्तामुपलभ्य च उक्तानि वचनानि विवृतानि मनुना, किन्तु तत्काले भुवनस्य अन्याशः अस्मिन् विषयसस्पर्के अज्ञतान्धकारे निमज्जितः आसीत् । इति प्राचीनभारतस्य गौरवोज्ज्वलेतिहासः।

प्राचीनभारते चतुराश्रममयमानवजीवनेषु वाणप्रस्थाश्रमः सम्पूर्णभावेन आरण्योपरि निर्भरमासीत्। अतः कुल्लुकभट्टेन उक्तम् –*''मुन्यन्नैर्नीवारादिभिर्नानाप्रकारैः पवित्रैः शाकमूलफलैर्वारन्योद्मवैरेता नेवेति गृहस्थस्य पूवोक्तान महायज्ञान् यथाशास्त्रमनुतिष्टेत्''*१३ मनुसहितायां प्राप्यते–

**पुष्पमूलफलैर्वापि केवलैर्वर्तयेत् सदा।**

**कालपक्वै : स्वयं शीर्णै वैखानसमते स्थितः**

**मुन्यन्नैर्विविधैर्मोध्यैः शाकमूलफलेन वा**

**एतानेव महायज्ञान् निर्वपेद्विधिपूर्वकम्।।१४**

आर्थसमाजघर्मचिकित्सा इति सर्वक्षेत्रे मानवानां वृक्षस्योपरि निर्भरता प्रतिपादनीया येन कौशलेन उत्तमभावेन वृक्षसंरक्षणकार्यं संघाठितम्। एतेन प्राचीनभारते परिवेशशुद्धं भारसाम्यञ्च रक्षितम्। किन्तु वर्तमाने विज्ञानप्रयुक्ति विद्यायाः उन्नतिविधनेन मानवानां वृक्षस्पोपरि निर्भरता विनष्टा। निर्दयहृदयसम्पन्नाः मानवाः निविचरिण वृक्षनिधनयज्ञे युक्ता नगरसभ्यतानिर्माने मत्ता भवन्ति । अतः वृक्षहीनभुवने ते आत्मनामस्तित्वसंकटे पतिताः।

**वृक्षछेदने दण्ड :**

अधुनैव अतीते वृक्षछेदने शास्तिव्यवस्था प्रचलिता। पुनरपि कुल्लुकभट्टस्य टीकायामुक्तम्– "*फलानामाम्रदीनां वृक्षाणां, गुल्मानां कुज्वकदीनां, वल्लीनां गुडुच्यादीनां लतानां वृक्षशाखासक्तानां पुष्पितानाच्च वीरुधां, कुष्माण्डदीनां प्रत्येकं छेदने पापमोचनार्थं सावित्र्यादि ऋक्‌शतं जपनीपम्।*" १६ वृक्षनाशात् पापमुत्पद्यते इति मनसि निधाय शास्त्रकारैः उक्तां पापमोचनार्थं प्रायश्चित्त विधिः प्रयुक्ता। मानवाः तत्काले प्रायश्चित्तविधिभयात् यथेच्छचारेण न वृक्षान् विनश्यन्ति स्म। वृक्षसंरक्षणविषये प्रकृतिसंरक्षणाविषये च धर्मशास्त्रकाराः सदा उद्योगिनाः सन्ति स्म। मनुना उक्तम्

**फलदानान्तु वृक्षणां छेदने जप्यमृक्‌शतम्।**
**गुल्मवल्लीलताञ्च पुष्पितानाञ्च वीरुधाम्**।। १७

वनभूमिसंरक्षणकार्ये अपि तसिमन् काले कठोरता परिलक्षिता। अत टीकायामुक्त म्– "*गृहतडागोद्यानक्षेत्राणामन्यतमं– मारणवन्धनादिभयकथनपूर्वकमाक्रम्य हरन् पञ्चपणशतानि दण्डनीयः स्पात्। स्वत्वभ्रान्त्या हरती द्विशतो दमः।।*" १८

**गृहं तडागमारामं क्षेत्रं वा भीषपा हरण्।**
**शतानि पञ्चदण्ड्यः स्यादज्ञानह्विशतो दमः**।। १९

प्रलुब्धं कृत्वा शास्त्रकाराः मानवैः वृक्षरोपणकार्यं कारयन्ति स्म। वृक्षाः परलोके वृक्षरोपनकर्तुः पुत्रवत् उपोकारिणः सन्ति। विष्णुसंहितायामुक्तम्– "*वृक्षारोपयितुर्वृक्षः परलोर्के पुत्रा भवन्ति।।*"

**वृक्षे मानवे च एकात्मताः**

कालिदासम्य मानसकन्या शकुन्तला वृक्षान् न जलसिञ्चनं कृत्वा सा जलं न पीता स्वस्य अलङ्कारणार्थं च वृक्षात् न पत्रं मोचयति स्म।

**पातुंन प्रथमं व्यवसति जलं युष्मास्वपीतेषु या**
**नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्**
**आद्ये वः कुसुमप्रसूतिसमये यस्याः भवत्युत्सवः**।। २०

पतिगृहयात्राकाले प्रसाधनकार्यं अरण्यनानी स्वस्यः वृक्षस्योपकरणेन शकुन्तलां कारयति स्म। वृक्षे मानवे च इदमेकात्मकं सत्यमपि अभूतपूर्वकम्।

**क्षौमं केनचिदिन्दुपाण्डुतरुणा माङ्गल्यमाविस्कृतं**
**निष्ठ्यूतश्चरणोपभोगसुलभा लाक्षारसः केनचित्।**
**अन्यथ्यो वनदेवताकरतलैवापर्व भोगथ्थितै देत्तान्या**
**भरणानि न किसलयोद्भेद प्रतिद्विन्द्विभिः**।।२१

**उपसंहारः**

अतः वनभूमिः मानवजातिः परस्परस्य परिपूरकः। मनुःयाज्ञवल्क्यः पराशरश्च इत्यादि शास्त्रकारैः चिन्तिता यद् मानवानां सख्यंधिक्येन सह वृक्षाणां सस्व्याह्रासः भविष्यति। एतेन अतिवृष्टिः खरा वन्या

भूमिकम्प: च इति दुर्यौगै: मानवसभ्यता विनष्टा भविष्यति। उक्तसंकटात् त्राणार्थं उद्भिदकुलस्य रक्षणमपि एकमेव उपायम्. एतदुपायायसाधनार्थं ते विविधानि विधानानि तेषां ग्रन्थे प्रयच्छितानि।

पाश्चात्यसभ्यतया अरण्यभूमि विन्यस्य इष्टककाष्टप्रस्तरादिभि: निर्मिता नगरसभ्यता तया वृक्षात् निर्गत: प्राणवायु: ($O_2$) अनवरतवृक्षच्छेदेनेन अयं विषवायौ ($CO_2$) रपान्तर : भवति। नगरसभ্যतायां श्रान्तं भूत्वा रविकविना गीतय्–

**'দাও ফিরে সে অরণ্য লও হে নগর,**
**লও যত, লৌহ, লৌষ্ট্র কাষ্ঠ ও প্রস্তর**
**হে নব সভ্যতা , হে নিষ্ঠুর সর্বগ্রাসী**
**দাও ফিরে তপোবন, পূণ্যচ্ছায়ারাশি**
**গ্লানিহীন অতীতের দিনগুলি।।**

वर्तमानविश्वे अस्माकं देशे रविठाकुर: वनमहोत्सवस्य प्रवर्तक:। अयं हि अरण्यभूमिप्रतिष्ठाय शन्तिनिकेतने प्रथमपालित : उत्सव:। अस्मिन् प्रसङ्गे विश्वकविना गीतम्–

**মরুবিজয়ের কেতন উড়াও শূণ্যে হে প্রবলপ্রাণ**
**ধুলিরে ধণ্য কর করুণার পূণ্যে হে কোমলপ্রাণ।।**

आत्मनां त्राणार्थं अद्य प्रत्येकं शपथमिमं गृहीतम्–

**গাছ লাগাও প্রাণ বাঁচাও।**

**तथ्यसूत्रानि:**


१. १ / ४९ मनुसंहिता (सम्पादक: अनुवादकश्च मानवेन्दु वन्द्योपाध्याय:) १४२० पृ: २८
२. १ / ४९ श्लोकस्य कुल्लुकभट्टस्य टीका मनुसंहिता (सम्पादक: अनुवादकश्च मानवेन्दु वन्द्योपाध्याय:) १४२० पृ: २९
३. १ / ४८ मनुसंहिता (सम्पादक: अनुवादकश्च मानवेन्दु वन्द्योपाध्याय:) १४२० पृ: २७
४. १ / ४७ श्लोकस्य कुल्लुकभट्टस्य टीका मनुसंहिता (सम्पादक: अनुवादकश्च मानवेन्दु वन्द्योपाध्याय:) १४२० पृ: २८
५. १ / ४८ मनुसंहिता (सम्पादक: अनुवादकश्च मानवेन्दु वन्द्योपाध्याय:) १४२० पृ: २८
६. १ / ४७ श्लोकस्य कुल्लुकभट्टस्य टीका मनुसंहिता (सम्पादक: अनुवादकश्च मानवेन्दु वन्द्योपाध्याय:) १४२० पृ: २८
७. १ / ४८ मनुसंहिता (सम्पादक: अनुवादकश्च मानवेन्दु वन्द्योपाध्याय:) १४२० पृ: २८
८. १ / ४५ मनुसंहिता (सम्पादक: अनुवादकश्च मानवेन्दु वन्द्योपाध्याय:) १४२० पृ: ८२
९. ८ / २४६ श्लोकस्य कुल्लुकभट्टस्य टीका मनुसंहिता (सम्पादक: अनुवादकश्च मानवेन्दु वन्द्योपाध्याय:) १४२० पृ: ६३५
१०. ८ / २४६, २४७ मनुसंहिता (सम्पादक: अनुवादकश्च मानवेन्दु वन्द्योपाध्याय:) १४२० पृ: ६३५
११. ५ / १२० मनुसंहिता (सम्पादक: अनुवादकश्च मानवेन्दु वन्द्योपाध्याय:) १४२० पृ: ३९१
१२. ४ / ६,७ हारीतसंहिता, ऊणविंशतिसंहिता (सम्पादक: अनुवादकश्चत पञ्चानन तर्करन्त:) १३१० साल पृ : १२६
१३. ६ / ५ श्लोकस्य कुल्लुकभट्टस्य टीका मनुसंहिता (सम्पादक: अनुवादकश्च मानवेन्दु वन्द्योपाध्याय:) १४२० पृ: ४०७
१४. ६ / २१ मनुसंहिता (सम्पादक: अनुवादकश्च मानवेन्दु वन्द्योपाध्याय:) १४२० पृ: ४१२
१५. ६ / ५ मनुसंहिता (सम्पादक: अनुवादकश्च मानवेन्दु वन्द्योपाध्याय:) १४२० पृ: ४०७

१६. ११ / १४३ श्लोकस्य कुल्लुकभट्टस्य टीका मनुसंहिता (सम्पादक: अनुवादकश्च मानवेन्दु वन्द्योपाध्याय:) १४२० पृ: ९१२

१७. ११ / १४३ मनुसंहिता (सम्पादक: अनुवादकश्च मानवेन्दु वन्द्योपाध्याय:) १४२० पृ: ९१२

१८. ८ / १६४ श्लोकस्य कुल्लुकभट्टस्य टीका मनुसंहिता (सम्पादक: अनुवादकश्च मानवेन्दु वन्द्योपाध्याय:) १४२० पृ: ६४१

१९. ८ / १६४ मनुसंहिता (सम्पादक: अनुवादकश्च मानवेन्दु वन्द्योपाध्याय:) १४२० पृ:६४१

२०. ४ / ९ अभिज्ञानशकुन्तलम्( सम्पादक: अनिल चन्द्र बसु) २००३ साल पृ: २९३

२१. ४ / ५ अभिज्ञानशकुन्तलम्( सम्पादक: अनिल चन्द्र बसु) २००३ साल पृ: २८२

**ग्रन्थपञ्जी**


१. तर्करत्न: श्रीपञ्चानन : (सम्पादक: अनुवादकश्च) १३१० सन: ऊणविशंतिसंहिता ३८/ २ भवानी चरण दत्तस्य ष्ट्रीट कलिकाता

२. वसु: अनिलचन्द्र: (सम्पादक:) २००३ सन: अभिज्ञानशकुन्तलम् संस्कृत वुक डिपो कलिकाता ; ६

३. वन्द्योपाध्याय मानवेन्दु: ( सम्पादक: अनुवादकश्च) १४१० साल. मनुसंहिता (१म संस्करण:) संस्कृत: पुस्तक भाण्डार: कलिकाता-६



রামকৃষ্ণ মিশন শিক্ষণ মন্দির
বেলুড়মঠ
NAAC Accredited "A"
RAMAKRISHNA MISSION SIKSHANAMANDIRA
COLLEGE OF TEACHER EDUCATION